श्री: भा॰ द॰ पू॰ टी॰ १

ॐ स्वस्ति प्रजाभ्यः ॐ विश्वसर्गविसर्गादिनवलक्षणलक्षितं श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत्
दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहं क्रीडद्यदुकुलाम्भोधौ परानन्द उदीर्यते दशमे कृष्णसत्कीर्तिवितानायो
पवर्ण्यते धर्मग्लानिनिमित्तस्तु निरोधो योऽस्त्वभूभुजां प्राकृतादिस्तु यस्याद्यो निरोधः स तु वर्णितः तत्रा
त्मसंगतस्य सृष्टिं सहसाद्विनिरूपणेः कृता नवतिरध्याया दशमे कृष्णकीर्तये आद्यैः चतुर्भिरध्यायैर्ब्रह्मप्रार्थ
नतत्परैः भावं हर्तुं हरेर्जन्म सप्रसंगं निरूप्यते गोकुले मथुरायां च द्वारवत्यां ततः क्रमात् कृष्णलीलावि

श्रीराजोवाच कथितो वंश
विस्तारो भवता सोमसूर्ययोः
राज्ञां चोभयवंश्यानां चरितं
परमाद्भुतम् १ ॥

धशेषकान्तद्भेदैस्त्वनेकधा सा पंचविंशत्याध्यायैर्वृंदावनादिषु गोकुले वसतो लीला वर्ण्यते।
हवदक्षया एकेन यमुनावारिण्यक्रेणाकृतास्तुतिः एकादशभिराख्याता लीला मधुपुरे कृता शेषै
र्द्वारवतीलीला नन्विर्माणादि वर्ण्यते एवं नवतिरध्याया दशमे विषदाः कथाः १ तत्र प्रथमेऽकं
सः स्वमृत्युं देवकीसुतात् श्रुत्वाभीतोऽवधीत् तस्याः षड्गर्भानिति वर्ण्यते कृष्णावतारचरितं श्रवणामृतमि
तीतः उक्तानुवादेनोत्तरकथां प्रश्नाप्रच्छति तत्र तु नः कथितो वंशविस्तारो भवता सोमसूर्ययोरुद्भवानां १

१

धर्मोश्चरितंवर्णितमित्यन्वयः अंशेनेतिप्रतीत्यभिप्रायेणोक्तं नतुउक्तानिजातोगतः पितृगृहाद्व्रजमेधिता
र्थइत्यादिनामत्स्येपुनर्विस्तरेणावदेत्याह अवतीर्येति ३ भूतानिभावयतिदेशोपदेशद्वारेत्वेतीतिभूतभाव
नः अत्रलोकेत्रिधाजनामुक्तामुमुक्षवोविषयिनश्च तेषांमध्येश्रवणंकस्याप्यलंमन्यस्यादित्याह ४ निवृत्त
तर्षैः गततृष्णैर्मुक्तैरपीत्यर्थः मुमुक्षूणामध्येयमेवौषधंयस्माद्भवौषधादिति विषयिणामपिपरमो
विषयोयमित्याह श्रोत्रमनोभिरामादिति अपगताशुकयस्मात्तमात्मानंहंतीत्यापशुघ्नः तस्मात्पशु

यदोश्चधर्मशीलस्यनितरांमुनिसत्तम तत्रांशेनावतीर्णस्यविष्णोर्वीर्याणिशंसनः २ अ
वतीर्ययदोर्वंशेभगवान्भूतभावनः कृतवान्यानिविश्वात्मातानिनोवदविस्तरात् ३ निवृत्त
तर्षैरुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् कउत्तमश्लोकगुणानुवादात्पुमान्विरज्येत
विनापशुघ्नात् ४ पितामहामेसमरेमरंजयैर्देवव्रताद्यातिरथैस्तिमिंगिलैः दुरत्ययंकौर
वसैन्यसागरंकृत्वातरन्वत्सपदंस्मयत्प्लवाः ५

घ्नादितरइतिवातस्मादिनोउत्तमः श्लोकोयशोयस्यसउत्तमश्लोकः श्रीकृष्णस्यगुणानुवादात्कः पुमान्विर
ज्येननविरक्तोभवेत् अस्मत्कुलदैवतंकृष्णः अतस्तत्कथैवनितरांश्रोतव्येत्याशयेनाह ५ अमरान्जयंतीतितैः
देवव्रतोभीष्मः तदाद्यैरतिरथैः तिमिंगिलतुल्यैर्दुरत्ययंकौरवसैन्यमेवसागरंवत्सपदमिवाल्पंकृत्वामे
पितामहायुधिष्ठिरादयोऽतरन्नस्माकंअयंहेतुरर्थः श्रीकृष्णःस्वीयोयेषांतस्यवीर्याणिवदस्वेतितृतीयश्लोकेना
न्वयः नकेवलंपौरवाणामेवायंहितःकिंतुमच्छरीरमपीत्याह ५

श्रीः
भा·द·
पू·टी·
२

द्रौणेः अश्वत्थाम्नः ब्रह्मास्त्रेणादग्धं इदं मदङ्गं कुरूणां पाण्डवानां च संतानस्य निधाने मम मातुः कुक्षौ प्रवि-
ष्टो धृतचक्रः यो जुगोपायति ६ अखिलदेहभाजां सर्वप्राणिनामन्तश्च बहिश्च पुरुषरूपेण कालरूपेण चेति
प्रशारंभपायेण बहुवचनं मृत्युं संसारमुतामृतमपि प्रयच्छतः भगवतः तस्य वीर्याणि कथय तस्य हि
अयं भावः अन्तर्यामिरूपेणान्तर्दृष्टीनां मुक्तिं बहिर्दृष्टीनां कालरूपेण मृत्युं ददातीति यतः अतोन्तर्दृष्ट्यानन्दी
यान्त्येव श्रोतव्यानीति ७ नन्व बलं गदं सारणं च दुर्मदं विपुलं ध्रुवम् वसुदेवस्तु रोहिण्यां कृतादीनुदपा

द्रौण्यस्त्रविप्लुष्टमिदं मदङ्गं संतानबीजं कुरुपाण्डवानां जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे-
यः शरणं गतायाः ६ वीर्याणि तस्याखिलदेहभाजामन्तर्बहिः पूरुषकालरूपैः प्रयच्छ-
तो मृत्युमुतामृतं च मायामनुष्यस्य वदस्व विद्वन् ७ रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्व-
या देवक्या गर्भसंबन्धः कुतो देहान्तरं विना ८ कस्मान्मुकुन्दो भगवान्पितुर्गेहाद्व्रजं गतः
क्व वासं ज्ञातिभिः सार्धं कृतवान्सात्वतां पतिः ९ व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः भ्रा-
तरं चावधीत्कंसं मातुरद्धातदर्हणम् १० ॥

दयदिति रोहिण्यास्तनयो रामः प्रोक्तः वसुदेवस्तु देवक्यामष्ट पुत्रानजीजनत् कीर्तिमन्तं सुषेणं च
भद्रसेनमुदारधीः ऋजुं संमर्दनं चैव संकर्षणमहेश्वरं अष्टमस्तु तयोरासीत्स्वयमेव हरिः किलेति पुन-
र्देवक्या गर्भसंबन्धस्तस्यैवोक्तः स कुतो द्यरनेऽस्यपेतामाह कस्मादिति भगवतः कंसभयप्रकाशनमवा-
हित्यर्थः पितुर्गेहाद्वसुदेवगृहाद्व्रजं गोकुलं कस्माद्गत इति प्रस्तावः ९ मातुर्भ्रातरं कंसं कस्माद्व-
धार्हमद्धा साक्षादवधीत् १०

२

स्पष्टं ११ ननुत्वन्नेक्षुत्पिपासापीडितस्यकृतस्तवश्रवणावकाशइत्याहनैषेति मत्क्रोडस्यापिममजीवनंहरि
कथामृतपाननिमित्तंतदुपरमेजीवितमेवसंदेहोनस्यादित्यर्थः १२ भृगुनंदनशौनकएवंसाधुवादंसमीची

देहंमानुष्यमाश्रित्यकतिवर्षाणिवृष्णिभिः यदुपुर्यांसहावात्सीत्पत्न्यःकत्यभवन्विभोः १०
एतदन्यच्चसर्वंमेमुनेकृष्णविचेष्टितं वक्तुमर्हसिसर्वज्ञश्रद्दधानायविस्तरेत ११ नैषातिदुःसहा
क्षुन्मांत्यक्तोदमपिबाधते पिबंतंत्वन्मुखांभोजच्युतंहरिकथामृतं १२ श्रीसूतउवाच एवं
निशाम्यभृगुनंदनसाधुवादंवैयासकिःसभगवानथविष्णुरातं प्रत्यर्च्यकृष्णचरितंकलिकल्म
षघ्नंव्याहर्तुमारभतभागवतप्रधानः १३ शुकउवाच सम्यग्व्यवसिताबुद्धिस्तवराजर्षिस
त्तम वासुदेवकथायांतेयज्जातानैष्ठिकीरतिः १४ वासुदेवकथाप्रश्नःपुरुषांस्त्रीन्पुनाति
हि वक्तारंप्रच्छकंश्रोतॄंस्तत्पादसलिलंयथा १५ भूमिर्दृप्तनृपव्याजदैत्यानीकशतायुतैः आ
क्रांताभूरिभारेणब्रह्माणंशरणंययौ १६ गौर्भूत्वाश्रुमुखीखिन्नाक्रंदंतीकरुणंविभोः उप
स्थितांतिकेतस्मैव्यसनंसमवोचत १७ १०

नंश्रुत्वावैयासकिः श्रीशुकःविष्णुरातंपरीक्षितंभागवतेषुश्रेष्ठः १३ व्यवसिताकृतनिश्चयायद्यतोवा
हेः १४ तत्पादसलिलंगंगोदकं तत्रतावत्प्रथमंभगवदवतारकारणमाह १५ दृप्तनृपव्याजाये
दैत्याःतेषामनीकशतानामयुतैर्योभूरिभारःतेनाक्रांता १६ विभोरंतिकेउपस्थितासंव्यसनमवोचत १८

श्री० भा० द० स्वा० टी० १

वृषेणधर्मेणाआसमंतात् केसुखंपिबतिवृषाकपिः २० गांपौरुषींपुरुषस्यभगवतोगांवाचंमेमत्तः सावि
शेषविशेषविनेयंयथाभवतितथैवविधीयतांचेति २१ विख्यापनात् पुरैवपुंसाईश्वरेणज्वरः संतापोऽवधृ
तोनिश्चितः पूर्वमेव नत्वस्मत्प्रार्थनातोभूमावतरणेमहदुःखायेत्याह ईश्वराणांलोकपालादीनामपी

ब्रह्मातदुपधार्याथसहदेवैस्तयासह जगामसत्रिनयनस्तीरंक्षीरपयोनिधेः १९ तत्रगत्वा
जगन्नाथंदेवदेवंवृषाकपिं पुरुषंपुरुषसूक्तेनउपतस्थेसमाहितः २० गिरंसमाधौगगनेस
मीरितांनिशम्यवेधास्त्रिदशानुवाचह गांपौरुषींमेशृणुतामराःपुनर्विधीयतामाशुतथैव
माचिरं २१ पुरैवपुंसावधृतोधराज्वरोभवद्भिरंशैर्यदुषूपजन्यतां सयावदुर्व्याभरमीश्वरेश्वरः
स्वकालशक्त्याक्षपयंश्चरेद्भुवि २२ वसुदेवगृहेसाक्षाद्भगवान्पुरुषःपरः जनिष्यतेतत्प्रि
यार्थंसंभवंतुसुरस्त्रियः २३ वासुदेवकलानंतःसहस्रवदनःस्वराट् अग्रतोभवितादेवो
हरेःप्रियचिकीर्षया २४ विष्णोर्मायाभगवतीययासंमोहितंजगत् आदिष्टाप्रभुणांशेन
कार्यार्थेसंभविष्यति २५ ॥ ॥

श्वरः स्वस्वकृपकालस्वबलात् यावद्भूमिभारंक्षपयन् भगवांश्चरेत् २२ स्पष्टं २३ स्वेनात्मस्वरूपेणरा
जतइतिस्वराट् २४ देवकीगर्भसंकर्षणाययशोदागर्भेमोहनादिकार्यार्थेयशोदायासंभविष्यति २५ ॥ दश० ६

सहभोजैस्त्वन्यनागैरेवनागस्य मस्तावमाह शूरसेनइत्यादि यावदध्यायसमाप्तिः १६ मथुरायामावस
न् विषयान्देशान् २० सूर्ययानवोढयाप्रयाणेप्रयाणार्थं २१ रुक्मीनग्रहीत् ३० पारिबर्हमुपस्कारं

शुकउवाच इत्यादिशूरसेनमगणान्प्रजापतियतिर्विभुः समास्त्वास्यमहीमीर्भिः स्वधामपरमंययौ
१६ शूरसेनोयदुपतिर्मथुरामावसन्पुरीम् माथुरान्शूरसेनांश्चविषयान्बुभुजेपुरा १७ राजधा
नीततःसाभूत्सर्वयादवभूभुजां मथुराभगवान्यत्रनित्यंसन्निहितोहरिः १८ तस्यांतुकर्हिचि
च्छौरिर्वसुदेवःकृतोद्वहः देवक्यासूर्यया सार्धंप्रयाणेरथमारुहत् १९ उग्रसेनसुतःकंसःस्व
सुःप्रियचिकीर्षया रश्मीन्हयानांजग्राह रौक्मैरथशतैर्वृतः ३० चतुःशतंपारिबर्हंगजानांहे
ममालिनां अश्वानामयुतंसार्धं रथानांचत्रिषट्शतं ३१ दासीनांसुकुमारीणांद्वेशतेसमलं
कृते दुहित्रेदेवकःप्रादाद्याने दुहितृवत्सलः ३२ शङ्खतूर्यमृदङ्गाश्चनेदुर्दुन्दुभिभिःसमं प्र
याणप्रक्रमेतावद्वरवध्वोःसुमंगले ३३ पथिप्रग्रहिणंकंसमाभाष्याहाशरीरवाक् अस्यास्त्वा
मष्टमोगर्भोहन्तायांवहसेऽबुध ३४ इत्युक्तःसखलःपापोभोजानांकुलपांसनः भगिनींहन्तुमा
रब्धःखड्गपाणिःकचेग्रहीत् ३५

सार्धमयुतंपंचदशसहस्राणि अश्वानांत्रिषट् शतमष्टादशशतानिरथानांहेममालिनामितिसर्व.
रथयोर्न्वये ३१ प्रग्रहिणंरश्मिधृतंआभाष्यदेवकेसेतिसंबोध्यहंतनिषादिनि ३३ कुलपांसनःकुलदूष
णः आरब्धउद्युक्तः कचेकेशाग्रन्थे ३५

श्री॰ भा॰ द॰ पू॰ टी॰ ४

नृशंसं क्रूरं महाभाग इत्ययं भावः स्वजन्मनि हर्षेणादावेव देवानकदुन्दुभिघोषणात् भाविभगवदवतारेण शोकाप्रतीकारता संभवतीति सान्त्वयंस्तु घृणा कृपा विषयत्वोपपत्तिभिस्तु साममार्गेण संबोधयन् ३६ मरणभयेन हन्मीति चेत् तथापि मरणस्यापरिहरणीयत्वात् देहान्तरस्याप्यवश्यंभावित्वात् तत्रापि च भोगाश्रमादीनामविशेषात्तद्भयेन पापाचरणमयुक्तमित्यभिप्रायेणाह ३७ देहेन सहेति विधात्रा ललाटे लि

तं जुगुप्सितकर्माणं नृशंसं निरपत्रपं वसुदेवो महाभाग उवाच परिसान्त्वयन् ३६ वसुदेव उवाच
श्लाघनीयगुणः शूरैर्भवान्भोजयशस्करः सकथं भगिनीं हन्यात्स्त्रियमुद्वाहपर्वणि ३७ मृत्यु
र्जन्मवतां वीर देहेन सह जायते अद्य वाब्दशतान्ते वा मृत्युर्वै प्राणिनां ध्रुवः ३८ देहे पञ्चत्वमाप
न्ने देही कर्मानुगोऽवशः देहान्तरमनुप्राप्य प्राक्तनं त्यजते वपुः ३९ ॥ ॥

खितत्वात् इति तथापि कालविलम्बार्थं हन्मीति चेत् तत्राह अद्य वेति अवश्यंभाविनि मरणे विलम्बमात्राय पापाचरणमयुक्तमिति भावः किं चास्मिन्देहे गते यदि देहान्तरं न स्यात् तदा युज्यते पापेनापि तत्पालनं न तु तदस्तीत्याह ३८ देहे पञ्चत्वमापन्ने प्राप्ते सत्येव कर्मवशाद्ययं जन एवश्च मे देहान्तरं प्राप्य पूर्वं वपुः त्यजति यथा तृणजलौकाः व्रजन्निति ३९

रामः ६

पदेनाग्रतो निहितेन पदा निष्टब्धं भुवमवष्टभ्य पश्चादन्येन पूर्वप्रदेशादुत्थाय पुरो निहितेन पदा गच्छतीति
तद्वत् श्रवस्वीकारपरित्यागौ नात्यन्तभिन्नविषयाविति स्पष्टं दृष्टान्तरमाह यथा तृणजलौकेति सा
हि तृणान्तरमवष्टभ्य पूर्वं तृणं त्यजति एवं कर्मपथे वर्तमानोऽन्यो जीवोऽपि ॥ देहविषयावेव स्वीकार
परित्यागौ दर्शयितुं दृष्टान्तरमाह ॥ दृष्ट्वा राजादिदर्शनं स्मृत्वा मित्रादिश्रवणाभ्यामाहितसंस्का
रेण मनसा तदेवानुचिन्तयन् ईदृशं जाग्रद्दृष्टश्रुतमर्थं देहराजादिरूपं किमपि प्रतिरूपं पश्यति

व्रजेत्क्षिप्रं पदैकेन यथैवैकेन गच्छति यथा तृणजलौकैवं देही कर्मगतिं गतः ॥ स्वप्ने य
था पश्यति देहमीदृशं मनोरथेनाभिनिविष्टचेतनः दृष्टश्रुताभ्यां मनसानुचिन्तयन्प्रपद्य
ते तत्किमपि ह्यपस्मृतिः ॥

तार्णं तेषु चैतदेवाहमिति प्रपद्यते मन्यते तत्र जाग्रद्देहादपगतस्मृतिर्भवति पुरुषो यथैव निजाग्रत्येव
दृष्टान्तं दर्शयितुमाह मनोरथेनेति श्रवणादि दृष्टश्रुताभ्यामित्यादि योऽयं न भाववद्व्याति ततो वैकल्या
द्विदेहो मृत्युरत्यन्तविस्मृतिः जन्म त्वात्मतया पुंसः सर्वभावेन भूरिद विषयस्वीकृतिं प्राहुर्यथा स्वप्न
मनोरथौ स्वप्नमनोरथौ वेच्छन्त्याकृते न तस्मवत्यसावित्यादि तद्वदस्यापि कर्मवशाद्देहान्तरप्राप्यथाके
तेन्यजतीति ननु विचित्रदेहे देहेन तेनां कर्मणां कृतत्वात् देहविशेषप्राप्तौ किं कारणमत आह ॥

श्री·
भा·द·
पू·टी·
५

देहस्यपंचत्वसमयेपंचसुगुणेषुमायारचितेषु नानादेहरूपेणरचितेषुदैवेनफलाभिमुखेनकर्मणाचो
दितंप्रेरितंनानाविकारात्मकंमेनमयंदेहेतिर्यगादिरूपंप्रविशतियावति थावत्तमध्येयमापद्याभिनिवेशेनशामे
नचासौदेहीजायते ननुमनसःकर्मकर्तृत्वात्तदेवजायतांनत्वकर्तृत्वात्मेत्याह प्रपद्यमानइतितदेवाह(
मितिप्रपद्यमानः तेनसहजायतेइति ननुसत्यंभविष्यत्येवकिमपिदेहमात्रं नथाप्यस्यातिप्रियस्याप
त्मादेहस्यरक्षणाययाहत्यमपिक्रियतेइतिचेत्तत्राह ५२ । ज्योतिःचंद्रादिरुदकयुक्तेषुपार्थिवेषुघटा

यतोयतोधावतिदैवचोदितंमनोविकारात्मकमापपंचसु गुणेषुमायारचितेषुदेह्यसौप्र
पद्यमानःसहतेनजायते ५२ ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतंविभाव्यते ए
वंस्वमायारचितेष्वसौगुणेषुरागानुगतोविमुह्यति ५३

दिषुयद्वाउदकेषुपार्थिवेषुतैलघृतादिषुवर्तमानंबिंबंतत्स्थितंसमीरस्यवायोर्वेगमनुगतंकंपादियुक्तंय
था एवंस्वाविद्यारचितेषुगुणेषुदेहेषुअसौरागेणानुगतः प्रविष्टोमुह्यति अभिनिवेशमाप्नोति अयंभा
वः आत्मनस्तावद्देहाद्यध्यासात् जन्मादिकंसहतेनजायते इतितत्रस्यान्यधर्माध्यासाद्यथादेह
धर्माः कार्श्यादयश्चात्मनिप्रतीयंते एवमात्मधर्माःप्रेमास्पदत्वादयोपिदेहादिष्विति न तत्कृतो देह
योर्विशेषाभावात् यथाशून्यशनीकाराइति ५३ ॥ ॥ ॥

पू·न·
५

एवं मुक्तं मामोपायमुपसंहरन्नेदमाह मत्तयाविधोदेहीकस्य विज्ञोहं नापेरन् अतइतिश्रभिद्युत्साभानान्तमंवं
धिनश्चय मातपिइहामुत्रचभयमितिभेदोदर्शिनः ४६ पुनः सामेवाह पुत्रिकोयमादारुमयीवाचेतनावा ४५
बोध्यमानउपदिश्यमानः स्वयंदारुणः पुनः उरुषादान्देयानन्वब्रतः अनुसरनइति ४८ अानुकरेड्भिरि

तस्मात्तकस्यविज्ञोहमावेत्स्तनयाविधः आत्मनः देममविच्छन्दोगधुवैपरतोभयं ४४ एषातवा
नुजवालाकृपणापुत्रिकोपमा हंतेमाहंसिकल्याणीमिमांनंदीनवत्सलः ४५ शुकउवाच एवं
समादिभिर्भेदैः बोध्यमानापिदारुणः तन्यवर्ततकौरव्यपुरुषादानन्वब्रतः ४८ निर्वेधतस्यतो
तावाविविंयानकंदैडभिः आसकालेपतिस्याहुमिदंतवामपद्यत ४७ मृस्तबुंद्धिमतापात्योयवतु
हिवलोदयं पद्यमानंनिवर्ततनापराधोस्ति देहिनः ४८ अदायमृत्युवेद्यानमोवयेकृपणामिमां
तत्तामयदिजायेरन्मृतवानम्रियेतवेत् ४५

तियदं महाभागाइत्यशेकाभिप्रायं अनिधोहुपतिकर्तेमिमर्थः इदंवस्तमाणपद्यार्थेणमरणमन्वपद्यतस्तात
वान् ४० नवलोयमेननत्मन्यनेइत्याशंक्याह अनुदिनिनसादोषपरिहाराय एवंकरिष्यामीत्याह अदायघ्
तवेइति मृत्यवेक्कसाय ननुदुरमपिनैवन्यायमित्याशंक्याहतनाइति अत्रोयदि मेस्तनाजायेरन्नदाय
जाविनइवनजीवितेनाबुद्वेदेवनदेनरायथयमेवम्रियेनतदानकिंचिदन्यायम् ४५

श्रीः
भा॰ टी॰
द॰ टी
६

यदिवासुतानभविष्यंतिनवायंम्रियेतमनुष्यइत्येवमस्यमरणमितिविपर्ययोवाकिंनस्यात् ननुप्रौढस्यैकंमस्यनववा
लकात्कथंमृत्युःस्यादित्यतआहगतिरितिधातुः अस्याःवाममष्टमोगर्भोहन्तेत्युक्तवतः अतइदानीमपमार्येसाप्रती
तैवमेवः नचामतिउपस्थितोमृत्युरयंनिवर्तेततावन्निवृत्तःपुनःकालान्तरेणापतेदेव नापराधोममेत्यर्थः
अथवामनुष्याउपस्थितोमृत्युः अस्यावधान्निवर्तेतपुनरनेनमरणंभवेदितियद्गतिर्धातुरीश्वरस्ययेनस्यप्र
वडुपस्थितइति ५० मार्गितोअप्रदृष्टैर्वितर्कैमितिसदृष्टान्तमाहअग्नेरिति ५१ वनेषुज्वालानलदहनवह्निः स

विपर्ययोवाकिंनस्याद्गतिर्धातुर्दुरत्यया उपस्थितोनिवर्तेतनिवृत्तःपुनरापतेत् ५० अग्नेर्यथादा
रुवियोगयोगयोरदृष्टतोन्यन्ननिमित्तमस्ति एवंहिजन्तोरपिदुर्विभाव्यः शरीरसंयोगवियोगहे
तुः ५१ एवंविमृश्यतंपापंयावदात्मनिदर्शनं पूजयामासवैशौरिर्बहुमानपुरस्सरं ५२ विक
सद्वदनाम्भोजोनृशंसंनिरपत्रपं मनसादूयमानेनप्रहसन्निदमब्रवीत् ५३ वसुदेवउवाच नह्या
स्यास्तेभयंसौम्ययद्वैसाहाशरीरवाक् पुत्रान्समर्पयिष्येस्यायतस्तेभयमागतं ५४

सन्निहितानपिदहत्यन्यत्कदाचिद्विदूरस्थानपिदहतिग्रामेगृहान्वानस्पृशत्यदृष्टव्यतिरेकेणनकिंचिन्नियम
कमस्तियथा एवंजन्तोर्जन्ममरणयोरपिहेतुर्दुर्विभाव्योविमः ५१ यावदात्मनिदर्शनंस्वमनसावधिविचार्य
५२ तस्यविम्ब्वामायाविकसितवदनाम्भोजः प्रहसन्नब्रवीत् ५३ यद्यप्यस्याःशरीरिणीवागाहतथापिनैवास्याः
सकाशात्तेभयंनास्तियतोयेभ्यःपुत्रेभ्यः तेभयमुत्पन्नमष्टमोहन्तेत्युक्तेः अन्योन्यापेक्षयासर्वेष्वष्टमाभावेपुरि
ति ततःउत्पन्नान्समर्पयिष्ये ५४

६

निवर्त्तनेन निवृत्तः तद्वाक्ये सादर उपपन्नितद्दिव ॥५५॥ प्रसूतिकाले प्राप्ते सर्वात्मा भगवानेव देवता यस्याः सा तथा सर्वदेवतामयीति वा भगवद्धारणयोग्यत्वात् ॥५६॥ कृच्छ्रेणैकं कथमस्मिन् दत्तवानित्यपेक्षायामाह ॥५७॥ साधूनां सा
त्यसंधानां दुःसहं लालनमसत्यं वा उपेक्षितं कथं भुंक्ते इति अत आह विदुषामिति भगवानेव तत्त्वं नान्यदिति जानतामित्य

शुक उवाच सुहृद्भिरित्थं विश्वस्तेन कंसः तद्वाक्यमादृतवान् वसुदेवोऽपि तं प्रीतः प्रशस्य प्राविशद्गृहं ॥५५॥ अथ काले उपावृत्ते देवकी सर्वदेवता पुत्रान् प्रसुषुवे चाष्टौ कन्यां चैवानुवत्सरं ॥५६॥ कीर्तिमन्तं प्रथमजं कंसायानकदुंदुभिः अर्पयामास कृच्छ्रेण सोऽनृतादतिविह्वलः ॥५७॥ किं दुःसहं नु साधूनां विदुषां किमपेक्षितं किमकार्यं कदर्याणां दुस्त्यजं किं धृतात्मनां ॥५८॥ दृष्ट्वा समत्वं तच्छौरेः सत्ये चैव व्यवस्थितिं कंसस्तुष्टमना राजन् प्रहसन्निदमब्रवीत् ॥५९॥ कंस उवाच प्रतियातु कुमारोऽयं न ह्यस्मादस्ति मे भयं अष्टमाद्युवयोर्गर्भान्मृत्युर्मे विहितः किल ॥६०॥ तथेति सुतमादाय ययावानकदुंदुभिः नाभ्यनंदत तद्वाक्यमसतोऽविजितात्मनः ॥६१॥ नंदाद्या ये व्रजे गोपा याश्चामीषां च योषितः वृष्णयो वसुदेवाद्या देवक्याद्या यदुस्त्रियः ॥६२॥

र्थः ननु स्वयं नीतं कंसो बालेन हन्यादिति न जानीतवान् नीति किं न स्यात् इति तत्राह किमकार्यमिति ननु देवकीपुत्रं कथं त्यजेत् तत्राह दुस्त्यजमिति चित्तं धृतं यस्मात्तमाह धीरैः तेषां ॥५८॥ कंसस्य स्वप्नेऽपि देवकार्यानुग्रणानुभवतीति नारदस्य प्रयत्नं दर्शयन्नाह नंदाद्या इति त्रिभिः ॥६२॥

श्रीः
भा॰ द॰
पू॰ टी॰
७

उभयोर्वसुदेवनंदकुलयोः ६३ वधोद्यमं दैवकृत मितिशोचः ६४ निगडैः शृंखलैः प्रजनो विष्णुः नरखंशं
कथा ६६ इतिश्रीभावार्थदीपिकायांदशमस्कंधेप्रथमोध्यायः १ द्वितीयेकंसभयात्तानाथदेवक्यागर्भगो

सर्वैर्वैदेवनम्रप्राया उभयोरपिभारत ज्ञातयोबंधुसुहृदो येचकंसमनुव्रताः ६३ गतेयथवसु
देवेनदेवकार्यार्थमुद्यतः एतत्कंसायभगवान्नारदोभ्येत्यनावदत्: भूमेर्भारायमाणानांदैत्या
नांचवधोद्यमं ६४ ऋषेर्विनिर्गमेकंसोयदून्मत्वासुरानिति देवक्यागर्भसंभूतंविष्णुंचस्ववधं
प्रति ६५ देवकींवसुदेवंचनिगृह्यनिगडैर्गृहे जातंजातमहन्पुत्रंतयोरजनशंकया ६६ मातरं
पितरंभ्रातृन्सर्वांश्चसुहृदस्तथा घ्नंतिह्यसुतृपोलुब्धाराजानःप्रायशोभुवि ६७ आत्मानमि
हसंजातंजानन्प्राग्विष्णुनाहतं महासुरंकालनेमिंयदुभिःसविरुध्यत ६८ उग्रसेनंचपितरंय
दुभोजांधकाधिपं स्वयंनिगृह्यबुभुजेशूरसेनान्महाबलः ६९ इतिश्रीभागवतेदशमस्कंधेप्र
थमोध्यायः १ शुकउवाच प्रलंबबकचाणूरतृणावर्तमहाशनैः मुष्टिकारिष्टद्विविदपू
तनाकेशिधेनुकैः १ अन्यैश्चासुरभूपालैर्बाणभौमादिभिर्युतः यदूनांकदनंचक्रेबलीमाग
धसंश्रयः २ ॥

हरिः ब्रह्मादिभिःस्तुतःसांत्वयामासेतितन्निरूप्यते यदुभिःसविरुध्यतेत्युक्तंतमेवविरोधंप्रपंचयति बलया
देवकीगर्भस्यासुरसंचारेणभगवतः प्रवेशंवक्तुं प्रलंबेत्यादिसार्धद्वयेन महाशनोमहासुरः द्विविदो
जरासंधः २ ॥

७

अनुरुन्धाना अनुवर्तमानाः ४ धाम कलानन्तः शेषः सप्तमो गर्भो बभूव किं तद्धाम यमनन्तं प्रचक्षते यमनन्तमिति हर्षशो
कविवर्धनः आनन्दरूपस्यावतीर्णत्वाद्धर्षः पूर्ववद्गर्भसाधारण्याद्‌ भ्रान्त्या शोक इति ५ समादिशदाज्ञापितवा
न् ६ नन्दगोकुले किमित्यास्ते तत्राह ७ न केवलं सैवान्या अपि इति विवरेषु गुप्तस्थलेषु ८ देवक्या
जठरे संस्थितं तत्संनिकृष्यमाणः कथं जीवेदित्यत आह मामकं धामेति तत्त्वतः ९ किमर्थमेवं कार्यमित्यत
आह अथानन्तरमेवेत्यर्थः अंशभागेनेति अंशः प्राकृतिभिर्भजनीयानि सर्वाणि तस्माच्च सम्भवयोगान्ता

नेपीडिता निविविशुः कुरुपांचालकेकयान् शाल्वान्विदर्भान्निषधान्विदेहान्कोसलानपि ३ ॥
२ एके तमनुरुन्धाना ज्ञातयः पर्युपासते मथुरायां स्थिता ये वै वयं कृष्ण नाविस्पृशनि ४ हतेषु ष
ट्सु बालेषु देवक्या औग्रसेनिना सप्तमो वैष्णवं धाम यमनन्तं प्रचक्षते गर्भो बभूव देवक्या हर्षशोक
विवर्धनः ५ भगवानपि विश्वात्मा विदित्वा कंसजं भयं यदूनां निजनाथानां योगमायां समादि
शत् ६ गच्छ देवि व्रजं भद्रे गोपगोभिरलंकृतं रोहिणी वसुदेवस्य भार्यास्ते नन्दगोकुले ७ अ
न्याश्च कंससंविग्ना विवरेषु वसन्ति हि देवक्या जठरे गर्भं शेषाख्यं धाम मामकं तत्संनिकृष्य रो ८
हिण्या उदरे संनिवेशय ९ अथाहमंशभागेन देवक्याः पुत्रतां शुभे प्राप्स्यामि त्वं यशोदायां

नितिअंशभागः तेन परिपूर्णरूपेणेत्यर्थः यद्वा अंशेन ज्ञानेश्वर्यकलाभिर्विभजनानि सेवानि इति न
याने इति यद्वा अंशेन गुरुप्रतिरूपेण मायया भागो भजनं ईक्षणं यस्य तेन यद्वा अंशेन मायया गुणावता
रादिरूपा भागा भेदा यस्य तेन यद्वा अंशाः प्राणा एव मत्स्यकूर्मादिरूपा भजनीयाः तत्तत्साक्षात्स्वरूपं यस्य तेन
यद्वा अंशेन गोपालादिभिर्भजनं मनोऽनन्तं भक्तिर्यस्य तेन सर्वथा परिपूर्णरूपो जनिविवादिने हंसस्व भ
गवानयं यस्मिन् अन्वयादितिं अंशेनेत्याह यतिनेयं प्राप्स्यामीति सार्धवचनद्वयेन १०॥ ॥

सर्वान्नृद्धादीन्कामयतेयेनतेषांवराणांश्रेष्ठानांनियंत्री अर्चकानांसर्वान्कामवरान्प्रददातियातां ११ त्व
द्विक्रमेणावतस्यव्यपदेशमाभवतीत्याह १२ गर्भसंकर्षणादित्यादिनात्वयासंकृष्टेनगर्भेतिसंकर्षणे ना

अर्चिष्यंतिमनुष्यास्त्वांसर्वकामवरेश्वरीम् धूपोपहारबलिभिःसर्वकामवरप्रदां ११ नामधे
यानिकुर्वंतिस्थानानिचनराभुवि [रामेतिलोकरमणाद्बलभद्रंबलोच्छ्रयात्] । दुर्गेतिभद्रका
लीतिविजयावैष्णवीतिच १२ कुमुदाचंडिकाकृष्णामाधवीकन्यकेतिच मायानारायणीशाणा
शारदेत्यंबिकेतिच १३ गर्भसंकर्षणात्तंवैप्राहुःसंकर्षणंभुवि रामेतिलोकरमणाद्बलभद्रं
बलोच्छ्रयात् १४ संदिष्टैवंभगवतातथेत्योमितितद्वचः प्रतिगृह्यपरिक्रम्यगांगतातत्तथा
करोत् १५ गर्भेप्रणीतेदेवक्यारोहिणींदेवमायया अहोविस्रंसितोगर्भइतिपौराविचुक्रु।
शुः १६ भगवानपिविश्वात्माभक्तानामभयंकरः आविवेशांशभागेनमनआनकदुंदुभेः १७
ससात्त्वाद्भगवान्विश्वमूर्तिर्वोभायापन्नये सबिभ्रत्पौरुषंधामभ्राजमानोयथारविः दुरासदोति
दुर्धर्षोभूतानांसंबभूवह १८

मेतिसंबोधनंकरिष्यंति लोकस्यरमणाद्रम्यसादनात् १४ तथेतिपुनरपिओमित्यादरेणप्रतिगृह्यगांपृ
थ्वींगतागमनीत तथैवाकरोत् १५ विस्रंसितोविस्रस्तःस्रवदर्थइतिविचुक्रुशुः नतुतद्विदर्शिसद्भैः १६ मन।
आविवेशमनस्याविर्बभूव १७ धाममूर्तिः १८

जगतो मूर्तिमत्तं मंगलं अच्युतांशं अच्युतिरहिता अंशा अपेक्षया यदयो यस्मात् यद्वा अच्युतस्यैवांशो भक्तानामनुग्र
हाय परिच्छिन्नवपुरित्यर्थः समाहितं सम्यग्भूतमिवाहितं वेददीक्षयार्पितं देवी द्योतमाना शुद्धसत्वेत्यर्थः
सर्वात्मकं सर्वस्यात्मानं अत एवात्मभूतं स्वस्मिन्नादावेव सन्तं मनस्तो मनस एव दधार यथा वारुण्या धृतवती प्र
शान्तरूपं दृष्टान्तमाह कथा काष्ठा प्राचीदिक् आनंदकरं चंद्रं १९ सर्वजगन्निवासस्यापि निवासभूता सत्यपि सुत
रां नितरां जना हृद्रक्तत्वया न रेजे किं तु स्वयमेवाविरभवत् यतः कंसस्य गेहे रुद्धा अग्नेर्नेद शिखेव यथा दि

ततो जगन्मंगलमच्युतांशं समाहितं शूरसुतेन देवी दधार सर्वात्मकमात्मभूतं काष्ठा यथानं
दकरं मनस्तः १९ सा देवकी सर्वजगन्निवासनिवासभूता नितरां न रेजे भोजेन्द्रगेहेग्निशि
खेव रुद्धा सरस्वती ज्ञानखले यथा सती २० तां वीक्ष्य कंसः प्रभयाजितान्तरां विरोचयन्तीं भवनं
शुचिस्मितां आहैष मे प्राणहरो हरिर्गुहां ध्रुवं श्रितो यन्न पुरेयमीदृशी २१ किमद्य तस्मि
न्करणीयमाशु मे यदर्थतन्त्रो न विहन्ति विक्रमं स्त्रियः स्वसुर्गुरुमत्या वधोयं यशः श्रियं हन्त्य
नुकालमायुः २२

पुरुद्धाग्निशिखा दीपवत् यथा सती शोभमाना सरस्वती ज्ञानखले ज्ञानवंचके रुद्धा यथा एषामनुपका
रित्वेन राजते तद्वत् २० प्रभया भवनं विरोचयन्तीं अजितो विष्णुः अन्तर्मध्ये यस्याः तां एवं विरोचमानां
ध्रुवं हरिर्विरोचयतः यस्मात् ईदृशी पूर्वं नासीत् २१ मे मया किं करणीयं ननु सन्ति सामादय उपाया ने
त्याशयेनाह अर्थमर्थतन्त्रो देवकार्यप्रधानो विक्रमेन विहन्तीति महतीषु परिक्रमं करिष्यन्तेत्यर्थः
यद्वा न हि इदानीमेव हन्तास्मीति विचिन्त्याह अर्थतन्त्रोपि पुमान् विक्रमेन विहन्ति तन्नाशयति स्त्रीवधे
तत्राप्यः [?] स्यादिति भावः तदेवाह स्त्रिय इति गुरुमत्या गर्भिण्याः २२

किंच स जीवन्नपि मृतः स्यात् नृशंसितेन क्रौर्येण यो वर्तते तं जीवंतमेव मनुजाः शपंति दुर्वाक्यैर्वदंति।
न केवलमेतावत् स च देहे मृते तनुमानिनः पापिनो नरकं गच्छति अथवा चापरप्रकारमेवाह तनुमानि
नोऽस्य देहे मृते ध्रुवमेवांधं तमो गमिष्यतीति २३ संविशन् शयानः २५ प्रतीक्षंस्तज्जन्मेति द्रष्टा सत्यत्वे
नैव तत्र घमेस्तत्वंति सत्यव्रतमिति सत्यव्रते संकल्पो यस्य तं यथा सत्यपरं सत्यं श्रेष्ठं प्राप्तिसाधनं यस्मिंस्तं।
त्रिसत्यं त्रिषु लोकेषु सृष्टेः पूर्वं प्रलयानंतरं च स्थितिसमये च सत्यं अव्यभिचारेण वर्तमानं तदेवाह सत्यस्य
योनिमिति सच्छब्देन पृथिव्यप्तेजांसि त्यच्छब्देन वाय्वाकाशौ सत् च त्यत् च तत्सत्यं भूतपंचकं तत् सत्य

सएष जीवन् खलु संपरेतो वर्तेत यो ह्यत्र नृशंसितेन देहे मृते तं मनुजाः शपंति गंता तमोऽधं त
नुमानिनो ध्रुवं २२ इति घोरतमाद्भावात् संनिवृत्तः स्वयं प्रभुः आस्ते प्रतीक्षंस्तज्जन्म हरेर्वैरानु
बंधकृत् २४ आसीनः संविशंस्तिष्ठन् भुंजानः पर्यटन् पिबन् चिंतयानो हृषीकेशमपश्यत्तन्म
यं जगत् २५ ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः देवैः सानुचरैः साकं गीर्भिर्वृषणमै
डयन् २८ देवा ऊचुः सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये सत्यस्य सत्यमृतसत्यने
त्रं सत्यात्मकं त्वां शरणं प्रपन्नाः २० ॥

मिथ्यात्वदत्तेन इति श्रुतेः तस्य योनिं कारणं श्रुतेन भूतपंचकात् पूर्वं वर्तमानत्वात् तथा सत्ये तस्मिन्नेव नि
हितं स्थितं अंतर्यामितया स्थितं श्रुतेन स्थितिसमयेऽपि सत्यमुक्तं तथा सत्यस्य सत्यं तत्सत्यस्य सत्यं पारमार्थि
कं नामरूपात्मकविश्वमायामारूपं प्रलये पृथिव्यादिभिः तस्य दर्शनं एवं त्रिसत्यत्वमुपपाद्य तथा ऋतसत्यने
त्रे ऋतं सूनृतवाणी सत्यं च समदर्शनं तथा भगवता व्याख्यास्यमानत्वात् सत्यं च समदर्शनं ऋतं
च सूनृता वाणी कविभिः परिकीर्तितेति तत्रयोः नेत्रं नयनं साधनं प्रवर्तकमिति यावत् एवं सर्वप्रकारे
ण सत्यात्मकं त्वा भगवन् वयं शरणं प्रपन्नाः स्मः २० ॥ ॥ ॥

राम

ननुभवंतोपिलोकेश्रूयमाणत्वात्यवलोकादिरूपंचदेवंसर्वंवद्व्यतिरेकेणनिरूपयंति अतोऽसौप्रपंचस्यादिवृक्षत्वेनरू
श्रुतेरुनिरूढः ममछिद्यहृदेहश्चमः कथंभूतः एकायनः एकाप्रकृतिरयनमाश्रयोयस्यसः द्वेसुखदुःखे
फलेयस्यसः धर्मार्थकाममोक्षाः चत्वारोरसायस्यसः पंचज्ञानेंद्रियाणिविधाज्ञानप्रकारायस्यसः षडूर्मयःशो
णावाआत्मानःस्वभावोयस्यसः दशप्राणादयःछदाःपत्राणिविद्यंतेयस्यसः नवद्वाराण्यक्षच्छिद्राणि
यस्यसः दशप्राणादयःछदाःपत्राणिविद्यंतेयस्यसः दशछदीद्वौजीवेश्वरौयस्मिन्सद्विखगः २८ एवंच

एकायनोसौद्विफलस्त्रिमूलः चतूरसः पंचविधः षडात्मा सप्तत्वगष्टविटपोनवाक्षोदशच्छ
दीद्विखगोह्यादिवृक्षः त्वमेकएवास्यसतःप्रसूतिः त्वंसन्निधानंत्वमनुग्रहश्च त्वन्माययासंवृ
तचेतसस्त्वांपश्यंतिनानानविपश्चितोये २९

प्रपंचसंसारवृक्षस्यसतःकार्यस्यत्वमेकएवप्रसूतिः त्वमेवसात्मकारणंकार्यमिदमित्यर्थः त्वंसन्निधानंसम्य
क्निधीयतेऽस्मिन्नितिसन्निधानंलयस्थानंत्वमेवानुग्रहःस्यःअनुगृह्णातीतिपालकइत्यर्थः ननुब्रह्मविष्णुरुद्रा
एवंभूताःप्रसिद्धाःकथमहमितिचेत्तत्राहुः त्वन्माययेति तवमाययासंवृतंपिहितंचेतः ज्ञानंयेषांतेत्वा
मेवनानापश्यंति येविपश्चितोविद्वांसःतेनत्वानपश्यंति २९

श्री:
भा० द०
टी०
१०

ननुदेवकीपुत्रं मां कथमेवं वर्णयथेति तत्राहुः अवबोधैक आत्मा स्वरूपं यस्य स त्वं रूपाणि मूर्तीर्बिभर्षि धत्से न त्वं कस्या
पि पुत्र इत्यर्थः क्षेमाय पालनाय सतां धर्मवर्तिनां सत्त्वकारीणि खलानामभद्राणि नाशकानि न केवलं मे
भावना भक्तानां मोक्षार्थमपीत्याहुः ३० त्वयीति समाधिनावेशितचेतसा नित्यमेके तेन त्वत्पादपोतेन नाश्रितेन
पूर्वमुख्यैर्विवेकिनः महद्भिः कृतेन संपादितेन यद्वाद्यदमपि मायामयमित्यनादरेण परिहाराय इद
मेव महत्सु कृतं स्थापितमिति मनसि कृतेन बहुमतेनेत्यर्थः भवाब्धिं तु कुर्वन्ति अनायासेनैव भजनामात्रेणेत्यर्थ

बिभर्षि रूपाण्यवबोध आत्मा क्षेमाय लोकस्य चराचरस्य सत्त्वोपपन्नानि सुखावहानि सतामभद्रा
णि मुहुः खलानाम् ३० त्वय्यम्बुजाक्षाखिलसत्त्वधाम्नि समाधिनावेशितचेतसैके त्वत्पादपो
तेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिम् ३१ स्वयं समुत्तीर्य सुदुस्तरं द्युमन् भवार्णवं भीममदभ्र
सौहृदाः भवत्पदाम्भोरुहनावमत्र ते निधाय याताः सदनुग्रहो भवान् ३२

तेषां मुक्तिरित्यर्थः ३१ ननु ये नेन वर्त्मैव पारं गतास्तर्हि इदानीं तन्नौका का गतिः तत्राहुः स्वयमर्थः हे द्युमन्
स्वप्रकाश त्वत्पादपोतेन सामीप्यमात्रेण भवाम्बुधौ वत्सपदमात्रे जाते तथाप्यन्येषामेव दुस्तरमेव तेषामीकं चः
स्तरमपि भवार्णवं समुत्तीर्य भवत्पादाम्भोरुहरूपां नावमत्रैव निधाय भक्तिमार्गं संप्रदायं प्रवर्तयन्त्यर्थः याताः
ततः किमत आह अदभ्रसौहृदाः सर्वभूतेषु अतिप्रीतियुक्ताः अतः तेषां तरणाय निधायेति कथं स्वस्यापि दास्ये
वमायेणतीर्णाः अतः उक्तं भवान् सदनुग्रहः सतो भक्तान् अनुगृह्णातीति ३२ ॥ १०

विवेकिनां महत्त्वमनेन किं मुक्ता एव हि ते न तत्राहुः विमुक्ता वयमिति मन्यमानाः त्वय्यस्तो निरस्तो: तत्पदाश्र-
यो भावस्तस्मात् भक्त्यभावादित्यर्थः नविशुद्धा बुद्धिर्येषां ते तथा यद्वा नत्वप्रलभा इति छेदः अस्तभस्र-
स्तमनयः वा हेतुविशुद्धबुद्धयः कृच्छ्रेणेत्याहकृच्छ्रेणा बहुजन्मतपसा परं पदं मोक्षसन्निहितं सत्त्वं तत्तपःकृत्वादिभिः
प्राप्य अधः पतंतीति विघ्नैरभिभूयंते न आदृतौ युष्मदंघ्री तैस्तदीयास्तु न कदाचित्पतंतीत्याहुः ३२ विनायकावि-
घ्नहेतवः तेषामनीकानि सैन्यानि तेषां पान् नानि पातीति तेषां मूर्धसु विचरंति परिहारेण नयंतीत्यर्थः सत्त्वरजस्तमोवहानि

येन्येरविंदाक्षविमुक्तमानिनः त्वय्यस्तभावादविशुद्धबुद्धयः आरुह्य कृच्छ्रेण परं पदं ततः पतंत्य-
धोनादृतयुष्मदंघ्रयः ३३ तथा न ते माधव तावकाः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्धसौहृदाः त्वयाभिगु-
प्ता विचरंति निर्भया विनायकानीकपमूर्धसु प्रभो ३४ सत्त्वं विशुद्धं श्रयते भवान्स्थितौ शरीरिणां
श्रेय उपायनं वपुः वेदक्रियायोगतपःसमाधिभिः तवार्हणं येन जनः समीहते ३५ ॥ ॥

रूपाणि धारयसीत्युक्तं बिभर्षि रूपाणीति तत्केन प्रकारेण सत्त्वावहत्वमित्यपेक्षायामाहुः अथ सत्त्वं व-
पुः श्रयते भवानित्यन्वयः श्रेयउपायनं कर्मफलदातृ कथं येन वपुषा जनः तवार्हणं पूजां समीहते करोति कैः
वेदश्च क्रियायोगश्च तपश्च समाधिश्च तैः वेदत्रयमयधर्मेणेत्यर्थः वपुषो श्रयणे अर्हणसंभवात्कर्मफलसंभ-
वसिद्धिः स्यादिति ३५ ॥ ॥ ॥

श्रीः
भा·द·
प्र·टी·
२२

तथ्यं तु ज्ञातेत्यादिना श्लोकद्वयेन भगवद्भक्तानामेव मोक्षो नान्येषामित्युक्तं तत्र कर्मफलं भक्तिं विना माभूत्
मोक्षस्य तत्त्वज्ञानैकसाध्यत्वात्किं भक्त्येति मानुशयान्स्वस्माहुः सत्त्वं न चेदिति हे धातरिदं सत्त्वं निजं तव वपुर्न चेद्भ
वेत् तर्हि विज्ञानं विशिष्टं स्वरूपबोधस्तज्ज्ञानं न भवेदित्यन्वयः कथंभूतं अज्ञानभिदापमार्जनं अज्ञानं तत्कृता
भिदा च तयोरपमार्जनं निवर्तकं यद्वा अज्ञानेन भिन्नं तीति अज्ञानाभिदां ज्ञानेन मार्जनं शोधनं यस्मात्तदेवेति ननु त
र्हि नां बुद्ध्यादीनां यतः प्रकाशः तद्विज्ञानं भवेदेव गुणप्रकाशैः गुणावच्छिन्नैः प्रकाशैर्भवान् सर्वसाक्षी
स्वरूपः केवलमनुमीयते न कल्प्यते न तु साक्षात् क्रियत इत्यर्थः अनुमानप्रकारमाह प्रकाशते यस्य च येन वा

सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनं गुणप्रकाशैरनुमीयते भवान्प्रकाशते
यस्य च येन वा गुणः ३५ न नामरूपे गुणजन्मकर्मभिर्निरूपितव्ये तव तस्य साक्षिणः मनो
वचोभ्यामनुमेयवर्त्मनो देव क्रियायां प्रतियन्त्यथापि हि ३६

गुण इति यस्य संबंधी अयं बुद्ध्यादिर्गुणः प्रकाशते यो गुणसाक्षीत्येवं येन वा बुद्ध्यादिष्टेण श्रमाद्याबाह्यो
गुणः प्रकाशतीत्यनुमीयत इत्यर्थः शुद्धसत्त्वं वपुषि वर्त्यमानेन तदाकारैरंतःकरणसत्त्वस्य सादेन
वस्तु साक्षात्कारो भवेदिति भावः ३५ एवं तावद्भक्तानामभ्युदयापवर्गौ प्रोक्तरूपाणि विमर्शीत्युक्तं तान्यपि भज
नीयानि केवलेन तेजसा तेशक्यानि श्रवणमात्रत्तर्कवात् वेति मनोवचसां गोचरत्वादित्याहुः न नामरूपे इति
गुणजन्मानि कर्माणि वा ते निरूपयितव्ये निरूपणार्हे न भवतः कुतः अनुमेयवर्त्मनो मार्गो यस्य तव तथापि
हेतुः तस्य साक्षिण इति न हि साक्षिणस्तत्त्वं मनोवचोगोचरमित्यर्थः हे देव बहुधापि नामान्यप्यपि क्रिया
यासूपासनादिकायां प्रति यांत्युपासकाः साक्षात्स्वरूपं निहि यमिदं ३६

तस्मात्तमेवैवमोदतस्तमुपसंहरति श्रावन्निति श्रुत्वानपि संस्मरयन्तु क्रियात्सदेवार्चनादिकर्मस्त ३७ वि
शेषतः श्रीकृष्णावतारममितेदानीदिश्याभइंतवपदःपरश्नायाः ईश्वरस्पतवजन्ममात्रेणापनीतपवलस
टैकैः कोमलैः पदैः सुशोभनैः वज्राङ्कुशादिशुभलक्षणैः मोक्षष्ठीघ्रादिवंचनवत्वयात्मकपितं ३८ तव
जन्मनाभारोपनीतइस्तुतस्मा ममापिजीववत्संसारदुःखोनहिनहोस्याद्दुःखतेइतिवृत्तहेइशश्रसंसारिणाते
जन्मनः कारणेविनोदंक्रीडांविनानतर्कयामः किंचहेश्रमयाश्रयनमयमाश्रयतेरनितथासंबोधनेहेनि

श्रावन्तुशरणात्संस्मरयंश्च चिंतयन्नामानित्र्यपाणिचमंगलानिते क्रियात्सयस्त्वश्चरणारविं
दयोराविष्टचित्तोनभवायकल्पते ३८ दिष्ट्याद्यहेरस्माभवतःपदोभुवाभारोपनीतः त्वज्जन्म
नेशितुः दिष्ट्याकितोनलपदकैः सुशोभनैर्इद्यामगांधांचतत्वान्तकपितं ३९ नतेभवस्येश
भवस्यकारणंविनाविनोदंवततर्कयामहे भवोनिरोधःस्थितिरप्यविद्ययाकृतायतस्त्वय्यभ
याश्रयात्मनि ४० मत्स्याश्वकच्छपवराहनृसिंहहंसराजन्यविप्रविबुधेषुकृतावताराः त्वंपा
सिनः त्रिभुवनंचवनथाधुनेशभारंभुवोहरयदूत्तमवंदनंते ४१

त्स्युक्तेत्यर्थः तवजन्मकारणंनोस्तीति किंवजनेयनोजीवानामपिमत्स्यादयः त्वयिविषयेयाश्रविद्यातया
कृताः नपरमार्थतः संति ४० प्रसक्तंप्रार्थयंते मत्स्याद्युक्तिनोस्मात्तृत्रिभुवनंच श्रसंवयथासिनयाधा
हीनिवंदनंतेइतिवदंतः सर्वेशिरोभिः प्रणमंति
४१ ॥

श्रीः
भा·द·
प्र·टी·
१२

देवकीप्रत्याहुः दिष्ट्येति नोस्माकंभवायोद्भवाय साक्षात्त्वत्पुमांस्तेकुक्षिंगतः अतोभयंमाभूदिति अ
तस्यामपिचेत् कुक्षिंहृदयंगतोहरिर्भवतितेनांगभयंनभवतिकिंनस्तव ४१ यत्तद्रूपमनिदंनसर्वथा
तीकृतंयथायथावत् अस्मात्वेवधिनाएनाविर्हस्यासेतेइतिमन्यमानाब्रह्मेशानौपुरोधायपुरस्कृ
त्यययुरिति ४२ २ श्री भा टी कायां श स्कं द्वितीयोध्यायः २ तृतीयेनिजरूपेणसम्भूत

दिष्ट्यांबतेकुक्षिगतःपरःपुमानंशेनसाक्षाद्भगवान्भवायनः माभूद्भयंभोजपतेर्मुमूर्षोर्गो
प्तायदूनांभवितातवात्मजः ४१ शुकउवाच इत्यभिष्टूयपुरुषंयद्रूपमनिदंयथा ब्रह्मेशानौ
पुरोधायदेवाःप्रतिययुर्दिवं ४२ २ श्री भा ते श स्कं ब्रह्मादिस्तुतिर्नाम ती ध्यायः
२ शुकउवाच अथसर्वगुणोपेतःकालःपरमशोभनः यर्ह्येवाजनजन्मर्क्षंशान्तर्क्षग्रहतार
कं १ दिशःप्रसेदुर्गगनंनिर्मलोडुगणोदयं महीमंगलभूयिष्ठपुरग्रामव्रजाकरा २

स्तुहरिःस्वयं पितृभ्यांसंस्तुतोनीतःपित्राभीतेनगोकुलं अथेतिमंगलार्थ्येयदियदासर्वगुणोपेतः
कालोबभूवतदादेवक्यांविष्णुराविरासीत् इत्यनेनान्वयः परमशोभनत्वमेवाह य
र्ह्येवादिना अजननात्नारायणाज्जन्मयस्यसः अजनजन्माप्रजापतिः तस्यर्क्षंरोहिणीनक्षत्रंकथंभूतं
शान्तानिऋक्षाणि अश्विन्यादीनिग्रहाअश्विनातारकाश्चयस्मिन् तद्यर्हीतिसर्वत्रान्वयस्थाने १ निर्मलानां
उडुगणानामुदयोयस्मिन् तथामंगलभूयिष्ठाःपुरादयोयस्यांसा २ १२

जलरुहैः श्रीः शोभा येषां ते द्विजालिकुलानां सन्नादा येषु ते स्तवका यासु ताः ३ समिन्धत मृदुगामो इह पूर्णः
प्रदक्षिणावर्त्तयः समैन्धत ते ति सम्यक् दीप्ता बभूवुरित्यर्थः ४ असुरद्रुहां देवानां सादिव्यन्तिरिक्षाना सर्वप्राणिनां दे
वानां चेति अजने जायमाने अमलः प्रसन्नो यस्मिन्समये तस्मिन् त्रिविष्टपे ५ तमसा उद्भूते च ननमसि निशीथे अर्धरा

नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रियः द्विजालिकुलसन्नादस्तवका वनराजयः ३ ववौ वायुः
सुखस्पर्शः पुण्यगन्धवहः शुचिः अग्नयश्च द्विजातीनां शान्तास्तत्र समिन्धत ४ मनांस्यासन्प्रस
न्नानि साधूनामसुरद्रुहां जायमानेऽजने तस्मिन्नेदुर्दुन्दुभयो दिवि ५ जगुः किन्नरगन्धर्वास्तुष्टुवुः
सिद्धचारणाः विद्याधर्यश्च ननृतुरप्सरोभिः समं तदा ६ मुमुचुर्मुनयो देवाः सुमनांसि मुदान्वि
ताः मंदं मंदं जलधरा जगर्जुरनुसागरं ७ निशीथे तमउद्भूते जायमाने जनार्दने देवक्यां दे
वरूपिण्यां विष्णुः सर्वगुहाशयः ८ आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः ८ तमद्भुतं बा
लकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधं श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीताम्बरं सान्द्रपयो
दसौभगं ९

दे ७ यथा यथावत् देवक्यां देवरूपिण्यां विष्णुराविरासीत् प्रकटी बभूव प्राच्यां दिशि पुष्कलश्चन्द्र इव ८ तमद्भुतं
बालकं वसुदेव ऐक्षत ते ति द्वितीयश्लोकेनान्वयः अद्भुतत्वे हेतुगर्भाणि विशेषणानि अम्बुजेक्षणमित्यादीनि
श्रीवत्सो लक्ष्म लाञ्छनं यस्य गले शोभते गलशोभी कौस्तुभो यस्मिन् ९ ॥

परिष्वक्तसहस्रकुंतलं किरीटकुंडलादीनां त्विषा स्फुरदपरिमितिकांतिमित्यर्थः १० विस्मयेनोत्फुल्ले वि
कसिते लोचने यस्य सः गवामयुतं दशसहस्राणि अस्पृशत् मनसा दत्तवान् . कंसनिरुद्धत्वेन सद्योदानासंभवा
त् स्पर्शहेतुः कृष्णावतारोत्सवसंभ्रमः निशि मुदा आप्लुतः व्याप्तः स्नात इति वा ११ कृतधीः शुभबुद्धिः १२ प्रथमे पुरुषबु
द्ध्या पश्यन् तं परित्यज्याह प्रथमं हो विदितोसीति कथं विदितोसि भवान् प्रकृतेः परः पुरुषस्येति न

महार्हवैडूर्यकिरीटकुंडलत्विषा परिष्वक्तसहस्रकुंतलं उद्दामकांच्यंगदकंकणादिभिर्विरो
चमानं वसुदेव ऐक्षत १० स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुंदुभिस्तदा कृ
ष्णावतारोत्सवसंभ्रमोस्पृशन्मुदा द्विजेभ्योयुतमाप्लुतो गवाम् ११ अथैनमस्तौदवधार्य पूरुषं परं
नतांगः कृतधीः कृतांजलिः स्वरोचिषा भारत सूतिकागृहं विरोचयंतं गतभीः प्रभाववित् १२
वसुदेव उवाच विदितोसि भवान्साक्षात्पुरुषः प्रकृतेः परः केवलानुभवानंदस्वरूपः सर्वबु
द्धिदृक् १३ ॥

नु किमत्राश्चर्यं पुरुषस्य प्रकृतेरन्यत्वादेवेत्यत आह साक्षात्त्वमसीत्यर्थः नन्वत्र तत्सन्निकृष्टः शब्दादिना
उपलंभनेन किं चित्रमित्यत आह केवलेति केवलस्य शुद्धस्यानुभवस्य आनंदस्य तावदेव स्वरूपं यस्य सः किं
च सर्वबुद्धिदृक् नैतावता विषयो दृश्यो भवतीत्यर्थः १३ ॥

ननु देवकीजठरे प्रविष्टस्य मे किमिति स्तुतिः क्रियते तत्राह स एवेति सप्तभिः स त्वमेव न देवकीजठरे प्रविष्ट
इत्यर्थः ननु किं त्वं सृष्ट्वा तदनु प्रविष्टस्य किमेतदत्राह स एव प्रकृत्येति स्वमायया सृष्ट्वा तदनु त्वमप्रविष्ट एव
वेति ननु कथं तर्हि प्रविष्टो उच्यते तत्सृष्ट्वा तदनु प्राविशदिति श्रुतेः तत्राह प्रविष्ट इव भाव्यसे लिङ्ग्यसे अन्यत्तत्वाव
पेणाप्रविष्ट एव लक्ष्यसे तत्र दृष्टान्तमाह १४ इमे विकृता भावा महदादयो यथा तथेति सदृष्टान्तं विवृणोति
ते विकृतैर्विनिवर्तितहि विकृतैः षोडशविकारैः सह सन्निपत्य विराजं जनयन्ति ब्रह्माण्डमुत्पादयन्ति सन्निपतन्ते

स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकं । तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे १४ यथेमे विकृ
ता भावास्तथा ते विकृतैः सह नानावीर्याः पृथग्भूता विराजं जनयन्ति हि १५ सन्निपत्य समुत्पाद्य
दृश्यन्तेनुगता इव प्रागेव विद्यमानत्वान्न तेषामिह संभवः १६ ॥

तर्यत पृथग्भूताः नानावीर्या विशिष्टकार्यसमर्थेन भवन्ति भिन्नाः १५ सन्निपत्येति एवं सन्निपत्य समुत्पाद्य अनुग
ताः प्रविष्टा इव दृश्यन्ते महदादयः न पुनः प्रविष्टाः कुतः अयं तेः प्रागेव कारणतया विद्यमानत्वात् न तेषामि
ह सृष्टे कार्ये पश्चात्संभवः प्रवेश इति वा ननु तेषां कार्ये प्रवेशः कथं कल्प्यते कार्ये चैवाभिन्नत्वात्तत्रायं
ते इति किं न स्यादित्येतत्राह प्रागेवेति कार्योत्पत्तेः प्रागेव तेषां भूतानामिह कार्ये संभवः १६ त्वमेवं रा
यन्मोनमः

श्री० भा० द० पू० २४

देहान्तिके निर्दिशति एवंभवानिति ननुयथघटस्यमृत्स्वरूपएवकारणंनयाकार्यैर्वर्त्ततर्हिनोषिंद्रियैः गृ
ह्यमाणोघुममग्रहणेकिंनास्तितत्राहउच्छ्रितमेयलक्षणोरिति उच्छ्राऊपादितानेनात्वमेयंलक्षणंस्वरूपंयेषां
तैरिंद्रियैर्ग्राह्यैर्गुणैग्रहः तैःगुणैः सहनगृह्यसे अयंभावः नहिग्राह्यैः सहभावमात्रंग्रहणेकारणं किंत्विंद्रि
याणांसन्निः। साचकार्यैरविगम्यायथाकार्यमेवकल्प्यते अतोयथ्यवद्वषारूपग्रहणेनरसग्रहणंनास्तित
थैवविषयग्रहणेत्वद्ग्रहणमपीति अविषयत्वेनचविषयग्रहणानहेत्वमुक्तमेवबुद्धिरेटीतिचैवशरीरेवाविद्य(
मानत्वात्प्रवेशोनास्तीत्युक्तं किंचपरिच्छिन्नस्यनीडेपद्यादेरिवप्रवेशोभवेत् भवतस्त्वनावृतत्वादपरिच्छिन्नत्वा(

एवंभवानुच्छ्रितमेयलक्षणोग्राह्यैर्गुणैःसन्नपितद्गु
णाग्रहः अनावृतत्वाद्बहिरंतरंनतेसर्व
स्यसर्वात्मनआत्मवस्तुनः
१७

नवहिरंतरभेदोनास्तिकुतः प्रवेशइत्याह अनावृतत्वादिति अनावृतत्वेहेतुमाह सर्वस्येति नहिसर्व
स्वरूपस्यास्यद्व्यावरकमस्तिसर्वात्मनोनेह्यकेनावृतोः न्यस्यात्मभवेत् आत्मवस्तुनइति आत्मनोवस्तुनश्रुति
हेतुद्वयं अनसातत्यगामनेइत्यस्मात् अततिव्याप्नोत्यात् नहिव्यापकस्यावरणंघटतेनतथावस्तुनः परमा
र्थस्यवस्तुनः आवरणंनघटतेत्यर्थः तस्मात्तवअंतर्यामितयाप्रवेशोनमुख्योस्तिकुतस्तरांगर्भप्रवेशः अतः
केवलानुभवानंदस्वरूपएवत्वंविदितोसीत्याश्चर्यंममभाग्यमि
त्यर्थः १७ ॥

राम
२४

नैवं तर्हि तत्त्वतः पृथक्प्रपंचस्यावस्तुत्वे घटादेस्तत्त्वेन संभवति सत्यत्वेन प्रतीतेरित्याशंक्याह आत्मनो दृश्यस्य गुणतो गुणे देहादिभ्यो व्यतिरेकतः आत्मव्यतिरेकेण पृथक्कार्यं देहादिरिति व्यवस्यते निश्चित वान् यः शुद्धमनसा बुधः अविद्यान्वयव्यतिरेकदर्शनात् किंच मनीषितं विकारितं सदेहादि सर्वं य तः विनानुवादं स्वावाच्यमनस्याद्विना सम्यक् न भवति अतो वस्तुत्वेन न प्रपंचो बाधितव्यस्तु बुद्ध्या उपा दृश्यत्वीकृतं वै ब्रह्म परमार्थः १८ एवं परमेश्वरव्यतिरेकेण दृश्यप्रपंचस्यावस्तुत्वे परमेश्वरोपादानत्वा

य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः विनानुवादं न च तन्मनीषि तं सम्यग्यतस्त्यक्तमुपाददत्पुमान् १८ यतोस्य जन्मस्थितिसंयमान्विभो वदन्त्यनीहा दगुणादविक्रियात् त्वयीश्वरे ब्रह्मणि नो विरुध्यते त्वदाश्रयत्वादुपचर्यते गुणैः १९

कृस

दृश्यस्य व्यतिरेकेण सत्त्वमित्याह यत इति नैवं सत्यपि विकारित्वमित्याशंक्याह अनीहादिति। अगुणाद्वा अनीहत्वं ततो विकारित्वमित्यर्थः ननु अनीहत्वे कथं कर्तृत्वं वा अतो विकारित्वमित्याशं क्याह ब्रह्मणाद्यविकारित्वमीश्वरत्वाच्च कर्तृत्वमुक्तमिति न चैतदपि विरुद्धमित्याह त्वयि। आश्रयत्वादित्यादि गुणैः कर्तृत्वं न पितृत्वादिकं तत्त्वमुपचर्यते गुणाश्रयत्वात् यथा भृत्यकृतं राजनीति १९ कृस

श्री:
भा॰ द॰
टी॰
१५

एवंभूतस्यैव तव यथा विश्वस्थितिसर्गलयार्थे त्रिविधा गुणावतारा: एवं भूभारापनयनार्थो
ऽयमिति ज्ञातव्यमित्याह सत्वमिति द्वयेन २० रिरक्षिषुः अवतीर्णोसि कुले स्ववर्गीन स्वत: साधु
नां रक्षणार्थं राजन्यसंज्ञा असुरकोटयस्तेषां यूथपा: तैर्निर्व्यूह्यमाना इतस्ततश्चाल्यमाना चमू:

सत्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मन: सर्गाय रक्तं रजसो-
पबृंहितं कृष्णं च वर्णं तमसा जनात्यये २० त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेऽवतीर्णो-
सि ममाखिलेश्वर राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यूह्यमाना निहनिष्यसे चमू: २१
२१ अयं त्वसभ्यस्तव जन्म नौ गृहे श्रुत्वाग्रजांस्ते न्यवधीत्सुरेश्वर स तेऽवतारं पुरुषै: स-
मर्पितं श्रुत्वाधुनैवाभिसरत्युदायुध: २२ श्रीशुक उवाच अथैनमात्मजं वीक्ष्य महापु-
रुषलक्षणं देवकी तमुपाधावत् कंसाद्भीता
शुचिस्मिता । २३ छ

सेना: निहनिष्यसे संहरिष्यसि २१ किं तत् तथाप्यसकृत्तेन त्वया न भाव्यमित्याह अयंत्विति असभ्य:
खल: समर्पितं कथितं अभिसरत्यागमिष्यति २२
उपाधावत् अस्तौत् २३ छ

१५

नयिभयशोकैवनाप्तीतिश्लोकं वदन्द्धयेनाह देवकी किंविद्धितापयितं रूपमिति यत्र किमपि ज्ञेयं वस्तु यथाहुर्वै
ताः किं न ह मन्तदाह ॥ अथार्थ अपरहेतुः आद्यं कारणं किं परमाणवः न ब्रह्म इहहन किं प्रकाशेन ज्योतिः चेतनेन किं
वैशेषिकाणामिव तान गुणेन निर्गुणं किं मीमांसकानामिव तानपरिणामि निर्विकारं किं शुक्लरक्तादीनामि
व प्राकृतिविशेषेणापरिणामिनं सत्तामात्रेण नहि किं सामान्येन निर्विशेषं नहि किं कारणवान्सक्रियं न निरीह सद्वि
धानमात्रेण कारणं एवं भूतं किमपि कार्यकल्पवस्तु एवं साक्षाद्विष्णुरिति अपरोक्षस्वेत्याह अध्यात्मदीपइति

रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्मज्योतिर्निर्गुणं निर्विकारं सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्वि
ष्णुरध्यात्मदीपः २४

बुद्ध्यादिकारणसंघातप्रकाशकमित्यर्थः अथवा अव्यक्तेन केनापि प्रकारेण व्यज्यत इत्यव्यक्तं कथमुच्यत इत्यात्तव
अव्यक्तमिति इत्याह आद्यं सर्वस्य कार्यस्य आद्यमनादीत्यर्थः तथा ब्रह्मज्योतिर्निर्गुणं निर्विकारमिति वदन्ति तैः प
दैः देशेन प्रकाशेन वै गुणेन च विकारेण च व्याप्तिं निराकरोति तथा सत्तामात्रमिति विशेषेण निर्विशेषमिति
सामान्येन निरीहमिति क्रियया व्याप्तिं निराकरोति अध्यात्ममात्रं एवंभूतस्य तव न भयशोके इति भावः २४

श्री॰ भा॰ द॰ पू॰ टी॰ १४

किंचमहाप्रलयेप्येकएवशिष्यमाणस्त्वंनान्यइत्याह लोकेचराचरेषुमहाभूतेषुलीनेषुतेष्वपिआदिभूतेभू
तेसत्सुत्वंनास्तित्वपिव्यक्तेव्यक्तेप्रधानेप्राप्तेशेषात्मकःप्रधानेसंज्ञाशक्तायस्यएवमपिलीनमिदमस्तितद्वेवेस्ती
यमितिसर्वत्रशेषसंज्ञःशेषसंज्ञइतिवाकिंच २५ एवंप्रलयहेतुर्योयंकालःहेअव्यक्तबंधोप्रकृतिप्रवर्त
कतस्यप्रलयावधिभूतस्यतेनवचेष्टांलीलावेष्टनेविपरिवर्तनेयेनःप्रवर्तत्सरांतःमहीयांद्विपरार्द्धरूपः

नष्टेलोकोद्विपरार्धावसानेमहाभूतेष्वादिभूतंगतेषु
व्यक्तेव्यक्तंकालवेगेनयातेभवानेकःशिष्यतेशे
षसंज्ञः २५ योयंकालःतस्यतेव्यक्तबंधोचे
ष्टामाहुःचेष्टतेयेनविश्वं निमेषादिर्वत्स
रांतोमहीयांस्तंत्वेशानंक्षेमधामप्रपद्ये २६ मर्त्यो
मृत्युव्यालभीतःपलायन्सर्वांल्लोकान्निर्भयंनाध्यगच्छत्
त्वत्पादाब्जंप्राप्ययदृच्छयाद्यस्वस्थःशेतेमृत्युरस्मादपैति २७ सत्वं
घोरादुग्रसेनात्मजान्नस्त्राहित्रस्तान्भृत्यवित्रासहासि रूपंचेदंपौरुषं
ध्यानधिष्ण्यंमाप्रत्यक्षंमांसदृशांकृषीष्ठाः २८ ॥

यस्यतस्यचेष्टामाहुः तंत्वांक्षेमधामअभयस्थानंप्रपद्येशरणंव्रजे २६ क्षेमधामत्वमेवाह मर्त्यइतिलो २५
कान्पर्यटन् निर्भयंपदंप्राप्ययदृच्छयाकेनापिभाग्योदयेनहेआद्यप्रस्वस्थंविज्ञापयतिसत्वमिति २७ भृत्या
नांवित्रासंहंतीति भृत्यवित्रासहाविरितिवाक्छेदः पौरुषंपेशरंध्यानविषयंध्यानास्पदं मांसदृशांप्रत्यक्षंमाकृथाः राम॰ १८

भवत्या हेतोर्निमित्तं भूतात् कंसादुद्विग्ने बिभेमि इत्यन्वयः अधीरधीः विक्लवा २९ ननु किमित्युपसंहर्तव्यं रूपमीदृशं एवं भूतं दिव्याद्भुतं रूपेणानया नवपुत्रेणानुमहता अस्माकं स्यादिति तत्राह विश्वमिति विश्वं ते प्रलयावसाने यथा

तन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन समुद्विजे भवद्धेतोः कंसादहमधीरधीः २९ उपसं
हर विश्वात्मन्नदो रूपमलौकिकं शंखचक्रगदापद्मश्रिया जुष्टं चतुर्भुजं ३० विश्वं यदेतत्स्व
तन्वौ निशान्ते यथावकाशं पुरुषः परो भवान् बिभर्ति सोऽयं मम गर्भगोऽभूदहो नृलोकस्य विडंब
नं तत् ३१ श्रीभगवानुवाच त्वमेव पूर्वसर्गेऽभूः पृश्निः स्वायंभुवे सति तदायं सुतपा नाम प्र
जापतिरकल्मषः ३२ युवां वै ब्रह्मणादिष्टौ प्रजासर्गे यदा ततः सन्नियम्येंद्रियग्रामं तेपाथे पर
मं तपः ३३ वर्षवातातपहिमघर्मकालगुणाननु सहमानौ श्वासरोधविनिर्धूतमनोमलौ
३४ शीर्णपर्णानिलाहारावुपशान्तेन चेतसा मत्तः कामानभीप्सन्तौ मदाराधनमीहतुः ३५

वकाशं स्वस्मिंस्कोऽवकाशः असंभावितत्वादुपहास्यत्वेन विडंबनमित्यर्थः ३१ चतुर्भुजत्वेनाविर्भावे कारणं तावदा
ह त्वमेवेत्यादिवचनैः षड्भिः त्वं पूर्वसर्गे प्रथमजन्मनि पृश्निर्नामासीः पृश्निर्नाम स्वायंभुवे मन्वंतरे अयं वसु
देवः सुतपा नाम ब्रह्मणः पुत्र आसीत् ३२ तेपाते तेपथुः कृतवंतौ ३३ ॥

श्री॰ भा॰ द॰ पू॰ टी॰ १०

तप्यतोः तपश्चाचरतोः ईयुर्गतानि मदात्मनोर्मय्यासक्तचित्तयोः ३६ अहं तावद्वपुषा प्रादुर्भूतोस्मि ३७ वरदराट्
वरदेषु श्रेष्ठ इत्यर्थः तेन मत्कृत हरेणा वारंवारसाविर्भावे कारणमुक्तं कामस्य दित्सया दातुमिच्छया मादृशो
मत्सदृशः ३८ मैमत्तोपि युवां अपवर्गं न वव्राथे न वृतवंतौ ३९ वरं दत्वा मयि गते सति ग्राम्यान्विषयानभुंज

एवं वां तप्यतोः तीव्रं तपः परमदुष्करं दिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः तदा वां परि
तुष्टोहममुना वपुषानघे तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ३७ प्रादुरासं वरदराड्
युवयोः कामदित्सया व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ३८ अजुष्टग्राम्यविषयावन
पत्यौ च दंपती न वव्राथेपवर्गं मे मोहितौ मम मायया ३९ गते मयि वरं दत्वा युवां मत्सदृशं
सुतं ग्राम्यान्भोगानभुंजाथां युवां प्राप्तमनोरथौ ४० अदृष्टान्यतमं लोके शीलौदार्यगुणैः
समं अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः तयोर्वां पुनरेवाहमदित्यामास कश्यपात् उपें
द्र इति विख्यातो वामनत्वाच्च वामनः ४२ तृतीयेस्मिन्भवेहं वै तेनैव वपुषाथ वां जातो भूयस्त
योरेव सत्यं मे व्याहृतं सति ४३ ॥

वंतौ ४० अदित्यां कश्यपाद्वामनश्चासेति यत्तदपि तद्रूपयोरहमेव पुनरासमित्यर्थः ४२ हे सति प
तिव्रते ४३ ॥ राम ॥

राम
२१

प्राक्तनयमेतावद्रूपं मे जन्मेति स्मरणाय तत्तानायदर्शितं अन्यथा मर्त्यलिंगेन मनुष्यशरीरेण मद्भवं मद्विषयं
ज्ञानं न स्यादेव अन्यत्वद्दिव्यबालोऽपि भविष्यामीति भावः ४४ ननु त्वयि प्रसन्नेऽपि कथमावयोः पुनर्न
मेति अतः परं न भविष्यतीत्याह युवामिति ४५ यदि किं माहिमेषितर्हि मां गोकुलं नय यशोदायाश्चाऽऽकन्यां
मन्मायामानयेति प्रथममेव भगवता प्रणोदितः प्रचोदितो यदा गन्तुमैच्छत् तदा यशोदायामेव योगमाया।

एतन्मे दर्शितं रूपं प्राक्तनस्मरणाय मे नान्यथा मद्भवं ज्ञानं मर्त्यलिंगेन जायते ४४ युवां मां
पुत्रभावेन ब्रह्मभावेन चासकृत् चिन्तयन्तौ कृतस्नेहौ यास्येथे मद्गतिं परां ४५ श्रीशुक उवाच
इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ४६
ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् यदा बहिर्गन्तुमियेष तर्ह्यजा
या योगमायाजनि नन्दजायया ४७ तया हृतप्रत्ययसर्ववृत्तिषु द्वाःस्थेषु पौरेष्वपि शायितेष्वथ
द्वारस्तु सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः ४८

मायां देवकीतनयत्वेन निमित्तमात्रभूतयाऽजनि नन्दजाया प्रबोधितेति पाठः ४७ हृताः प्रत्ययाः सर्वा वृत्तयो येषां
अथवा हृताः प्रत्ययाः सर्वा वृत्तयो येषां तथाभूतेषु द्वाःस्थपालेषु लोहकीलशृंखलैः
लैर्बृहद्भिः कवाटादिभिर्दुरत्यया इति वा ४८

श्री॰ भा॰ द॰ पू॰ टी॰ ३८

दुरत्ययमहाद्वारः स्वयंव्यशीर्यंतेनिवद्धकोशएणन क्वांदाम्ः रवेः निमित्तन ४८ गंभीरैयस्तोयौघैः नस्यज
वेनयेऊर्मयः तैः फेनिलः फेनव्याप्तः भयानकैः एवकृतशतैः व्याप्ताश्रियः पतेः सीतापतेः सिंधुः समुद्र
इव ४९ निद्रयाः यायानिमित्तभूतया ५० प्रतिमुक्तएववद्धापदेः पादयोः लोहेनिगडमासेनस ५१

ताः कृस्नवाहेवसुदेवआगतेस्वयंव्यशीर्यंतयथातमोरवेः ववर्षपर्जन्यउपांशुगर्जितः शे
षोन्वगाद्वारिनिवारयन्फणैः ४८ मघोनिवर्षत्यसकृद्यमानुजागंभीरतोयौघजवोर्मिफेनि
ला भयानकावर्तशताकुलानदीमार्गंददौसिंधुरिवश्रियःपतेः ४९ नंदव्रजंशौरिरुपेत्यत
त्रतान्गोपान्प्रसुप्तानुपलभ्यनिद्रया सुतंयशोदाशयनेनिधायतत्सुतामुपादायपुनर्गृहान
गात् ५० देवक्याःशयनेन्यस्यवसुदेवोथदारिकां प्रतिमुच्यपदोर्लोहमास्तेपूर्ववदावृ
तः ५१ यशोदानंदपत्नीचजातंपरमबुध्यत नतल्लिंगंपरिश्रांतानिद्रयापगतस्मृतिः ५२
इतिश्रीभागवतेदशमस्कंधेतृतीयोध्यायः ३ शुकउवाच बहिरंतःपुरद्वारःसर्वाःपूर्ववदा
वृताः ततोबालध्वनिंश्रुत्वागृहपालाःसमुत्थिताः १॥

जातंकिंचिदितिकेवलमबुध्यत नतल्लिंगः कन्यावेतियोगनिद्रयामोहितेति ५२ इतिश्रीभावार्थे
दशमस्कंधेतृतीयोध्यायः ३ वहिर्थेचंडिकावाक्यामाकर्ण्योतिभयाकुलः दुर्मोचिभिर्हितंमेनेकं
सोबालादिहिंसनं १॥ दश॰ ३८

ततोऽष्टममस्यजन्म २ कालोऽमृत्युः ३ प्रंगरिपुश्चात्र ४ हीनदीनवत्तदीनादपिदीनवत् तयाप्युत्रस्यान्यत्र
मीतवान्मावयोगमायेनित्तानवान् यावितोप्याविच्छिदे प्राकृप्यजयाह ७ प्रयोपयत्रवलेनविलेप ८

गर्भ
तेतनगोमुपक्रम्यदेवक्याजन्मनत् प्रावद्भुर्भोजराज्ञाययमुदिग्नः प्रतीक्षते १ सनल्यात्तूर्णं
मुत्थायकालोयमितिविह्वलः सतीगृहीमगाक्लीग्रंममवलन्मुक्तमूर्धजः २ तमाहभ्रामदे
वीहृपणाकरुणांसती कत्येयंनवकल्याणीस्त्रियमाहत्तंमर्हसि ४ नवहमेत्वयस्मादीनाहत
स्तनायमी दात्मर्हसिमेंदायाग्रेगेमावरमोप्रजा ६ बहवोहिंसिताभ्रातः शिशवः पावकोपमाः
त्वयादेवनिसृष्टेनपुत्रिकैकाप्रदीयतां ५ मुकुडवाच उपगृह्यात्मजामेवरुदंत्यादीनदीनवत्
याचितस्तांविनिर्भर्त्स्यहस्तादाविच्छिदेखलः ७ तांगृहीत्वाचरणयोर्जातमात्रांस्वसुःसुतां श्र
पोथयच्छिलापृष्ठेस्वार्थोन्मूलितसौहृदः ८ सातद्धस्तात्समुत्पत्त्यसद्योदेव्यंबरंगता अदृश्य
तानुजाविष्णोःसायुधाष्टमहाभुजा ९ दिव्यस्रगंबरालेपरत्नाभरणभूषिता धनुःशूलेषु
चर्मासिशंखचक्रगदाधरः १० सिद्धचारणगंधर्वैरप्सरःकिन्नरोरगैः उपाहृतोरुबलिभिः
स्तूयमानेदमब्रवीत ११ किंमयाहतयामंदजातःखलुतवांतकृत् यत्रक्वचित्पूर्वशत्रुर्माहिं
सीकृपणान्वृथा १२

सयपवदेवीभूत्वा १४ कृपणानिसमन्यान् शिष्यन् हनिष्यतीतिनित्यावावारयति पाठांतरेतुमामांकृपणं
हिंसः हिंसितवानसिइति १२

श्रीः भा॰द॰ स॰टी॰ ४९

बहुनामनिकेतनेषु वाराणस्यादिस्थानेषु बहुनामा दुर्गा कालीत्यादि १३ परमविस्मितः कथं देवी वागन्यथा जा-
तेति १४ हे भाम भगिनीभर्तः पुरुषादो राक्षसो यथा स्वापत्यमेव हिनस्ति तद्वत् १५ जीवन्नपि मृतो ब्रह्महेव १६ हे महा-
भागौ स्वकृतंभुजः स्वारब्धकर्मभोक्तृत्वं किं च जन्तवः प्राणिनः सदैवात्र नासते किं तु प्रलयकालमेव तदा एकत्र
नासते किं तु विप्रयुज्यन्ते यतो देवाधीनाः १७ सदा नाम तत्त्वे तेन यत् केऽजन्ममरणादिन द्यपि देहानामेव नात्मन

शुक उवाच इति प्रभाष्य तं देवी माया भगवती भुवि बहुनामनिकेतेषु बहुनामा बभूव ह १२ त-
याभिहितमाकर्ण्य कंसः परमविस्मितः देवकीं वसुदेवं च विमुच्य प्रश्रितोऽब्रवीत् १४ कंस उवाच
अहो भगिन्यहो भाम मया वां बत पाप्मना पुरुषाद इवापत्यं बहवो हिंसिताः सुताः १५ स त्वहं त्यक्त-
कारुण्यः त्यक्तज्ञातिसुहृत्खलः कान्लोकान्वै गमिष्यामि ब्रह्महेव मृतः श्वसन् १६ दैवमप्यनृतं
वक्ति न मर्त्या एव केवलं मा शोचतं महाभागौ स्वात्मजान्स्वकृतंभुजः १७ जन्तवो न सदैकत्र देवा-
धीनाः सदासते १८ भुवि भौमानि भूतानि यथा यान्त्यपयान्ति च नायमात्मा तथैतेषु विपर्येति
यथैव भूः १९

शुकः ॥ इत्याह भूतानि देहा एव यान्ति अपयान्ति च भवन्ति च न भवन्ति चेत्यर्थः यथा भुवि भौमानि घटादी-
नि तद्वदेतेषु भूतेषु जन्मादिभिर्विक्रियमाणेष्वपि अयमात्मा एकरूपतया प्रत्यभिज्ञायमानो नात्मा विपर्येति
विपर्ययं विक्रियां न प्राप्नोति एकरूप एव वर्तत इत्यर्थः भौमेषु विक्रियमाणेषु यथा भूमिः तथेति एवं
विचार्यमाने सति न शोकः अयत्नतः तु न निवर्तते इत्याह १९

थैनेवंविदः एवमजानतः आत्मविपर्ययः देहात्मबुद्धिर्भवति यतो विपर्ययात् भेदो भवति देहाहंकारे
णाहि आत्मनि परिच्छिन्ने सति इदमहंकारोयं इति भिन्नं भवति यतो भेदाद्देहात्पुत्रादि देहैर्योगो वियोगश्च
ततः संसृतिः सुखदुःखे इति यावत् अज्ञानेन न निवर्तते इत्यर्थः एवंभूतप्रकारेण तेनैततनयाः अद्य
तनावज्ञाव्यातितव्यान् तथाप्यज्ञानदृष्ट्यानतनयो मया व्यापादिता मानुशोचेति २० अज्ञानमग्रयकर्म

यथानेवंविदो भेदो यत आत्मविपर्ययः देहयोगवियोगश्च संसृतिर्न निवर्तते २० तस्माद्भद्रे
स्वतनयान्मया व्यापादितानपि मानुशोच यतः सर्वः स्वकृतं विंदतेवशः
२१ यावद्धतोस्मि हंतास्मीत्यात्मानं मन्यतेस्वदृक् तावत्तदभि
मान्यज्ञो बाध्यबाधकतामियात् २२ क्षमध्वं मम दौ
रात्म्यं साधवो दीनवत्सला इत्युक्त्वाश्रुमु
खः पादौ श्यालः स्वस्रोरथाग्रहीत् २३
मोचयामास निगडाद्विस्रब्धः कन्यका
गिरा देवकीं वसुदेवं च दर्शयन्नात्म
सौहृदं २४

वादमाह यत इति कथं तर्हि आत्मनो दिहंतः नहयस्य वशायाश्च तत्श्रवणमज्ञानमूलमेवेत्याह २१
अस्वदृक् देहाभिमानी तस्य देहस्य हननमात्मन्यभिमन्यमान इत्यर्थः स्यालः कंसः स्वस्रोरिति शब्दे
नाद्विवचनानुपपत्त्या मिथुनग्रहणाद्वा मिथुनलक्षणाय स्वसुः तत्पत्युः च अभिधाने लिंगसमवायेन णशो
एभृत तथा दयानीतिवद्देवकीवसुदेवस्यापि एकपादमग्रही दित्यर्थः स्यालशब्देन कथंविद्या
स्वदेवाभिधानम् २२ आत्मसौहृदं प्रियवादित्वं दर्शयन् २३ ॥
॥

श्रीः
भा॰ द॰
टी॰
१०

स्वपरेति भिदादर्शने किं भवति तदाह २६ भावैर्देवनिमित्तभूतैर्मिथो भावान् घ्नन्तं भावमीश्वरं पृथग्दृशः
लोनपश्यंति किं मामेवहं हंता हतश्चेति मन्यतेऽस्यार्थः २७ शुद्धं यथा भवति तथा २८ नातिकोविदाः
हमात्रमनयः ३० ननिर्गतानि दशदिनानि येषां तान् अन्यांश्च दशाहादूर्ध्वं ३१ अस्यतो विध्यतः वा

भ्रातुः समनुतप्तस्य क्षान्तरोषा च देवकी व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह २५ एवमेत
न्महाभाग यथा वदसि देहिनां अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः २६ शोकहर्षभय
द्वेषलोभमोहमदान्विताः मिथो घ्नन्तं न पश्यन्ति भावैर्भावं पृथग्दृशः २७ श्रीशुक उवाच कंस ए
वं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः देवकीवसुदेवाभ्यामनुज्ञातोऽविशद्गृहं २८ तस्यां रात्र्यां
व्यतीतायां कंस आहूय मन्त्रिणः तेभ्य आचष्ट तत्सर्वं यदुक्तं योगनिद्रया २९ आकर्ण्य भर्तुर्ग
दितं तमूचुर्देवशत्रवः देवान्प्रति कृतामर्षा दैतेया नातिकोविदाः ३० एवं चेत्तर्हि भोजेन्द्र पुर
ग्रामव्रजादिषु अनिर्दशान्निर्दशांश्च हनिष्यामोऽद्य वै शिशून् ३१ किमुद्यमैः करिष्यन्ति देवाः
समरभीरवः नित्यमुद्विग्नमनसो ज्याघोषैर्धनुषस्तव ३२ केचित्प्राञ्जलयो भीता न्यस्तशस्त्रा
दिवौकसः मुक्तकच्छशिखाः केचिद्भीताः स्म इति वादिनः ३३ अस्यतस्ते शरव्रातैर्हन्यमानाः स
मन्ततः जिजीविषव उत्सृज्य पलायनपरायणाः ३४

णान् ह्रियतः उत्सृज्य रणं मुक्त्वा ३३ मुक्तकच्छशिखाः मुक्तकटीपटाः ३४ ॐ श्रीगणेशाय नमो २०
नमः

प्रत्यासक्ताविमुखाश्चेतिवदंति ३५ तेमेनिर्भयदेशेस्वैरः संयुगादन्यत्रविकत्थनंशौर्यवादः येषांतैः न
नुहेदेवर्विमेनिघ्रांमोश्चेतितत्राहुः रहोजुषेतिसर्वस्थानैः प्रविशेनकचिदपिबहिरदृश्येनेत्यर्थः कुल
यप्रवेशरहितमिलादृनवनमोकोयस्तेनशंभुना ३६ यद्यप्युयमैदेवानकिंचिदपिकर्तुंसमर्थास्त

नवंविसत्वयातास्ताविरयानामयमत्रनाव् हंस्यन्यामकुमनसोमयुवाघानवुध्यतः ३५
किंतेमम्बरैविबुधैरसंयुगविकथ्थनैः रहोजुषाकिंहरिणाशंभुनावावनौकसा ३६ किं
मिंद्रेणाल्पवीर्येणब्रह्मणावातपस्विना तथापिदेवाःसापत्न्यान्नोपेक्ष्याइतिमन्महे ३७
ततस्तन्मूलखननेनियुंक्ष्वास्माननुव्रतान् ३८ यथामयोगमस्पृष्टोनोभिनेशक्य
नेरुदपदःविकित्सितं यथेंद्रियग्राममुपेक्षितस्तथारिपुर्महान्बद्धबलोनचाल्यते ३९
मूलंहिविष्णुर्देवानांयत्रधर्मःसनातनः तस्यचब्रह्मगोविप्रास्तपोयज्ञाःसदक्षिणाः ४०
तस्मात्सर्वात्मनाराजन्ब्राह्मणान्ब्रह्मवादिनः तपस्विनोयज्ञशीलान्गाश्चहन्मोहविर्दुघाः
४१ विप्रागावश्चवेदाश्चतपःसत्यंदमःशमः श्रद्धादयातितिक्षाचक्रतवश्चहरेस्तनूः ४२
सहिसर्वसुराध्यक्षोह्यसुरद्विड्गुहाशयः तन्मूलादेवताःसर्वाःसेश्वराःसचतुर्मुखाः
४३ अयंवैतद्वधोपायोयदृषीणांविहिंसनं ४४ ॥

ख्यापिनीतिरनुमंतव्याइत्याह तथापीति ३७ आमयोरोगः उद्दपदोबद्धमूलः ३९ देवानां
विष्णुः सचयत्रधर्मः तत्रास्तेधर्मस्यमूलंवेदादयइति ४० किंचविप्रादयोहरेदेववोचस्मात्तस्मादया

श्रो:
भा० द०
पृ० टी०
२१

आरात्समीपमागतोपि यस्यैषां तेन कवलं मतां विद्वेषो न मुमोचेत्यतः किं न बहुनर्थकार्यपीत्याह ४७
इति भा र्थ दि पि कां श स्कं वेत्त ध्यायः ४ पंचमे जातकेनंदः स्त्रनोकृत्वा महोत्सवं गत्वा।
व्रजमथुरां प्रायवसुदेवागतोत्सवे महामनाः सुदाव विना: १ निपुतेष्वेलदेसमतिल यर्वतां स्रुवादा
न कथं श्रुतान् गलौचैः रत्नसमूहैः शातगोभावैः सवर्णमालेर्वैर्वाससां न् ३ इत्याणां गो

शुक उवाच एवं दुर्मंत्रिभिः कंसः सह संमंत्र्य दुर्मतिः ब्रह्महिंसां हितं मेने कालपाशावृतोऽ
सुरः ४५ संदिश्य साधुलोकस्य कदने कदनप्रियान् कामरूपधरान्दिक्षु दानवान्गृहमा
विशत् ४६ ते वै रजः प्रकृतयः तमसा मूढचेतसः सतां विद्वेषमाचेरुरारादागतमृत्यवः
४७ आयुः श्रियं यशो धर्मं लोकानाशिष एव च हंति श्रेयांसि सर्वाणि पुंसो महदतिक्रमः
४८ इ श्री म ते भा स्कं द थो यः ४ शुक उवाच नंदस्त्वात्मज उत्पन्ने जाताह्ला
दो महामनाः आहूय विप्रान्वेदज्ञान्स्नातः शुचिरलंकृतः वाचयित्वा स्वस्त्ययनं जातक
र्मात्मजस्य वै कारयामास विधिवत्पितृदेवार्चनं तथा १ धेनूनां नियुते प्रादाद्विप्रेभ्यः सम
लंकृते तिलाद्रीन्सप्त रत्नौघशातकौंभांबरावृतान् २ कालेन स्नानशौचाभ्यां संस्कारैः
तपसेज्यया शुध्यंति दानैः संतुष्ट्या द्रव्याण्यात्मात्मविद्यया ४
हिरण्यादीनां तन्मध्ये केषांचिद्दानैरेव शुद्धिर्यथा द्रव्यादानादियुक्तजातकर्मादिसंस्कारैर्देवगर्भाणां
शुद्धिरिति निदर्शयितुं प्रतिनियतानि शोधनानि दृष्टांतत्वेनाह कालेनेति कालेन भूम्यादिर्यथा खननाः
स्नानात् दाहादेर्द्विर्वर्षकालेपनात् गोभिराक्रमणात्कालाद्भूमिः शुध्यतिसप्तभिः स्नानेन देहादिः
शौचेन नासनलिंगादिः संस्कारैर्गर्भादिः तपसेंद्रियादिः इज्यया ब्राह्मणादिः दानैर्द्रव्याणि संतुष्ट्या मन

सौमंगल्यगिरः मंगलवाचका विप्रादयो बभूवुः सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः वंदिनस्त्व
मलप्रज्ञाः प्रस्तावसदृशोक्तयः ६ संमृष्टानि संसिक्तानि द्वाराण्यजिराणि गृहान्तराणि गृहमध्या
नि यस्मिंस्तथा चित्रध्वजेषु पताका आम्रस्रजः चैलभूषणानि चैलैर्भूषितः ७ हरिद्रातैलभूषिताः विचित्रधातवः

सौमंगल्यगिरो विप्राः सूतमागधवंदिनः गायकाश्च जगुर्नेदुर्भेर्यो दुंदुभयो मुहुः ६ व्रजः संमृ
ष्टसंसिक्तद्वाराजिरगृहांतरः चित्रध्वजपताकास्रक्चैलपल्लवतोरणः ७ गावो वृषा वत्सतरा
हरिद्रातैलभूषिताः विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ८ महार्हवस्त्राभरणकंचुको
ष्णीषभूषिताः गोपाः समाययू राजन्नानोपायनपाणयः ९ गोप्यश्चाकर्ण्य मुदिता यशो
दायाः सुतोद्भवं आत्मानं भूषयांचक्रुर्वस्त्राकल्पांजनादिभिः १० नवकुंकुमकिंजल्कमुख
पंकजभूतयः बलिभिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कुचाः ॥

तवस्त्रबर्हस्रजश्च वस्त्राणि च कांचनमालाश्च अलंकरणं यासां विद्यंते येषां ते तथाभूता गावादयो बभूवुरि
त्यर्थः ८ आकल्पा अलंकाराः १० नवकुंकुमैर्मुखपंकजे भूतिः श्रीर्यासां ताः बलिभिर्बलिनपात्रैः
॥ ८म

सुमृष्टानि उज्ज्वलितानि मणिमयानि कुंडलानि निष्काः पदकानि कंठे येषां संति ताः चित्राणि अंबराणि यासां ताः शिखाभ्यः च्युतानि माल्य
वर्षाणि यासां ताः नंदालयं व्रजंतीः व्रजंत्यः पथि विरेजुः सवलयाः कंकणभूषिताः व्यालोलैः चंचलैः कुंडलादि।

गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यः चित्रांबराः पथि शिखाच्युतमाल्यवर्षाः नंदालयं सवलया
व्रजतीर्विरेजुर्व्यालोलकुंडलपयोधरहारशोभाः १२ ता आशिषः प्रयुंजानाश्चिरं पाहीति बाल
के हरिद्रातैलचूर्णाद्भिः सिंचंत्यो जनमुज्जगुः अवाद्यंत विचित्राणि वादित्राणि महोत्सवे कृष्णे विश्वे
श्वरेऽनंते नंदस्य व्रजमागते १४ गोपाः परस्परं हृष्टा दधिक्षीरघृतांबुभिः आसिंचंतो विलिंपंतो नवनी
तैश्च विचिक्षिपुः १५ नंदो महामनास्तेभ्यो वासोऽलंकारगोधनं सूतमागधवंदिभ्यो येऽन्ये विद्योपजीवि
नः १६ तैस्तैः कामैरदीनात्मा यथोचितमपूजयत् विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च १७ ।
रोहिणी च महाभागा नंदगोपाभिनंदिता व्यचरद्दिव्यवासःस्रक्कंठाभरणभूषिता ।।१८ तत आर
भ्य नंदस्य व्रजः सर्वसमृद्धिमान् हरेर्निवासात्मगुणै रमाक्रीडमभून्नृप १९ गोपान् गोकुलरक्षायां
निरूप्य मथुरां गतः नंदः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह २०

भिः स्नेहभाराया संताः १३ जनं सिंचंत्यः अंजनं मुज्जगुरिति वा १३ तेभ्यो गोपेभ्यः प्रादात् १६ यथोचितमपूजयत्
नपि प्रसृजयत् १७ हरेर्निवासेन ये आत्मनि गुणास्तैः रमायाः लक्ष्म्याः आक्रीडे विहारस्थाने १९ वार्षिकं प्रति
वर्षं देयम् २०

भ्रातरं मत्वा ययौ तदवमोचनं तस्य शकटैर्यात्रां स्थानं वसतिरूपं १९ पुनर्भवः पुनर्जन्म इत्यनन्तरहेतुगर्भविशेषणं
संसारचक्रे परिवर्तमान इति दुर्लभमतमेवाह २२ प्रियः वासो संवासः प्रियसंवासः हे प्रिये ति वा स्रोतसा ओघेन

वसुदेव उपश्रुत्य भ्रातरं नन्दमागतं ज्ञात्वा दत्तकरं राज्ञे ययौ तदवमोचनं १९ तं दृष्ट्वा सहसोत्था
य देहः प्राणमिवागतं प्रीतः प्रियतमं दोर्भ्यां सस्वजे प्रीतिविह्वलः २० पूजितः सुखमासीनः
पृष्ट्वानामयमादृतः प्रसक्तधीरात्मजयोरिदमाह विशांपते २१ दिष्ट्या भ्रातः प्रवयस इदा
नीमप्रजस्य ते प्रजाशाया निवृत्तस्य प्रजा यत्समपद्यत २२ दिष्ट्या संसारचक्रेऽस्मिन्वर्तमानः पु
नर्भवः उपलब्धो भवानद्य दुर्लभं प्रियदर्शनं २३ नैकत्र प्रियसंवासः सुहृदां चित्रकर्मणां
ओघेन व्यूह्यमानानां प्लवानां स्रोतसो यथा २३ कच्चित्पशव्यं निरुजं भूर्यंबुतृणवीरुधं बृहद्व
नं तदधुना यत्रास्से त्वं सुहृद्वृतः २४ भ्रातर्मम सुतः कच्चिन्मात्रा सह भवद्व्रजे तातं भवन्तं मन्वानो
भवद्भ्यामुपलालितः २५

२६

व्यूह्यमानानां प्लवं नौति प्लवः तृणकाष्ठादयः तेषां यथैकत्र स्थितिः न तद्वत् २३ पशव्यादिरूपेणा
स्मिन्वने निर्दोषगोपयोदस्तृणादिनाभ्युन्नतगोपिकास्तन्यादिना पुत्रदोषं विवदत्याशङ्क्यति प्रसक्तधीः
त्वात्मजयोरित्युक्तवान् २४ भवद्भ्यामुपलालितः सन्कच्चिद्वर्तत इति शेषः पुत्रादर्शनक्लेशेनाह द्वेश इति

श्री०
भा० टी०
२२

सुहृदो बंधुस्तैरनुभावितः संपादितः यस्त्रिवर्गः स हि पुंसो विहितः युक्तः न स्वमात्रपर्यवसितः अतस्ते
षु क्लिश्यमानेषु सत्स्वार्थाय न भवतीत्यर्थः २६ नंदो वसुदेवं सांत्वयन्नाह अहो त इति कंसचारभयं शंक
मानः कटाक्षेणोत्तरं दद्यान्यदेवाह २७ अदृष्टएवनिष्ठासमाप्तिर्यस्य सः यदैव पुत्रादि दुःखप्रदमदृ
ष्टं हीयते तदैव ते पुत्रादयोऽपि न भवंतीत्यर्थः अदृष्टपरमः तथा अदृष्टमेव परं संयमः यस्य सः यद्यपि पुत्रादयो
वियुक्ताः तथापि तानदृष्टमेव पुनः पुनः संगमयतीत्यर्थः एवमदृष्टमात्मनस्तत्त्वं यथाभिचारिकारणं ह

पुंसः त्रिवर्गो विहितः सुहृदो ह्यनुभावितः न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते २६
नंद उवाच अहो ते देवकीपुत्राः कंसेन बहवो हताः एकावशिष्टावरजा कन्या सापि दिवं ग
ता २७ नूनं ह्यदृष्टनिष्ठोऽयमदृष्टपरमो जनः अदृष्टमात्मनस्तत्त्वं यो वेद न स मुह्यति २८
वसुदेव उवाच करो वै वार्षिको दत्तो राज्ञे दृष्टा वयं च वः नेह स्थेयं बहुतिथं सन्त्युत्पाताश्च गोकु
ले २९ शुक उवाच इति नंदादयो गोपाः प्रोक्तास्ते शौरिणा ययुः अनोभिरनडुद्युक्तैस्तमनु
ज्ञाप्य गोकुलम् ३०

त्विदुः तं यो यो वेद स न मुह्यति तस्मादिदानीं त्वया दुःखं न भावनीयं मृतानामपि वियुक्तानामपि वि
युक्तानामपि च कालांतरे दर्शनयोगसंभवात् अस्मदादिभिरपि कालांतरे तद्वियोगस्सह्यः इति नंद
स्य दैवीवागेशणभावसूचिका २८ नावबुद्ध्वा वसुदेवो दुःखं त्यक्त्वा नंदमाह करो वै इति वः युष्माभिः
२९ शौरिणा वसुदेवेन अनोभिः शकटैः ३०

२२

१ श्री वा दी का द म धे पंचमोध्यायः ५ षष्ठे मल्लुर्गीपानं दोव्रजं गछन्नंतो पथि हृष्ट्वानवासमीत
स्यामृत्सुष्कत्वाचविस्मितः कृस्नविषयेशंकमानं प्रतिश्रविषयेप्रहृज्ञा सोवमरिष्यतीतिस्तृचयन्नाशनयेथेति
पत्रश्रीकृस्नस्यश्रवणादीनि न संतितत्रैवनातोशक्तिः सात्वतांनस्मिन्नेवसंततितिइतिनशंकेतिभावः ३ योषित्वा
वेशंतोवंनारीमिवात्मानंविधाय ननुनिर्लज्जानिर्विशंकासती कथं परमसत्वप्रविशविषाप्रतआहकामचा
रिणीतिनहिकामचारिणीछिद्रंद्विरमित्यर्थः ४ तावनिंतोनिंजपतिरस्तुमागनामतित्रपवतीश्रियमिवरा

इति भा व द म धे व ध्यायः ५ शुकउवाच नंदः पथिवचः शौरेर्नमृषेतिविचिंतयन्
हरिंजगामशरणमुत्पातागमशंकितः १ कंसेनप्रहिताघोरापूतनाबालघातिनी शिशूंश्चचा
रिनिघ्नंतीपुरग्रामव्रजादिषु २ नयत्रश्रवणादीनिरक्षोघ्नानिस्वकर्मसु कुर्वंतिसात्वतांभर्तुर्यातु
धान्यश्चतत्रहि ३ साखेचर्येकदोत्पत्यपूतनानंदगोकुलं योषित्वामाययात्मानंप्राविशत्काम
चारिणी ४ तांकेशबंधव्यतिषक्तमल्लिकांबृहन्नितंबस्तनकृच्छ्रमध्यमां सुवाससंकल्पितकर्ण
भूषणत्विषोल्लसत्कुंतलभूषितानना ५

योषित्वेत्यस्योत्तरश्लोकेनान्वयः श्रीसामान्यानिविशेषणानि केशबंधव्यतिषक्तमल्लिकांकेशग्रंथिषु
गुंफितमल्लिकाकुसुमांबृहन्नितंबस्तनाभ्यांकृछ्रमध्यमुदरंयस्याः तांसुवास
संशोभनंवासोयस्याः तांकल्पितयोः कर्णभूषणयोः त्विषाउल्लसद्भिःकुंतलैर्मंडितमाननंयस्याः तां ५
गम

श्रीः
भा० द०
टी०
२४

वल्गुरवस्मितं येषु तैस्तथाभूता अपांगविसर्गाः येषु तैः वीक्षितैः व्रजौकसां मनो हरंती मत्तोगोपाल्लहृतम
नसः तेनतानन्निवारितवंतः इत्यकेभवन्तिगोपस्त्रप्रियमिवमन्वान तस्मीसामनु अतः केनाप्यनिवारि॰
ताममन्नीयविवेकोतिभावः ८ बालग्रहः स्तनकामसदेतनकेदटर्पाअसन्नोअनकेदृष्ट्वाकथंतद्बिभेति तत्राह

वल्गुस्मितापांगविसर्गवीक्षितैर्मनोहरंतीं वनितां व्रजौकसां अमंसतांभोजकरेण रूपिणीं गोप्यः
श्रियं द्रष्टुमिवागतां पतिं ८ बालग्रहस्तत्र विचिन्वती शिशून्यदृच्छया नंदगृहे सदंतकं बालं प्रति
छन्ननिजोरुतेजसं ददर्श तल्पेऽग्निमिवाहितं भसि ७ विबुध्य तां बालकमारिकाग्रहं चराचरात्मा
स निमीलितेक्षणः महाहवे वेसमतिबालभावे विभावयामास मर्किं वाचनप्रभुः ८ अस्तानमा
लाघलिघावरीहहिंतिसर्गविस्तानजगाहिवेष्टिते अनंतमारोपयदंकमंतकं यथोरगं सुप्तमबु
द्धिरज्जुधीः ९

प्रतिच्छन्ननिजोरुतेजसं बालभावेन प्रतिच्छन्नं तिरोहितं निजमुरुतेजो येन तं कमिव भस्मनि आहितमा
ग्निमिव ७ चराचरात्मत्वादेवतां विबुध्य निमीलितेक्षणः आसमस्वयमनेनदृष्टानामंतकमोक्तमारोपय
त् बालमत्वाम ध्योरगं सुप्तमबुद्धिरज्जुधीः अस्तानतोरज्जुबुद्ध्या गृह्णातीति यथा तद्वत् ९
गम

ननु यशोदा गोपी हि यं पीतांतां न कथं स्नकारयेत्तां तत्राह तामिति । वामं वल्य जननया इव वेष्टितं यस्मात्तां व राद्विये
वसह सैवां तत्रा गृहमध्ये वीक्ष्य श्रूंत स्तीक्ष्णवेव वहिर्मूर्तिं वेवट स्थानतः कोष्ठापरिच्छिदा सिवत् । स्फुरद्वर्मविशमयः
कोष्ठः परिच्छेदस्त्रावरणी यस्मात्सः खड्गस्य तद्वत् । तन्मभयाधर्षितेत्यभिप्रेते गृहमस्य जननी एवेति मोहिते

तां तीक्ष्णविद्याम यवामवेष्टितां वीक्ष्यां तत्र कोशपरिच्छदा सिवत् । वस्त्रयं तन्मभयाद् धर्षिते
निरीक्ष्यमाणेन जननीं हि अतिष्ठत् ॥१॥ तस्मिन् क्षणे द्वर्जरवीर्य सुलक्षणं बालकमादाय शिशोर्देहा
वध माहेकराभ्यां भगवान् अपीयूनस्याणोः समं रोषसमं विनापिवत् ॥ मातुर्वक्षवालमि
तिप्रभाविणी निवीड्य माना निलजीवमर्माणि विवृत्य नेत्रे चरणौ भुजौ मुहुर्विक्षिप्य गात्रादिपतौ
हृदेदह ॥२॥ तस्याः स्वनेनाशु गभीरवंह सा सा द्विर्महीधौ स्त्रवचाल सग्रहा रसा दिशश्च पतिने
दिरे जनाः पेतुः क्षितौ वज्रनिपातशंकया ॥३॥

सर्वौ जननी तनयौ निरीक्षमाणो एव केवलमतिष्ठत्तां न निवारितवं यो ॥१॥ तस्मिन्स्याने दुर्जरवीर्य या
स्मिन् क्षणे तं कस्मसंक मादाय तत्सो शिशावेद दै यथा यानें तत्रमेव यपीग्रु केवलं विषमय यस्या निति वह्नि
तमेव तस्याः प्राणैः महापिवत् ॥ चरणौ भुजौ मुहुर्मुहुः क्षिपन्ती विक्षिन्नानि वेदगुरूनियाणि
यस्याः सा ॥२॥ दर्शनस्नानल्लानिव ॥३॥

श्रीः
भा०द०
टी०ते
२५

व्यादायमुखंविवृत्य निजरूपमास्थितामरणसमयेकपटमयुक्तंइतीवा १४ पतत्रपितस्यदेहः षट्क्रो
शमध्यवर्तिनोद्रुमान्चूर्णयामास १५ ईषालांगलदंडः तत्प्रमाणाउग्रदंष्ट्रायस्मिंस्तद्यथाभूतमास्यंयस्मि
तत्तस्याःकलेवरंवीक्ष्यतत्रगोपागोप्यश्चसंतत्रसुः संत्रासहेतुत्वेनपुनरपिविशिनष्टिगिरिकंदरव
वन्नासिकेयस्मिंस्तत् गंडशैलोपलाविवस्तनौयस्मिंस्तत्रौद्रंघोरंप्रकीर्णा अरुणाश्चमूर्धजायस्मिंस्त

निशाचरीत्थंव्यथितस्तनाव्यसुर्व्यादायकेशांश्चरणौभुजावपि प्रसार्यगोष्ठेनिजरूपमास्थि
तावज्राहतोवृत्रइवापतन्नृप १४ पतमानोपितद्देहः त्रिगव्यूत्यंतरद्रुमान् चूर्णयामासरा
जेंद्रमहदासीत्तदद्भुतं १५ ईषामात्रोग्रदंष्ट्रास्यंगिरिकंदरनासिकं ‸ बद्धसेतुभुजोर्वंघ्रिशून्यतो
यहृदोदरं १७ संतत्रसुःस्मतद्वीक्ष्यगोपागोप्यःकलेवरं पूर्वंतुतन्निःस्वनितभिन्नहृत्कर्ण
मस्तकाः १८ ॥ :गंडशैलस्तनंरौद्रंप्रकीर्णारुणमूर्धजं १६ अंधकूपगभीराक्षंपु
लिनारोहभीषणंच

त् १६ अंधकूपाविवगभीरेअक्षिणीयस्मिंस्तत् १७ पुलिनवदारोहौजघने ताभ्यांभीषणं बद्धाः
सेतवइववक्त्रस्येवग्रीवायस्मिंस्तत् शून्यतोयहृदवदुदरंयस्मिंस्तत् १७ पूर्वमेवतस्याःशब्देनभी
तापुनर्दर्शनेनातित्रस्ताइत्याह पूर्वंत्विति तस्यानिःस्वनितेनशब्देनतेननिर्भिन्नानिहृत्कर्णमस्तक
कानियेषांते १८ ॥ ॥

द्वादशांगेषु नलाजादिषु केशवादिद्वादशनामभिः २१ अनाचांताः प्रथमम् अत्तिसंभ्रमेणैव रक्षोहृत्वा किं
विहृत्वा ह्यामाः पुनः तामर्थेणा बीजन्यासमकुर्वंते स्याह संस्पृष्टसलिलाद्याचांता ह्यात्मनि प्रथमम् अंगेषु क
रयोः पृथक् अजाद्येकादशा बीजम्नं नामधेयकरषु द्वैग्रीणि करयोः सन्धिषु वनादि तथां च्याद्दावेको कस्मि

बालं च तस्या उरसि क्रीडंतमकुतोभयं गोप्यः तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः १९ यशो
दारोहिणीभ्यां ताः समं बालस्य सर्वतः रक्षां विदधिरे सम्यक् गोपुच्छभ्रामणादिभिः २० गो
मूत्रेण स्नापयित्वा पुनर्गोरजसार्भकं रक्षां चक्रुश्च शकृता द्वादशांगेषु नामभिः २१ गोप्यः सं
स्पृष्टसलिला अंगेषु करयोः पृथक् न्यस्यात्मन्यपि बालस्य बीजन्यासमकुर्वत २२ अव्यादजो
ऽङ्घ्रि मणिमांस्तव जान्वथोरू यज्ञोऽच्युतः कटितटं जठरं हयास्यः हृत्केशवस्त्वदुर ईश
इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कं २३ चक्र्यग्रतः सहगदो हरिरस्तु पश्चात्त्वत्पार्श्व
योर्धनुररी मधुहाजनश्च कोणेषु शंख उरुगाय उपर्युपेंद्रः तार्क्ष्यः क्षितौ हलधरः पुरुषः
समंतात् २४ ॥

ऽङ्गे अजाद्या बीजं न्यस्य बालस्याङ्गेषु तस्यैवाकुर्वत २२ ग्रंथिमंत्रैर्जानुजानुनी भुजं मुखं कं शिरः
२३ तथाब्दिस्वरक्षामकुर्वंस्त्रिमाह चक्र्यग्रत इति चक्रसहितो हरिः तवाग्रतोऽस्तु सहगदो गदासहि
तो हरिः तव पश्चादस्तु तव पार्श्वयोर्धनुररिधारी मधुहा अजनो जनश्च समंतात् शंखधरः उरुगा
यश्च कोणेषु क्षितौ अधस्तात् २४

एवं बहिः रक्षां कृत्वा अङ्गेन रक्षामकुर्वन्नित्याह इन्द्रियाणीति २५ आत्मानमहंकारं २६ सर्वग्रहभयंकरो
हः सहपरीवारः २७ संन्यवेशयत् शाययामास ३१ विस्मयमेवाह नूनमिति ३३ वतविस्मये

इन्द्रियाणि हृषीकेशः प्राणान्नारायणोऽवतु श्वेतद्वीपपतिश्चित्तं मनो योगीश्वरोऽवतु २५ पृ
श्निगर्भस्तु ते बुद्धिमात्मानं भगवान्परः क्रीडन्तं पातु गोविन्दः शयानं पातु माधवः २६ व्रजन्त
मव्याद्वैकुण्ठ आसीनं त्वां श्रियः पतिः भुञ्जानं यज्ञभुक्पातु सर्वग्रहभयंकरः २७ डाकिन्यो यातु
धान्यश्च कूष्माण्डा येऽर्भकग्रहाः भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः २८ कोटरा रेवती ज्ये
ष्ठा पूतना मातृकादयः उन्मादा ये ह्यपस्मारा देहप्राणेन्द्रियद्रुहः २९ स्वप्नदृष्टा महोत्पा
ता वृद्धा बालग्रहाश्च ये सर्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः ३० इति प्रणयबद्धाभिर्गो
पीभिः कृतरक्षणं पाययित्वा स्तनं माता संन्यवेशयदात्मजं ३१ तावन्नन्दादयो गोपा मथुरा
या व्रजं गताः विलोक्य पूतनादेहं बभूवुरतिविस्मिताः ३२ नूनं वतर्षिः संजातो योगेशो वा
समास सः स एव दृष्टो ह्युत्पातो यदाहानकदुन्दुभिः ३३ कलेवरं परशुभिश्छित्वा तत्ते व्रजौकसः
दूरे क्षिप्त्वावयवशो न्यदहन्काष्ठवेष्टितं ३४ दह्यमानस्य देहस्य धूमश्चागुरुसौरभः उत्थितः
कृष्णनिर्भुक्तसपद्याहतपाप्मनः ३५

सोऽयं तस्य ऋषिः तपःप्रभाववान् योगेशो वा नितरां समास सम्भवतः स एव दृष्ट इति ३३ विस्मयान्तरमाह
कृष्णेन निर्भुक्तस्य तत एव आहतः पाप्मा यस्य सः ३५

प्रसंगाद्भक्तिवैभवं कैमुत्यन्यायेनाह पूतनेति ३६ श्रद्धया प्रीत्या भक्त्या प्रेम्णा रक्ताः स्निग्धाः तन्मात
र इति वत्साहरणलीलाभिप्रायेण बहुवचनं गोपिकाः तन्मातरो भवन्निति ३७ शवधूमस्य ४१ शवस्य

पूतना लोकबालघ्नी राक्षसी रुधिराशना जिघांसयापि हरये स्तनं दत्वाप सद्गतिं ३६ किंपु
नः श्रद्धया भक्त्या कृष्णाय परमात्मने यच्छन्प्रियतमं किं नु रक्तास्तन्मातरो यथा ३७ पद्भ्यां भक्त
हृदिस्थाभ्यां वंद्याभ्यां लोकवंदितैः अंगं यस्याः समाक्रम्य भगवानपिबत्स्तनं ३८ यातुधा
न्यपि सा स्वर्गमवाप जननीगतिं कृष्णभुक्तस्तनक्षीराः किमु गावोनुमातरः ३९ पयांसि यासा
मपिबत्पुत्रस्नेहस्नुतान्यलं भगवान्देवकीपुत्रः कैवल्याद्यखिलार्थदाः ४० तासामविरतं कृ
ष्णे कुर्वतीनां सुतेक्षणं न पुनः कल्पते राजन्संसारोऽज्ञानसंभवः ४१ कटधूमस्य सौरभ्यमवघ्राय
व्रजौकसः किमिदं कुत एवेति वदंतो व्रजमाययुः ४२ ते तत्र वर्णितं गोपैः पूतनागमनादि
कं श्रुत्वा तन्निधनं स्वस्ति शिशोश्चासन्सुविस्मिताः ४३ नंदः स्वपुत्रमादाय प्रेत्यागतमुदार
धीः मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्वह ४४ य एतत्पूतनामोक्षं कृष्णस्यार्भकमद्भुतं शृ
णुयाच्छ्रद्धया मर्त्यो गोविंदे लभते रतिं ४५ श्रवंतैः सकलानीशाः पूतनायाः शिशुः कुलात् स्तन्या
योषगनतः प्राणैः प्राणाहुतिमकल्पयन् ४६ इति श्रीभागवते दशमस्कंधे षष्ठोध्यायः ६

तनामोक्षं आर्भकं अर्भकचरितमिति किं तत्पूतनामोक्षमिति ४५ इति श्रीभावार्थदीपिकायां दशम
स्कंधे षष्ठोध्यायः ६ ॥

उत्क्षिप्तशकटस्योऽस्त्रितणावर्तमथः दिपुत्र दर्शयन्निवमाम्येवहृष्टः क्रीडतिसममे कृष्णार्भकस्तथा।
सिंधुमंसवानंदनिर्भरः भूयः वदेवसंप्रहृष्टराजन्मदमिनंदति येनमत्स्याद्यवतारेणापियानियाविकर्म
णोकृयेतितानिकर्णामृतत्वाद्वृत्तानिप्रीतिकराण्येवभवंतीति १ तथापियत्प्रणवतः प्रसंगः पुरुषमात्रस्य
रतिः ग्लानिः तत्कृष्णातावृत्तिविधानलाचाप्यगच्छति तथाप्तित्वशुद्धिर्हरिभक्तिः हरिदासमत्योनिव
भवंतितदेवहारेहरेः चरितमनोहरंवावदयदिमन्यसे अनुग्रहेयदिकरोषीति प्रश्नोत्तरकेनपुनः वि

राजोवाच येनयेनावतारेणभगवान्हरिरीश्वरः करोतिकर्णरम्याणिमनोज्ञानिचनः प्र
भो १ यच्छृण्वतोपैत्यरतिर्वितृष्णासत्वंचशुद्ध्यत्यचिरेणपुंसः भक्तिर्हरौतत्पुरुषेचसख्यं
तदेववहारंवदमन्यसेचेत् २ अथान्यदपिकृष्णस्यतोकाचरितमद्भुतं मानुषंलोकमा
साद्यतज्जातिमनुरुंधतः ३ श्रीशुकउवाच कदाचिदौत्थानिककौतुकाप्लवेजन्मर्क्षयोगेस
मवेतयोषितां वादित्रगीतद्विजमंत्रवाचकैः चकारसूनोरभिषेचनंसती ४

शिनष्टिप्रश्नेति तज्जातिंमनुष्यजाति मनुरुंधतोनुकुर्वतः ३ मासदिवसर्क्षेउत्थानंशिशोर्बहिर्निर्गमं
परिवर्तनं तत्रकरणीयेकौतुकाप्लवे उत्सवाभिषेके तथातस्मिन्नेवदिनेजन्मर्क्षस्यापियोगेप्रति
सहोत्सवेसमवेतयोषितांमिलितश्रेष्ठस्त्रीणांमध्येवादित्रादिभिः वाद्यानिचगीतानिचद्विजमं
त्राश्चवाचकाश्चतैरतिशोभितमभिषेचनंकृष्णस्ययशोदाच
कार ४ ॥

अन्नाद्यैः सुपूजितैर्विप्रैः कृतमंगले संजातनिद्रे अदितिणीयस्थाने ततश्च अशोशयत् शायितवा
तीश्च कटस्याधस्तत्रैवं ५ ऊर्ध्वं चालितवान् ६ तदधः शयानस्य विभोः अल्पकस्यासौ प्रवाल
येमृदुस्पर्शयोरंघ्रिः तेनहतं शकटं व्यावर्तन विपरीतमपतत् कथंविधस्तन नानारसकुप्यभाजनेन विध्वस्ता
निनानारसवंति स्ववर्णरजनातिरिक्तकांस्यादिमयानिरिक्तानि यथाभवंति तथावक्रे चाद्वाशवक्रा

नंदस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः अन्नाद्यवासःस्रगभीष्टधे
नुभिः संजातनिद्राक्षमशीशयत्कृते ५ औत्थानिकौत्सुक्यमनामनस्विनी समागतान्
पूजयती व्रजौकसः नैवाशृणोद्वै रुदितं स्तनपः स रुदन्स्तनार्थी चरणावुदक्षिपत् ६
अधःशयानस्य शिशोरनोल्पकप्रवालमृद्वंघ्रिहतं व्यवर्तत विध्वस्तनानारसकुप्यभा
जनं व्यत्यस्तचक्राक्षविभिन्नकूबरं ६ दृष्ट्वा यशोदाप्रमुखा व्रजस्त्रिय औत्थानिके कर्म
णि याः समागताः नंदादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ७
ऊचुरव्यवसितमतीन्गोपान्गोपीश्च बालकान् रुदतानेन पादेन क्षिप्तमेतन्न संशयः ८

दाविन्यस्ताः वक्राद्या यस्मिन्विभिन्नः कूबरो युगंधरो यस्य तत्स्वयं यथा व्यावर्ततेति ६ अद्भुतदर्श
नेनाकुला व्यग्राः तदेवाह कथमिति विपर्यगात् विपरीतमपतदिति ७
अनिश्चितबुद्धीन् ८ ॥

श्री:
भा॰ द॰
स्क॰ टी॰
५८

न स्प्रह्यधिरे विश्रामं न जग्मुः तताऽपि बालस्यैतन्न संभवति पतेच बालाः किं ज्ञानं तत्तीति प्रथमे पंचमाब्दम
प्राप्तं ११ हिजैः रक्षोघ्नैः कृत्वा १२ भगवत्प्रभावानभिज्ञविप्रचेष्टितं विशेषयन्नाह सर्ववदित्यादिना
बलिभिः हिजैः यद्वा प्रहस्तादिद्रव्यबलिभिः सहितं सपरिकारं यथा पूर्वं स्थापितं विप्राह ध्यादिभिर्वा

मेते स्त्रस्य धिरे गोपा बालभाषितमित्युत प्रथमे यं बलं तस्य बालकस्य न ते विदुः ११ रुदंतं स्व
तमादाय यशोदा ग्रहशंकिता कृतस्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् १२ पूर्ववत्स्था
पितं गोपैर्बलिभिः सपरिच्छदं विप्रा हुत्वार्चयांचक्रुर्दध्यक्षतकुशांबुभिः १३ येऽसूयानृत
दंभेर्ष्याहिंसामानविवर्जिताः न तेषां सत्यशीलानामाशिषो विफलाः कृताः १४ इति बा
लकमादाय सामर्ग्यजुरुपाकृतैः जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः १५ वाच
यित्वा स्वस्त्ययनं नंदगोपः समाहितः हुत्वा चाग्निं द्विजातिभ्यः प्रादादन्नं महागुणं १६
गावः सर्वगुणोपेताः वासः स्रग्रुक्ममालिनीः आत्मजाभ्युदयार्थाय प्रादात्ते चान्वयुंजत
१७

यामास हुत्वा ग्रहादिहोमं विधाय ११ असूयागुणेषु दोषाविष्करणं ईर्ष्या असहनं तिः तेषामाशिषो
विफलाः कृताः ते प्रयुक्ता इति निष्फला न भवंति १२ इत्येवमभिप्रेत्य सामर्ग्यजुर्भिरुपाकृतैः संस्कृतैः पवि
त्रौषधयः जलैः तद्विहितोत्तमैः कृत्स्नैः अभिषिच्य अभिषेकं कारयित्वा १३ गावः मासुप्रादात्
अन्नं तत्र शिषो युयुजे १४

५८

तोलनंतथैवबभूवुरित्यर्थः १७ अन्यदपिबालचरितमाह तृणावर्तस्यमृत्युपरिहारायहन्तुंतेनैवात्मनउ।
त्संगाद्दूरत्रायहन्तुंतेभारमजानतीउत्पातशंकयामहापुरुषमादध्यौभारेणपीडिताविस्मितावसतीयदाज

विश्रामंचविद्वीयुक्ताः नैर्याः श्लोकाः तथाशिषः नानिष्फलाभविष्यंतिनकदाचिदपिस्फुटं
१८ एकदारोहमारूढंलालयंतीसुतंसती गिरिमाणंशिशोर्वोढुंनसेहेगिरिकूटवत् १
उत्क्षिप्यश्रुत्पादेनशकटंव्योम्निलीलया तृणावर्तंयदापीड्यभुविपातयदर्भकः १७ भूमौ
निधायतंगोपीविस्मिताभारपीडिता महापुरुषमादध्यौजगतामासकर्मसा १९ दैत्योना
म्नातृणावर्तःकंसभृत्यःप्रचोदितः चक्रवातस्वरूपेणजहारासीनमर्भ
कं १९ गोकुलंसर्वमावृण्वन्मुष्णंश्चक्षूंषिरेणुभिः ईरयन्सु
महाघोरशब्देनप्रदिशोदिशः २० मुहूर्तमभवद्गोष्ठंरजसात
मसावृतं सुतंयशोदानापश्यत्तस्मिन्न्यस्तवतीयतः २१ ना
पश्यत्कश्चनात्मानंपरंचापिविमोहितः तृणाव
र्तनिसृष्टाभिः शर्कराभिरुपद्रुतः २२ ॥

गतोमध्येकंसस्यग्राममवष्टब्धवनन्तजगद्दूरंनेवदेत्यर्थः १९ ईरयन्निनादयन्नित्यर्थः २० यतोयत्रन्यस्त
वतीतस्मिन् स्थानेनापश्यत् २१ ॥

श्रीः
भा० द
टी०
२९

पांसुवर्षेमति २३ उपावृत्तो निवृत्तः पांसुवर्षस्य वेगो यस्मिंस्तथाभूते पवने सति तत्र तस्या रुदितं श्रुत्वा निशम्य गोप्योऽक
रुरुः २४ बाधावकत्वात्ः तन्तु पृथुरः कृष्णहृत्त्वशोत्तरयस्कथंचिन्नभोगतः ततः परं गंतुं न शक्नोदित्यर्थः २५ गुरु
मत्तया अतिगौरवेण तथावष्टब्ध्या नेतुमसमर्थं तं पर्वतसारं मन्यमानः तेनैवात्मनो गले गृहीतत्वात्सोऽकमिच्छन्नपि नाशक्नो

इति खरपवनचक्रपांसुवर्षे सुतपदवीमबलाविलक्ष्यमाता अतिकरुणमनुस्मरंत्यशोचद्भुविप
तिता मृतवत्सका यथा गौः २३ रुदितमनुनिशम्य तत्र गोप्यो भृशमनुतप्तधियोऽश्रुपूर्णमुख्यः
रुरुदुरनुपलभ्य नंदसूनुं पवन उपारतपांसुवर्षवेगे २४ तृणावर्तः शांतरयो वात्यारूपधरो हः
रन् कृष्णं नभोगतो गंतुं नाशक्नोद्भूरिभारभृत् २५ तमश्मानं मन्यमान आत्मनो गुरुमत्तया ग
ले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकं २६ गलग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः अव्यक्तरावो
न्यपतत्सह बालो व्यसुर्व्रजे २७ तमंतरिक्षात्पतितं शिलायां विशीर्णसर्वावयवं करालं पुरं यथा
रुद्रशरेण विद्धं स्त्रियो रुदंत्यो ददृशुः समेताः २८ प्रादाय मात्रे प्रतिहृत्य विस्मिताः कृष्णं च तस्योरसि
लंबमानं तं स्वस्तिमंतं पुरुषादनीतं विहायसा मृत्युमुखात्प्रमुक्तम् २९

दित्यर्थः २८ तस्योरसि लंबमानं कृष्णमादाय मात्रे प्रतिहृत्य समर्प्य विस्मिताः सत्यो बभूवुः विहायसा गगनमार्गे
ण पुरुषादेन नीतं तथापि मृत्युमुखात्प्रमुक्तं पुनर्लब्ध्वा मोदं प्रापुरिति परस्परं हर्षकथामाहुः २९

राम

अहोबतेतिनिवृत्तिंगमितः मृत्युंप्रापितः कोऽत्रविस्मयइत्यतआह नैषएवकेचिदाहुः हिंस्रइति ३० नोऽस्माभिः
चीर्णंकृतं पूर्तंवापीकूपतडाकादिनिर्माणं इष्टंपंचयज्ञाग्निहोत्रादि दत्तंदानंयेनयद्यस्मात् तपआदेः प्रणयन् ह

अहोबतात्यद्भुतमेषरक्षसाबालोनिवृत्तिंगमितोऽभ्यगात्पुनः ३० हिंस्रःस्वपापेनविहिंसितःखलसा
धुःसमत्वेनभयाद्विमुच्यते ३१ किंनस्तपःचीर्णमधोक्षजार्चनंपूर्तेष्टदत्तमुतभूतसौहृदम् यत्सं
परेतःपुनरेवबालकोदिष्ट्यास्वबंधून्प्रणयन्नुपस्थितः ३२ दृष्ट्वाद्भुतानिबहुशोनंदगोपोबृहद्वने
वसुदेववचोभूयोमानयामासविस्मितः ३३ एकदार्भकमादायस्वांकमारोप्यभामिनी प्रस्नुतंपा
ययामासस्तनंस्नेहपरिप्लुता ३४ पीतप्रायस्यजननीमातस्यरुचिरस्मितं मुखंलालयतीराज
न्जृंभतेददृशेइदं ३५ तृणावर्तागमेहृष्टगोरवाशंकिनीपुरं बोधयन्दर्शयामासजृंभमाणो
मुखेजगत् ३६ खंरोदसीज्योतिरनीकमाशाःसूर्येंदुवह्निश्वसनांबुधींश्च द्वीपान्नगांस्तद्दुहितॄ
र्वनानिभूतानियानिस्थिरजंगमानि ३७ सावीक्ष्यविश्वंसहसाराजन्संजातवेपथुः संमील्यमृग
शावाक्षीनेत्रेआसीत्सुविस्मिता ३८ इतिश्रीभागवतेदशमस्कंधेसप्तमोऽध्यायः ७ ॥ ॥

र्षयन् ३१ संस्मृत्यनात्रगोकुलेइति वचनंमानयामास ३३ पीतप्रायस्यपीतप्रायेणस्तन्यतोयेन ३५ ना
गान् गिरीन् तद्दुहितॄः ३६ ३७ ३८ इतिश्रीभावार्थदीपिकायांदशमस्कंधेसप्त
मोऽध्यायः ७ ॥ राम ॥

श्रीः
भा॰ द॰
स्कं॰ टी॰
८॰

अष्टमेनामकर्मास्यबालक्रीडाकृष्णहे मृद्भक्षणाभियोगेचविश्वरूपंनिरूप्यते विश्वरूपादिबालस्यनिगूढमस्यशं
कितपिता नामकृद्गर्भवाक्येननिर्जितस्वेष्टमप्युवत् नामकृत्स्वामीगर्गवाक्येननिर्जितत्वमसम्भवचमत्कटीक्कारः
पूर्णः चेत्कथंधनिनोगृहमागतः तत्राहमहद्विचलनमिति महतांस्वाश्रमात्स्वतपोवनाद्न्यत्रविचलनंनस्वा
र्थंकिंतुगृहिणांमंगलाय ननुतर्हितेएवमहद्दर्शनार्थंकिमितिनागच्छंतितत्राहदीनचेतसोकृपणानांदशा।
मपिगृहंत्यक्तुमशक्नुवतामित्यर्थः ४ त्वयाबालयोर्नामकरणादिकरणीयमितिवक्तुंनक्षत्रातिशयमाह

शुकउवाच गर्गःपुरोहितोराजन्यदूनांसुमहातपाः व्रजंजगामनंदस्यवसुदेवप्रचोदितः १
तंदृष्ट्वापरमप्रीतःप्रत्युत्थायकृतांजलिः आनर्चाधोक्षजधियाप्रणिपातपुरःसरं २ सूपविष्टंकृ
तातिथ्यंगिरासूनृतयामुनिं नंदयित्वाब्रवीद्ब्रह्मन्पूर्णस्यकरवामकिं ३ महद्विचलनंनृणां
गृहिणांदीनचेतसां निःश्रेयसायभगवन्कल्पतेनान्यथाक्वचित् ४ ज्योतिषामयनंसाक्षाद्यत्त
ज्ज्ञानमतींद्रियं प्रणीतंभवतायेनपुमान्वेदपरावरं ५

ज्योतिषामयनमितियदतींद्रियंज्ञानंतत्सुखंज्योतिषामयनंतत्प्रतिपादकंज्योतिःशास्त्रमित्यर्थः तत्साक्षाद्भवता
प्रणीतंयेनान्योऽपिपुमान् परावरंपरंकारणंपूर्वजन्मकृतंकर्मअवरंकार्यंयदस्मिन्जन्मनिभाविफलंतद्वेदउक्तं
वज्जातके यदुपचितमन्यजन्मनिशुभाशुभंतस्यकर्मणःपंक्तिं व्यंजयतिशास्त्रमेतत्तमसिद्रव्याणि।
दीपइवेति विवक्षितमाहत्वंहीति ५ ॥ ५

देवत्तो मे त्र विषयत्वे नामकरणादिसंस्कारं कर्तुमर्हसीत्यर्थः नन्वतत्करणीयं गुरुणा तत्राह नृणामिति ८
श्रेयस्तत्साहितं नेदं प्रतिग्रहमेतत्कार्यमितिाशयेणाशत्याचक्षाणइवाह यदूनामिति भवतु तथापि त्वमरा
चार्य इति को विघात इति चेत् तत्राह ख्यातश्चेति ततः किमहमत्रेति किं मे मन्येत अन्यद्गतं कल्पयेदित्यर्थः
॰ ननु पयडकुमार इति कथं विज्ञानानन्तु वसुदेवस्य पुत्रः तस्यापि देवक्यां जात इति कुतो ज्ञानीयात्तत्राह
पापमितिरित्यादि ९ किमयाहूनयामं नेमादि देवक्कीकन्यावचः श्रुत्वा देवक्या अष्टमो गर्भो न स्त्री भवित

तेहि वसविदां श्रेष्ठः संस्कारं कर्तुमर्हसि बालयोरनयोर्नृणां जन्मना ब्राह्मणो गुरुः ८ ग
र्गः यदूनामहमाचार्यः ख्यातश्च भुवि सर्वदा सुतं मया संस्कृतं ते ते मन्यते देवकीसुतं ७ कंसः पापा
मतिः सख्यं तव चानकदुन्दुभिः देवक्या अष्टमो गर्भो न स्त्री भवितुमर्हति ८ इति संचिन्तयन्
श्रुत्वा देवक्या दारिकावचः अपि हन्ता गताशङ्कः तर्हि तन्नो नयो महान् ९ नेदः अलक्षितो
स्मिन्नहमिमामकैरपि गोव्रजे कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्वकं १० ॥ ॥

मर्हतीति वनितात्वं संचिंतयन् मामन्येत क्वचिद्दस्तीति ज्ञात्वा पुत्रयोस्तु सख्यं चिंतयन् त्वद्गृहे भवेदिति संभा
व्य मत्संस्कारलिङ्गेन त्यागताशङ्कः आगताया आशङ्का यस्य सोपि हन्ता यदि हनिष्यति तर्हि तन्न
दानीं महाननयः स्यात् ११ द्विजातिसंस्कारं द्विजातीनामवश्यकर्तव्यसंस्कारमा
यकं वलस्वस्तिवाचनपूर्वं कुर्वीति १० ॥

श्री: यदूनामपृथग्भावात् ऊनः विद्वत्तोर्विप्रतिपद्यमानानां यदूनामपृथग्भावात् भावोभावोनूनस्मादन्यान्य।
भा·द· त्वय्यसवैकमतिकरणादित्यर्थः समस्पक्षरूपंस्वीकरोतिसंकर्षणमप्युशंतिमन्यंतीत्यर्थः गर्भसंकर्षणात्तु नय
स्कं·टी कास्ययतिप्रागयंवसुदेवस्यजातःक्वचित्तवात्मजाः इतियस्यत्वतवपुत्रस्याग्रजः श्रीकृष्णइतिपकनाममभविष्य।
५५ ति त्व प्रागयमितिसामायोजन्यास्यपियंजन्मांतरगतेनामकथयतीतिनिंदोमन्यतेस्यअतपनवासुदेवइ

शुकउवाच एवंसंप्रार्थितोविप्रः स्वचिकीर्षितमेवतत् चकारनामकरणंगूढोरहसिबालयोः
११ अयंहिरोहिणीपुत्रोरमयन्सुहृदोगुणैः आख्यास्यतेरामइतिबलाधिक्याद्बलंविदुः
यदूनामपृथग्भावात्संकर्षणमुशंत्युत १२ आसन्वर्णास्त्रयोह्यस्यगृह्णतोनुयुगंतनूः शु
क्लोरक्तस्तथापीतइदानींकृष्णतांगतः १३ प्रागयंवसुदेवस्यजातःक्वचित्तवात्मजः वासु
देवइतिश्रीमानभिज्ञाःसंप्रचक्षते १४ बहूनिसंतिनामानिरूपाणिचसुतस्यते गुणकर्मानु
रूपाणितान्यहंवेदनोजनाः १५ एषवःश्रेयआधास्यद्गोपगोकुलनंदनः अनेनसर्वदुर्गा
णियूयमंजस्तरिष्यथ १६

ति संप्रचक्षतेइति १४ गुणानुरूपाणिईश्वरः सर्वज्ञइत्यादीनिकर्मानुरूपाणिगोपतिःगोवर्धनोद्धरा
णइत्यादीनिसर्वाण्यहमपिनोवेदजनास्तुनैवविदुरिति १५ नामकफलमाह एषेतिश्रे
यआधास्यत् आधास्यतिअनेनयूयं
अंजसैव १६ ॥ ५५

श्रवेनसरदमाणाः सर्वे पिनाश्चदम्भत्वजिरगुगिनि १७ इतिवाल्मानंप्रतिसमादिश्यपश्यान्नानेहसंवाहणोमा
शिवामाषीभिःपलोभूते २० तन्यापविमेवदर्शयत्नाहकालेनेति २१ अनुकूलपुनःपुन हृष्यसंशीहंपने
श्रुतिप्रायेनवलेनौ कथंवोवाकटिपादश्रवणाकिंकिमः तेषांप्रवोधाणाकृविरेयथ्यानयायोघोषाणांनेषां

यथनस्मि
इत्यनेनव्रजपतिस्माधवोदस्युपीडिताः आज्ञकेवत्समाणाजिगुहेमत्तमेधिताः १७ यथनस्मि
महाभागाः प्रीतिंकुर्वंतिमानवाः नारयोभिभवंत्येनाविस्मुपत्नानिवाहताः १८ तस्मान्नंदात्म
नोप्येतेनारायणसमोगुणैः श्रियाकीर्त्यानुभावेनगोपायस्वसमाहितः १९ इत्यात्मानंसमादि
श्यगर्गेचस्वगृहंगते नंदः प्रमुदितोमेनेआत्मानंपूर्णमाशिषां २० बालक्रीडचमकावेतुलो
रामेणसंयुतैः यमानंदमादवव्रजेनेदयथोदयोः २१ कालेनवजतानल्पेनगोकुलेरामकेश
वौ जानुभ्यांसहपाणिभ्यांरिंगमाणौविजह्रतुः २२ तावंघ्रियुग्ममनुकृष्यसरीसृपंतौघोषप्रघो
षरुचिरंव्रजकर्दमेन तन्नादहृष्टमनसावनुसृत्यलोकंमुग्धप्रभीतवदुपेयतुरंतिमात्रोः २२
नादेनप्रीतौमनोयथौः तौलोकंननस्तनोगत्वेनमनुसृत्यत्रिवत्सराणिपदानि अनुपेगम्य मुग्धवत्सभी
नवत्समाश्रोनेतिकंसीपमुपेयतुः २३ ॥ २३
राम ॥

श्रीः
भा० द०
श० टी०
३२

तदा तन्मातरौ निजसुतौ दोर्भ्यां उपगूह्य प्रमोदं ययतुः कथंभूतौ घृणया कृपया नितरां स्नुवंत्यौ पयः क्षरणीयपयोधरे
सन्तौ पंकेनांगरागेण रुचिरौ कथंभूतं निरीक्ष्य मुग्धस्मितं दंसितं यस्मिन् तन्मुखं २४ यर्हि यदंगनाभिः दर्शनी
नीयां कुमारलीला ययोः तौ तथाभूतौ जातौ तदा अन्तर्व्रजे व्रजस्य मध्ये तदबला व्रजांगनाः प्रेक्षन्त्यः प्रेक्ष

तन्मातरौ व्रजसुतौ घृणया स्नुवन्त्यौ पंकांगरागरुचिरावुपगृह्य दोर्भ्यां दत्वा स्तनं प्रपिबतोः स्म मुखं
निरीक्ष्य मुग्धस्मिताल्पदशनं ययतुः प्रमोदं २४ यर्ह्यंगनादर्शनीयकुमारलीलावन्तर्व्रजे तद
बलाः प्रगृहीतपुच्छैः वत्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षन्त्य उज्झितगृहा जहृषुर्हसन्त्यः
२५ शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटकेभ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं गृह्याणि कर्तुमपि
यत्र न तज्जनन्यौ शेकात आपतुरलं मनसोनवस्थां २६ कालेनाल्पेन राजर्षे रामः कृष्णश्च गो
कुले अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा २७ ततस्तु भगवान् कृष्णो वयस्यैर्व्रजबालकैः स
ह रामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदं २८

माणा विस्मृतगृहकृत्याः हसन्त्यो जहृषुः हर्षं बभूवुः ताभ्यां प्रगृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनु
कृष्यमाणौ २५ क्रीडापरावतिचलौ तौ शृंग्यादिभ्यो निषेद्धुं गृहोचितानि कर्माणि कर्तुं यत्र यदा न
शेकातेन तयोः मातरौ समर्थे न बभूवतुः तदा अलं मनसोऽनवस्थां अस्थितिं आपतुरिति गृहसौख्यस्य
पराकाष्ठा दर्शिता २६

समसमये प्रदोषकाले यदा क्रोधपतने तर्हि संजातहासः स्वैर्थवीर्यार्जितेन नन्दनेन तथापि सर्वं
दुवेनरत दयितप्रयत्नप्रतिकिं वभोहपन् मर्कान्मर्कटान् प्रतिविभज्य दत्तानि तेषामथो
दुमन्तेन काचिनानि तेन हि भांडभिनत्ति स्मिन्का विदुर्वस्यालाये स तिस शृणात्यदामीति प
वं कुपितो याति यदा सगृहा गृहिणः तेभ्यः कुपितः तेषां लोकान् यथेकाग्निष्वप्रपको
दृपघटयित्वा नालेविदार्य दत्तो वाट शयानीति मानये शुद्धे वयि किं त्रुमः किंवा कर्मः गृहवा

हृस्वमेतापयकविरेवीहपको मारवापलं शृणुत्वेयः किलतन्मात्तरितिहा वुःस
मागताः २८ हस्तवापल्यवोर्यातिस हेवाविलसद्यतः प्राजल्पेत्यसमात्
त्यगोप्याभोपे हुटेदडः २९ वत्साञ्मुञ्चन्नकाले चिरसमयप्रोशासे जातहासः स्व
यस्याह स्पशदयितयः कल्पितैः स्तेययोगैः मर्कान्भोक्ष्यान्विभजति सचेन्नाति
भांडभिनत्ति द्रव्यालाभे सगृहकुपितो यात्युपक्रोश्य तोकान् ३० हस्ताग्राह्ये
पुनः रचयति विधिं पीठकोलूखलाद्यैः छिद्रं ह्यन्तर्निहितवयुनः शिक्यभाण्डेषु तद्वि
त् ध्वान्तागारे धृतमणिगणं स्वांगमर्थप्रदीपं काले गोप्यो यर्हि गृहकृत्येषु सु
व्यग्रचित्ताः ३१

पारान् कर्तव्यक्रमः ३१ सत्रुहस्ताग्रेह्यतस्तैः स्थापितेदध्यादिभांडे किं करोतिवा
लइनिधेन ग्राह कल्पितैः स्तेययोगैरित्युक्तं प्रपंचयति हस्ताग्राह्य इति तत्र शिक्या
स्थभांडेषु अन्तर्निहितेदध्यादौ वयुनं ज्ञानं यस्य सः छिद्रं रचयति नतद्वित् छिद्रं रचना
दिविन ध्वान्तगुप्तं गृहस्वांगमर्थप्रदीपं रचयति विभावत्ते धृतमणिगणं कटेवका
ति यर्हि यस्मिन्काले गोप्यो गृहकृत्येषु सुव्यग्रचित्ता यासांताः ३१ ॥

श्री॰
भा॰ २॰
स्कं॰ टी॰
३३

रेरेचौरेति प्रकृतः स्मरन् यान्यान्नितरां छितिजलादृङ्मेव चौरः प्रहेरुहस्ताभीतादीनि याथी
निपुणगर्गोणानि प्रयत्नात् तुरीतिहेतुष्णातिकमनीयभार्यत्वात् यहाउष्णातिवाललाखविनिष्ट
हेमेहतनादीनि पूर्वाह्णिस्मगीटीतिकृतेनेलयाघायविरवितामृकृतिः कमेथेनमः नतस्मीप
स्तपनीकोयथामधुरिवालस्मनयेतयतेयसिंश्रुतत् श्रीशुकंस्तलंतदालोकिनीभिःत्या

एवंयाथाम्पृष्णातिकृतेनेमहनादीनिवालो लेयोपायेविरविनकृतिलपनी
कोयथास्त इत्यंमत्रीभिःसमयनयनश्रीशुकालोकिनानीभिर्योद्यानाथाप
हस्मिनस्तलीनाहुपालब्धमेकृत ३२ एकदाक्रीडमानास्तेरामाद्यागोपदारकाः
कृत्वमस्मइत्यंहितवानितिमाअमवेरयत ३३ सागृहीत्वाकरेकृत्मगुपालभ्यहि
नेपिणी हष्टोदाभयसंभ्रान्तप्रेक्षणाक्षंसमाभाषत ३४ रेरेकृतस्तथातान्दहदृष्टम
हितवानसि रहः चपलबालेयथाघ्रातनमभत्सयत ३५ ॥ ॥

लोलार्थमनीषमलोपितजनकस्याउपलभ्यमातेयनिर्भिलितवानेकृत ३३ कदावि
दपणयोनरेउपलभतनदालमहदाशुयंमधुरिति कथयन्नाह एकदेति ३३ उपालम्भ
निभर्त्सयमेयनमभ्यातेप्रेनलोचपलनिरीदलोप्रतिलीयस्यते ३४ अंदाभालान् चपल
गात्ररहः एकाते ३५ ॥

गुरु

नाहं भक्षितवानिति नहि वा त्यं किं विस्मयाभट्यते मत्कृतावादेव सर्वमस्तीति भावः समक्षं प्रपश्ये ३६
न चेतस्मिन्मुखे विश्वं ददृशे प्रोदरदर्शितमप्यं चयति जगत् जंगमं स्थास्नु स्थावरं खं मेनकदिशमाद्रिद्वीपाब्धिगोले
पर्वतद्वीपसमुद्रसहिते भूगोले भूर्लोके वायुः प्रवहः अग्निः वैद्युतादिं ज्योतिश्चक्रं तारकाश्चनक्षत्रसहिते ३७ ज्योतिः
वक्रं स्वर्लोकं वैकारिकाणि देवाः मन इति वैकारिकग्राह्येन गृहीतमपि देवा वैलक्षण्यात् पुनरुक्तं इन्द्रिया

नाहं भक्षितवानंब सर्वे मिथ्याभिशंसिनः यदि सत्यगिरः तर्हि समक्षं पश्य मे मुखं ३६ यद्येवं तर्हि
व्यादेहीत्युक्तः स भगवान् हरिः व्यादत्ताव्याहतैश्वर्यः क्रीडामनुजबालकः ३७ सा तत्र ददृशे
विश्वं जगत्स्थास्नु च खं दिशः साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नीन्दुतारकं ३८ ज्योतिश्चक्रं जलं तेजो
नभस्वान्वियदेव च वैकारिकाणीन्द्रियाणि मनो मात्रा गुणास्त्रयः ३९ एतद्विचित्रं सह जीव
कालस्वभावकर्माशयलिंगभेदं सूनोस्तनौ वीक्ष्य विदारितास्ये व्रजं सहात्मानमवाप शंकां
४०

णि च तैजसानि मात्राः तामसाः प्राणादयः ३९ एवं एतद्विचित्रं विश्वं सह एकदैव वीक्ष्य विस्मयमाप्याह । जीवश्च
गुणक्षोभकः कालस्तु परिणामहेतुः स्वभावस्तु जन्महेतुः कर्म च तत्संस्काराः आशयश्च एते लिंगानां वरा
वरशरीराणां भेदो यस्मिन् तत् तं व्रजं च महात्मानं स्वसहितं च विहीक्ष्य सूनोस्तनौ अस्य विदारिते आस्ये
शंकमवाप ४० ॥

श्रीः
भा॰ द॰
स्॰ टी॰
३४

तमाहकिंस्वप्नइति पविनोविलोक्यविकल्प्याह नायंस्वप्नः तर्हिकिंदेवाम्याहरेर्मायानथावाकिमन्येनप
श्यंतितर्हिकिंवामदीयएवकश्चिद्बुद्धिमोहः विपर्यासोदर्पणोमुखवत् एवंतर्हिअयंपुत्रस्योपिकस्यमेतः
प्रतीयते अंतर्बहिश्चैकरूपेणकथंनगतप्रतीयतेतथाप्यतिविविधानिविचेयोनिवपरस्परंवोपरीतेनप्रती
तिः स्यादित्याशंक्याप्यप्यावितर्कयति अथोइतिअथवाममअमुष्यअर्भकस्यापिसतोयः कश्चनौत्पि
त्मयोगः स्वीयमैश्वर्यंऔत्पत्तिकः स्वाभाविकः ४१ एवमपत्तमाश्चित्यप्रथमेवस्वरूपमितिनिश्चित्याह अथो

किंस्वप्नएतदुतदेवमायाकिंवामदीयोवतबुद्धिमोहः अथोअमुष्यैवममार्भकस्ययः कश्चनौ
त्पत्तिकआत्मयोगः ४१ अथोयथावन्नवितर्कगोचरंचेतोमनः कर्मवचोभिरंजसा यदा
श्रयंयेनयतः प्रतीयतेसुदुर्विभाव्यंप्रणतास्मितत्पदं ४२ अहंममासौपतिरेषमेसुतोव्रजे
श्वरस्याखिलवित्तपासती गोप्यश्चगोपाः सहगोधनाश्चमेयन्माययेत्थंकुमतिः समेगतिः
४३

इतिचेत् चित्तंचित्तादिभिर्नवितर्कगोचरंजगद्यदाश्रयंयदधिष्ठानंयेनकारणेनअधिष्ठानायनोबुद्धिश्च
मिव्यक्तात् नविद्यमवित्किंभूतंतत्स्वरूपंकीदृग्जगत्स्वाह सुदुर्विभाव्यमिदंअयतमवितर्क्यमित्यर्थः
४२ एवंअयंचप्रतीत्यनीतिन्तदमपुनर्जीवसंसृतिहेतुमायाश्रयनेनानेनद्वयंमाह ४३ ॥
राम

ब्रह्मेति यशोदा नामाह अमी मम पतिः अमुष्य त्वं नेत्रं अस्याखिल विश्व पात्र धिष्ठात्री अहं ते ना या पय स्तुको मे
सुतः सोप्युः मदीयाइतीयं कुमतिः यमाययासपद्ममेश्वरणमिति शर्वश्लोकटीका ४६ वैसवीक्षीयां ४५
अरोहमुत्संगयत्र हृत्स्वेहेन कलिलं आमहृदयेयमः सा पुरेवासीत् ४८ मायाबलादिकमाह त्रय्याइन्द्रा
दिभिर्वेणा उपनिषद्भिर्ब्रह्मेति सांख्यैः पुरुष इति योगैः परमात्मेति सात्वतैर्भगवानिति उपगीयमानं माहात्म्य

इस्यं विदितस्तत्त्वायां गोपिकायां सईश्वरः वैस्नवीं व्यतनोमायां पुत्रस्नेहमयीं विभुः ४५ सद्यो
नष्टस्मृतिर्गोपी सारोप्यारोहमात्मजं प्रवृद्धस्नेहकलिलहृदयासीद्यथा पुरा ४६ त्रय्याचोप
निषद्भिश्च सांख्ययोगैश्च सात्वतैः उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजं ४७ राजोवाच
नंदः किमकरोद्ब्रह्मन् श्रेय एवं महोदयः यशोदा च महाभागा पपौ यस्याः स्तनं हरिः ४८ पितरौ
नान्वविंदेतां कृष्णोदारार्भकेहितं गायंत्यद्यापि कवयो यल्लोकश
लापहं ४९

यस्य तं ४० अतिविस्मयेन पृच्छति नंद इति महोदयः महानुदय उद्भवो यस्य तत् ४८ यद्योः प्रसन्नः सन्नेव
नीर्णः सौ पितरावपि यत् नान्वविंदेतां नप्राप्नुवतां कृष्णस्य उदारं महत् अर्भकेहितं बाललीलां यत्स्वकवयो
गायंति यदद्यापि कथ्यतेलोकमलापहं कृत्वाकीर्तितं पठितं सत् लोकानां मलं पापं अपहरतीत्यद्याविं
दमस्यत्वं मन्नुवन् न सर्वं कृतं श्रुत्वा नंदो यशोदा वा ४९

श्रीः
भा॰दी॰
द॰टी
३५

ब्रह्मण आदेशं गोपालनादिलक्षणं ५० द्रोणो जाते स वु नंद इति विख्यातः सा च धरा यशोदाभवत् अस्मिंश्च
कृष्णे ब्रह्मण्ये देहिनि वा ५२ गोपगोपीनामपि वस्तुस्वभावादस्यैव भक्तिः तयोः पुनः किं वक्तव्यमिति ५३ स्वलील
या पुत्रभावानुकारिण्या ५४ ॥ इति श्रीभावार्थदीपिकायां दशमस्कंधे अष्टमोध्यायः ८ नवमे पयउ
त्सिक्ते गत्वा गोप्यपतत्कृतं विलोक्य भांडभंगादि कुले धाम्ना बबंध तं ततः दयार्द्रितो विमुक्तः दृष्ट्वा विस्मित

शुक उवाच द्रोणो वसूनां प्रवरो धरया सह भार्यया करिष्यमाण आदेशं ब्रह्मणस्तमुवा
च ५० जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत् ५१
अस्त्वित्युक्तः स भगवान् व्रजे द्रोणो महायशाः जज्ञे नंद इति ख्यातो यशोदा सा धराभवत् ५२
ततो भक्तिर्भगवति पुत्रीभूते जनार्दने दंपत्योर्नितरामासीद्गोपगोपीषु भारत ५३ कृष्णो ब्रह्म
ण आदेशं सत्यं कर्तुं व्रजे विभुः सहरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ५४ इति श्रीभाग
वते दशमस्कंधे अष्टमोध्यायः ८ ॥ शुक उवाच एकदा गृहदासीषु यशोदा नंदगेहिनी
कर्मांतरनियुक्तासु निर्ममंथ स्वयं दधि १ यानि यानीह गीतानि तद्बालचरितानि च दधिनिर्मंथ
ने काले स्मरंती तान्यगायत २

वेतसः बन्धनत्वं गुलाभ्यां मर्णानाम वक्तव्यं यत् स्वयं दधि निर्ममंथ तदा वा गायते तिव कारान्वयः
गम

तवनहंवंवीवहंवजोराकर्णोनस्रमोयपेस्वलंनेनोकंकणोवकवसहिगलयोमालयोयस्याः स्य ३ स्य रहः एकोनेन
धिश्रितोवल्लीमारोपितेश्रुतिनापेनोस्तिव्यमाने ५ दृषदमुनाशिलापत्रेणश्रेतशृंहमध्यंगतः

दौमंवासः श्रुकटितटेविश्रतीस्वयवहंपुवस्तिरूऊवधुगंजानकंपंचस्वत्रुः गव्याकर्षश्रमभुग्न
वलवंकणोकंऊरलेव स्विन्नंवक्रंकववविगलन्मालतीनिर्मंमंथ ३ तोस्तमकामश्रासाघमश्लेनी
वनेनीहरिः शुद्धीनादधिमथ्यानेस्येधत्सीतिमावहन् ४ तमेकमारहृदमपाययत्स्तनेस्तेरहव
तेसस्मितमीक्षतोमुवं श्रतमप्रमुतस्तनवेनमायपावुत्स्विव्यमानेपयसिहृधिश्रिते ५ समानके
पस्फुरितारुणाधरः संदश्यदछिर्दधिमंथभाजनं भिन्नाश्मषाश्रुदृषदश्मनारहोजघासहैयंगव
मंतरंगतः ६ उत्तार्यगोपीसुश्रुतंपयःपुनः प्रविश्यसंदृश्यवदथ्यमत्रकं भग्नंविलोक्यस्वसुतस्य
कर्मतज्जहासतंचापिनतत्रपश्यती ७ उलूखलांघ्रेरुपरिव्यवस्थितंमर्कायकामंददतंशिचिस्थितं
हैयंगवंस्तेयविशंकितेक्षणंनिरीक्ष्यपश्चात्सुतमागमच्छनैः ८

वनीनममवत्यत ६ सशृतंस्तनमङ्गन्नार्थदधिमंथ्यानेस्थानेप्रविश्यभिन्नंसंदृश्यदृष्टुादध्यमत्रकंचदौ
७ उलूखलांघ्रेः परिवर्तितस्योपरिविशिकेवैयेणाविशंकितंचवलेर इतणेयस्थितं ८ ॥
नम

श्री: तपसा प्रकाशगुणेऽपि निर्मितं तदाकारवृत्तां नीतं मृतप एव तन्मयं प्रवेष्टुं योगिनां मनो ऽप्यनापत् अप्राप्य तथापि केवलेन
भा॰ द॰ त्वा पयतो योगिनां मनो ऽपि यं प्रवेष्टुं न तत्सममिति ९ अन्वंचमाना जननी पश्चाद्धावमनुगच्छन्ती बृहती चलन्ती
स॰ टी॰ च श्रोणी तस्या भरेण क्रान्ता मन्दा गतिर्यस्याः केशबंधात् च्युतैः प्रसूनै- गतिर्गमनं यस्याः सा परां जवेन
३६ कंपितकेशपाठधान्युरः पतितानि प्रसूनानि प्रनुपश्चाद्गतिर्यस्याः सापरामृशत् धृतवती यष्टामन्दोर्वेदस्महा

तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततो ऽवरुह्यापससार भीतवत् गोप्यन्वधावन्न यमाप योगिनां क्षमं
प्रवेष्टुं तपसेरितं मनः ९ अन्वंचमाना जननी बृहच्चलच्छ्रोणीभराक्रान्तगतिः सुमध्यमा जवेन
विस्रंसितकेशबंधनच्युतप्रसूनानुगतिः परामृशत् १० कृतागसं तं प्ररुदन्तमक्षिणी कषन्तमं
जन्मषिणी स्वपाणिना उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयन्त्यवागुरत् ११
त्यक्त्वा यष्टिं सुतं भीतमादायार्भकवत्सला इयेष किल तं बद्धुं दाम्नातद्वीर्यकोविदा १२

णां केनिमित्तं प्रसत्याविध्वयापश्चाद्गपतिष्कार्गमनुसरति आत्मानं प्राप्नोति तिन या निजसुतमाप १० किंच
वैतमंजनमषिणी अक्षिणी सर्वतः प्रसरंती मषी यथोस्ते प्रक्षिणी स्वपाणिना कषंतं संमर्दयंतं भिषयंती ह
स्तः हृदयः भीषयंती भयमुत्पादयन्ती अवागुरत् आभर्त्सयत् ११ इयेष ऐच्छत् अतद्वीर्यकोविदा
तस्य भावानभिज्ञा १२ ॥

३६

ष्टको विदन्नमेवाह नचान्तरिति पंचभिः बन्धने हि बहिः परिवेष्टनेन दाम्नान्तरावृतस्य भवति तथा पूर्वा-
परभागावच्छेदेन वस्तुनः पूर्वं पश्चाद्दामग्रथनापरतः परिवेष्टनेन भवति न वैतदस्तीत्याह नचान्तरिति किंच
व्यापकत्वेन व्याप्यस्य बन्धो भवति नत्वत्र विपरीतमित्याह पूर्वापरमिति किंच तद्व्यतिरिक्तस्याभावान्न ब-
न्धः स्यादाह जगच्च यः इति १३ तं मर्त्यलिङ्गमधोक्षजमात्मजं मत्वा बबन्धेति १४ द्व्यङ्गुलोनं द्वाभ्यामङ्गु-

न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरं पूर्वापरं बहिश्चान्तर्जगतो यो जगच्च यः १३ तद्दामबध्य-
मानस्य स्वार्भकस्य कृतागसः द्व्यङ्गुलोनमभूत्तेन सन्दधेऽन्यच्च गोपिका १५ यदासीत्तदपि न्यूनं
तेनान्यदपि सन्दधे तदपि द्व्यङ्गुलं न्यूनं यद्यदादत्त बन्धनं १६ एवं स्वगेहदामानि यशोदा सन्द-
धत्यपि गोपीनां सुस्मयन्तीनां स्मयन्ती विस्मिताभवत् १७ स्वमातुः स्विन्नगात्राया विस्रस्तकबर-
स्रजः दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्वबन्धने १८ एवं सन्दर्शिता ह्यङ्ग हरिणा भृत्यवश्यता
स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे १९ नेमं विरिञ्चो न भवो न श्रीरप्यङ्गसंश्रया प्रसादं लेभि-
रे गोपी यत्तत्प्राप विमुक्तिदात् २०

लिभ्यामपूर्णं १५ स्मितं कुर्वन्तीनां मध्ये स्वयमपि हसन्ती विस्मयमाप १७ न चैवं ह्यात्मश्रमं वा दृष्ट्वा न प-
वं सन्दर्शितेति सेश्वरमिदं विश्वं यस्य वशे यदधीनमित्यर्थः १९ भगवत्प्रसादमन्येऽपि भक्ता लभन्ते तदुक्तं न
निविञ्चमिति सर्वे सांवितमाह नेममिति त्रिभिर्विः
पुत्रोऽपि भवः स्वात्मापि श्रीर्जायापि २०

श्री०
भा० द०
टी०
५२

फलितमाहनायमिति देहिनांदेहाभिमानिनांतापसादीनांज्ञानिनांनिरहङ्काराभिमानिनामपीति आ
त्मपोतानामात्मैवपोतस्तरणसाधनंयथाभक्तानांसुखापः यशोदायाः कृतार्थत्वेप्रतिज्ञा अयंसा
माद्युबंधनीयएवेति कृष्णस्यस्वबंधनिर्बन्धोपगतिस्ताद्दृयेब्रह्मांडेनगतेनरज्वापिकिंमांबध्नातीति नत्रकृ
ष्णइतिविचार्यस्वेच्छयाभक्ताधीनोस्वतंत्रइतिद्विजइवभक्तस्यकृतन्नेतोहूरीकुर्वन् ममप्रतिज्ञायात

नायंसुखापोभगवांदेहिनांगोपिकासुतः ज्ञानिनांचात्मपोतानांयथाभक्तिमतामिह २१
कृष्णस्तुगृहकृत्येषुव्यग्रायांमातरिप्रभुः अद्राक्षीदर्जुनौपूर्वंगुह्यकौधनदात्मजौ २२ पुरा
नारदशापेनवृक्षतांप्रापितौमदात् नलकूवरमणिग्रीवाविति ख्यातौश्रियान्वितौ २३ इति
श्रीभागवतेदशमस्कंधेगोपीप्रसादोनामनवमः ९ राजोवाच कथ्यतांभगवन्नेतत्तयोःशा
पस्यकारणं यत्तद्विगर्हितंकर्मयेनवादेवर्षेस्तमः १ शुक उवाच रुद्रस्यानुचरौभूत्वासुदृप्तौ
धनदात्मजौ कैलासोपवनेरम्येमंदाकिन्यांमदोत्कटौ २ ॥

नममभक्तस्येति स्वबंधनेस्वीकृतवान् एवंगोपीप्रतिज्ञाकथंज्ञानातत्राहस्वित्रगात्रइति २१ भ
क्तोबद्धस्यापिग्रन्थमोचकत्वेवक्तुमाहकृष्णस्त्वति २२ इतिश्रीभागवतेदशमेनवमोध्यायः दशमे
पादपद्मस्वितन्नगयमलार्जुनौ तत्रताभ्यांवदेवाभ्यांकृष्णस्तत्तदितीर्यते यद्विगर्हितं
कर्मयेनवादेवर्षेर्भागवतोत्तमस्यापितमःक्रोधःतदेतत्कटानामिति २ ॥

राम
५२

प्रनूर्नवामालिपिष्टैर्विहितावाराणसीस्मृता ३ गंगायामंतर्मध्येकथंभूतेअंभोजानांवनानितेषांराजयःता
विधृतेयस्मिन् ४ अथअथनहृष्ट्वाबलोवाराणसींतांसमबुध्यत ५ कृतकृत्यस्तस्मात्तदानींदृष्ट्वेति ६ अनुग्रहा
र्थायअनुग्रहरूपमदनाशाय अर्थंचश्रीकृष्णसंदर्शनेनतदैर्घ्यंवक्ष्यमाणं ७ श्वालम्बद्गनिर्गोष्ठ्यांदियालि
दयालुयतः सेव्यमानस्यवृंदसः श्रीमदादग्यः ग्राभिनाम्यात्यनिमलकुलविषादिजनितामदः अन्योवारनो

वाराणसींमदिरांपीत्वामदघूर्णितलोचना स्त्रीजनैरनुगायद्भिःचेरतुःपुष्पितेवने ३ अंतःप्रवि
श्यगंगायांसंभोजवनराजिनि विक्रीडितयुवतिभिर्गजाविवकरेणुभिः ४ यदृच्छयापिदेवर्षिर्भ
गवांस्तत्रकौरव अपश्यन्नारदोदेवौक्षीवाणौसमबुध्यत ५ तंदृष्ट्वाव्रीडितादेव्योविवस्त्राःशा
पशंकिताः वासांसिपर्यधुःशीघ्रंविवस्त्रौनैवगुह्यकौ ६ तौदृष्ट्वामदिरामत्तौश्रीमदांधौसुरा
त्मजौ तयोरनुग्रहार्थायशापंदास्यन्निदंजगौ ७ नारदउवाच नह्यन्योजुषतोजोष्यान्बुद्धि
भ्रंशोरजोगुणः श्रीमदादाभिजात्यादिर्यत्रस्त्रीद्यूतमासवः ८ हन्यंतेपशवोयत्रनिर्दयैरजितात्म
भिः मन्यमानैरिमंदेहमजरामृत्युनश्वरम् ९

गुणः रजोकार्यहास्यहर्षादिरूपोनहितयाबुद्धिभ्रंशःशायतीतितयाकिंतत्श्रीमदएवेति ८ नदाहहव्यंते
हस्यादिभिःवत्तभिः यत्रश्रीमदेइमंनश्वरंदेहमजरामृत्यु
मजरश्च अमृत्युश्चयथाभवतितथा
मन्यमानैः ९

नरदेव इति देवसंज्ञितमपि श्वादिभिर्भक्षितं विट्संज्ञितं अग्न्यादिदग्धं भस्मसंज्ञितं तत्कृते तदर्थं यो भूतध्रुक् तेन स्वा
र्थः किं ज्ञायते यतो भूतद्रुहा निरयो भवति किं स्वार्थं न वेदेत्यर्थः ।२ निषेक्तुः पितुः मातुः पितुर्वा मातामहस्य पुत्रिकाक
रणे ।३ अव्यक्तप्रभवाप्ययं अव्यक्तात्प्रभवः तस्मिन्नेवाप्ययो यस्य तम् आत्मसात्कृत्वा आत्मीयं मत्वा असतोऽन्य
हन्तृत्वे ।४ एवं श्रीमदपि वेष्टितस्य ज्ञानं तत्प्रतीकारं निश्चिनोति असत इति परं अंजनं केवलं दारिद्र्यमेवक

देवसंज्ञितमप्यन्ते कृमिविड्भस्मसंज्ञितं भूतध्रुक् तत्कृते स्वार्थं किं वेद निरयो यतः ।२ देहः किम
न्नदातुः स्वं निषेक्तुर्मातुरेव वा मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोऽपि वा ।३ एवं साधारणं दे
हमव्यक्तप्रभवाप्ययं को विद्वानात्मसात्कृत्वा हन्ति जन्तूनृतेऽसतः ।४ असतः श्रीमदान्धस्य दा
रिद्र्यं परमांजनं आत्मौपम्येन भूतानि दरिद्रः परमीक्षते ।५ यथा कंटकविद्धांगो जन्तोर्नेच्छति तां
व्यथां जीवसाम्यं गतो लिंगैर्न तथाविद्धकंटकः ।६ दरिद्रो निरहंस्तम्भो मुक्तः सर्वमदैरिह
कृच्छ्रं यदृच्छयाप्नोति तद्धि तस्य परं तपः ।७

तत्राह आत्मौपम्येनेति ततो न द्रुह्यतीति भावः ।५ सदृष्टान्तमाह यथेति मुखम्लान्यादिलिंगैः सर्वेषां
जीवानां साम्यं गतः स्वदेहसम इति ताम् अवैतीत्यर्थः ।६ किं च दारिद्र्यं मोक्षमपि साधयतीत्याह दरिद्र इति
येन निरहंस्तम्भो निर्गताहंकाररूपः स्त
म्भो यस्य ।७

युज्यंते स्वजनपं संगात्स्वेनेत्तर्षं तस्मात् १९ ननु साधूनां धनिक एव प्रियः स्यान्न दरिद्र इति तत्राह साधूनामिति ध-
नेस्तंभो गर्वो येषां तैः २० तमो मदमत्तानव्ह्णं नमदेवे ब्राह्मणयोः स्त्रीजितयोः २१ नमः प्लुतौ तमो व्याप्तौ

निःस्वं त्वन्तामदेहः स्वं दरिद्रस्यात्रकादितः इंद्रियाणि विशुध्यंति हिंसापि विनिवर्तते १८
दरिद्रस्य हि युज्यंते साधवः संगदर्शिनः सद्भिः क्षिणोति तं तर्षं ततआराद्विशुध्यति १९ सा-
धूनां समविज्ञानां मुकुंदचरणैषिणां उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः २० तदहं म-
त्तयोर्माध्वा वारुण्या श्रीमदांधयोः तमोमदं हरिष्यामि स्त्रैणयोरजितात्मनोः २१ यदिमौ
लोकपालस्य पुत्रौ भूत्वा तमःप्लुतौ नविवाससमात्मानं विजानीतः सुदुर्मदौ २२ अतोर्हतः
स्थावरतां स्यातां नैवं यथा पुनः स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् २३ वासुदेवस्य सा-
न्निध्यं लब्ध्वा दिव्यशरच्छते वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यतः २४ श्रीशुक उवाच एवमुक्त्वा
स देवर्षिर्गतो नारायणाश्रमं नलकूवरमणिग्रीवावासतुर्यमलार्जुनौ २५ ऋषेः स्वभक्तमुख्य-
स्य सत्यं कर्तुं वचो हरिः जगाम शनकैस्तत्र यत्रास्तां यमलार्जुनौ २५ देवर्षिर्मे प्रियतमो यदिमौ ध-
नदात्मजौ तत्तथा साधयिष्यामि यद्गीतं तन्महात्मना २६

२२ प्राप्तति अतोर्हतामिति अतुरहृत्पाणित्स्थावरतां नैवमित्यादिना मत्प्रसादेन स्मृतिः स्यात् स्वर्लोकतांदे-
वत्वे पुनर्लब्ध्वा तस्मिन्मदनुग्रहात् लब्धभक्ती भविष्यत इति २४ अस्त्वेतमाह तदेषविति २५ किमिति
सत्यं कर्तव्यं तत्राह देवर्षिर्मे प्रियतमः तत्ततः २६

श्री॰ भा॰ द॰ टी॰ ३९ यमयोर्यमलयोः मध्ये जातयोश्चात्मनः कृष्णस्य मध्यप्रवेशमात्रेण तिर्यग्गतेन शकटेनोलूखलदाम्नोदरब
द्धेनाजातमिति २२ अनुव्रजतीत्यंतक् तत्र हेतुः दामोदरेणेति उलूखलेन उत्पाटितश्चिरबन्धो मूलबन्धौ
ययोस्तौ परमस्य श्रीकृष्णस्य विक्रमितेन विक्रमः तेनातिवेपः अतिकंपो येषु तेस्कंदप्रवालविटपा ययो

स्तौ ते वृक्षा अर्जुनयो कृष्णस्त्वयमयोर्ययो आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखले २७ बालेन
निष्कर्षतान्वगुलूखलं तद्दामोदरेणात्मनो लीलोत्विबंधौ निष्पिन्नतः परमविक्रमितातिवे
पस्कंदप्रवालविटपौ कृतचंडशब्दौ २८ तत्र श्रिया परमया ककुभः स्फुरंतौ सिद्धावुपेत्य कुज
योरिव जातवेदाः कृष्णं प्रणम्य शिरसाखिललोकनाथं बद्धांजली विरजसाविदमूचतुस्तौ
२९ कृष्ण कृष्ण महायोगिंस्त्वमाद्यः पुरुषः परः व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः
३०॥

स्तौ २८ ककुभः प्रति सर्वतः स्फुरंतौ द्युत्यर्थः यद्वा दिशः प्रकाशयंतावितिवा २९ गोपालेऽसौ ध्रुवं
देवो किमिति प्रणतौ स्तुतिवेन्नयाहतुः हे कृष्ण कृष्ण महायोगिन् अचिंत्यप्रभाव त्वं न बालः किंत्वपरः
पुरुषः यतश्चाद्यः कारणभूतः तथापि न निमित्तमात्रं किंतूपादानमपि त्वमेवेत्याशयेन तदूचतुः व्यक्ता
व्यक्तमिति स्थूलसूक्ष्ममिदं ते रूपं विदुः ३०

नियंत्रापि तन्मे वेत्स्यवत्तः त्वमेक इति देहः असवः प्राणा आत्मा अहंकारः इंद्रियाणि च तेषामीश्वरः नन्वस्य
कालो निमित्तं प्रकृतिरुपादानं प्रकृतेर्जातो महान् विश्वात्मतया परिणमते पुरुषः कर्त्ता नियंता किमत्राह
मत आहतुः त्वमेव काल इत्यादिना सार्धेन यतो भगवानीश्वरो विष्णुः त्वमतः कालो नाम ३० तवली
लाप्रकृतिः शक्तिः पुरुषांशाः महान् कार्यमतः त्वमेव सर्वमित्यर्थः ३१ नन्वहं चेत्सर्वं तर्हि घटादिज्ञाने
न मत्तो न किं न भवति भवंति वेत्सवोपि व्रह्मविस्याप्त् अत आहतुः गृह्यमाणैरिति दृश्यत्वेन वर्तमानैः बु

त्वमेकः सर्वभूतानां देहस्वात्मेंद्रियेश्वरः त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः ३० त्वं म
हान्प्रकृतिः सूक्ष्मा रजः सत्त्वतमोमयी त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ३१ गृह्य
माणैस्त्वमग्राह्यो विकारैः प्राकृतैर्गुणैः को न्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः ३२
तस्मै तुभ्यं भगवते वासुदेवाय वेधसे आत्मद्योतगुणैश्छन्नमहिम्ने ब्रह्मणे नमः ३३ यस्याव
तारा ज्ञायंते शरीरेष्वशरीरिणः तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ३४ स भवान्सर्व
लोकस्य भवाय विभवाय च अवतीर्णोंऽशभागेन सांप्रतं पतिराशिषाम् ३५

द्ध्यहंकारेंद्रियादिभिः अग्राह्यस्त्वं न दृश्योसीति भावः ननु तर्हि जीवो जानाति नेत्याहतुः को न्विहेति
तीत्वाद्युत्पत्तेः प्रागेव स्वप्रकाशतया सिद्धं त्वां को वा जानाति गुणसंवृतो देहाद्यावृतः ३२ अतोऽद्वैर्यथावा
केवलप्रणामतः तस्मै तुभ्यमित्यात्मनः स्वस्माद्द्योतः प्रकाशो येषां तैर्गुणैः छन्नो महिमा यस्यात्मेवि
वरविः तस्मै ३३ यद्वेश्वरमीश्वर इति ऊनो त्वां नेनत्याहतुः यस्येति ३४ भवाय उद्भवाय विगतो
भवो यस्मिन्तस्मै कैवल्यायेत्यर्थः ३५

श्री॰ मैत्रं वा श्रुतवतः कुबेरः नारदेवात्तस्यानुकिंकरौ भगवतस्तव दर्शनं ३७ तत्रागतयोरावयोः पूर्वस्वभावोमा
भा॰ द॰ भूत् किंतु वाणीगुणानुकथने इत्यादिना अस्मदोर्द्वयोश्चेति द्विवचनस्थाने बहुवचनं अस्मित्संगिनो सर्वे
पू॰ टी॰ षांमपेति बहुवचनं तवनिवासभूतं यज्जगत् तस्य प्रणामे तत्वन्निवासभूतमिति बहुमानेन जगत्प्रणामे
१० शिरोस्त्वित्यर्थः भवत्तनूनां भवन्मूर्तीनां ३८ संकीर्तितः संस्तुतः ३९ वाग्भिः तद्धासोक्त्यात्मषा

नमः परमकल्याण नमः परममंगल वासुदेवाय शांताय यदूनां पतये नमः ३६ अनुजा
नीहि नौ भूमंस्तवानुचरकिंकरौ दर्शनं नो भगवत ऋषेरासीदनुग्रहात् ३७ वाणीगुणानु
कथने श्रवणौ कथायां हस्तौ च कर्मसु मनस्तव पादयोर्नः स्मृत्यां शिरस्तव निवासजगत्प्र
णामे दृष्टिः सतां दर्शनेस्तु भवत्तनूनां ३८ शुक उवाच इत्थं संकीर्तितस्ताभ्यां भगवान्देव
कीसुतः दाम्ना चोलूखले बद्धः प्रहसन्नाह गुह्यकौ ३९ श्रीभगवानुवाच ज्ञातं मम पुरैवै
तदृषिणा करुणात्मना यच्छ्रीमदांधयोर्वाग्भिर्विभ्रंशोनुग्रहः कृतः ४० साधूनां समचि
त्तानां सुतरां मत्कृतात्मनां दर्शनान्नो भवेद्बंधः पुंसोक्ष्णोः सवितुर्यथा ४१

तेषो व्याख्यानिष्यादिभिः श्रीविभ्रंशरूपोनुग्रहः कृत इति ४० उक्तमेवैतद्विवृणोति साधूनां स्वधर्मवर्तिनां सम
चित्तानामात्मविदां सुतरां मत्कृतात्मनां मय्यर्पितचित्तानां तेषां कृपातिरेकात्सुतरामित्युक्तं सवितुर्दर्श
नादक्ष्णोर्यथा बंधो न भवेत् तद्वत् ४१

प्राधान्यादेकस्य संबोधनं हे नलकूबर युवामासादनं सदनं निकेतनं मत्परमौ संतौ गच्छतं वां युवयोरीप्सितो
मयि प्रेमा जात इति भावः न भवो यस्मिन्सः ४२ बद्धोलूखलं बद्धमुलूखले यस्मिंस्तं ४३ इति श्रीभा

तद्गच्छतं मत्परमौ नलकूबर सादनं संजातो मयि भावो वामीप्सितः परमोऽभवः ४२ श्रीशुक उ॰
वाच इत्युक्तौ तौ परिक्रम्य प्रणम्य च पुनः पुनः बद्धोलूखलमामंत्र्य जग्मतुर्दिशमुत्तरां ४३
इति श्रीभागवते दशमस्कंधे नलकूबरमणिग्रीवमोक्षो नाम दशमोऽध्यायः १० श्रीशुक उवाच
गोपा नंदादयः श्रुत्वा द्रुमयोः पततो रवं तत्राजग्मुः कुरुश्रेष्ठ निर्घातभयशंकिताः १

वार्थदीपिकायां दशमस्कंधे दशमोऽध्यायः १० एकादशे समागम्य वृंदावनमथार्भकैः वत्सान्पा
लयता नेनुर्हतौ वत्सबकासुरौ १ ॥

श्री
भा॰ द॰
पू॰ टी॰
४१

तत्र लब्धंप्रत्यक्षतः परतोद्वयमपिपतनकारणमविज्ञायवभ्रमुः २ लब्धंकारणमुलूखलमितिभ्रमर

भूम्योर्निपतितौतत्रददृशुर्यमलार्जुनौ वभ्र
मुः नमविज्ञायलब्धंपतनकारणं २
उलूखलंविकर्षन्तंदाम्नाबद्धंचबाल
कं कस्येदंकुतआश्चर्यमुत्पातभय
कातराः ३ बालाअभ्यूरनेनेति
तिर्यगातमुलूखलं विक
र्षतामध्यगेन पुरुषावपि
वदृमहि ४
राम

कारणमाह कस्येदंकुतइतिकातराभीताः संतोवभ्रमुरित्यर्थः मध्यगोनवृक्षयोर्मध्येगतेनवेवलमेतावत्
वृक्षाभ्यांनिर्गतौदिव्यौपुरुषावपिवदृमहह्वेत्येववयमिति ४ ॥ हसादेः कमस्कृतोवाकारणात् ३ गृहोत्थाप्य

८८

राम
४१

केवलंतार्किकान्जगृहुर्देवश्रेत्येतत्संदेहयुक्ताविज्ञाबभूवुरित्यर्थः ५ भगवान्माययामोहितस्यनंदस्याभाव
वितमाह उलूखलमिति ६ गोभिरिभिमामितिशंकमानोमुनीवबाल्यमनुकरोतीत्याहस्तोभितः

नचेष्टैतेतदुक्तंजगृहुनथचेष्टेतेतितस्यतत् बालस्योत्पाटनंतत्कौः केवितस्संदिग्धचेतसः ५
उलूखलंविकर्षंतंदाम्नाबद्धंस्वमात्मजं विलोक्यनंदः प्रहसद्वदनोविमुमोचह ६ गोपी
भिस्तोभितोनृत्यन्भगवान्बालवत्क्वचित् उद्गायतिक्वचिन्मुग्धः तद्वशोदारुयंत्रवत् ७
बिभर्तिक्वचिदाज्ञप्तः पीठकोन्मानपादुकं बाहुक्षेपंचकुरुतेस्वानांचप्रीतिमावहन् ८ द
र्शयंस्तद्विदांलोकआत्मनोभृत्यवश्यतां व्रजस्योवाहवैहर्षंभगवान्बालचेष्टितैः ९ क्री
णीहिभोःफलानीतिश्रुत्वासत्वरमच्युतः फलार्थीधान्यमादायययौसर्वफलप्रदः १०
फलविक्रयिणीतस्यच्युतधान्यकरद्वयं फलैरपूरयद्रत्नैःफलभांडमपूरिच ११ सरित्ती
रगतंकृष्णंभग्नार्जुनमथाह्वयत् नमस्तेमघभवनोविश्वभ्योदेहगाःश्रुविः १२

करतालादिताःप्रोत्साहितः ७ उद्गमानयेत्युक्तः आनीतमसमर्थइवबिभर्तिकेवलंपीठादिबा
हुक्षेपंकरतालतवनदिदांचेतिचकारस्यान्वयः तस्यैश्वर्यंविदंतिपतेषांमेवंव्रजस्यहर्षमुवाहेति
९ श्रुविःकृतस्नानः १० ११ १२

श्री: भा॰द द॰टी ७२

शानोऽरवीत् आनंदावग्नुनिवेलमतिकांतसमयं १५ वृजकार्यमोकुलस्पहितेनकार्यं २१

पचपचपचवचसां लोमानसहशाक्तलंकृताव् तेवत्सातःकृताहारोविहरसस्वलंकृतः स्व
नोपयातोयदाहूतौक्रीडासंगेनपुत्रकौ यशोदांप्रेषयामासरोहिणीपुत्रवत्सला १४ इ
स्थयशोदातमथोपुत्रोवेर्मवास्तंतेहलिवद्धधीर्नृप हस्तेगृहीवासहरामंमच्युतेनी
वासस्ववाटंकृतवत्यथोदयं १५ क्रीडंतंसासुतंवालैरतिवेलंसहाग्रजं यशोदाजोहवी
त्कृष्णंपुत्रस्नेहस्नुतस्तनी १६ कृष्णकृष्णारविंदाक्षताततएहिस्तनंपिव अलंविहारैःक्षु
त्क्षांतः क्रीडाश्रांतोसिपुत्रक १७ हेरामागच्छताताशुसानुजःकुलनंदन प्रातरेवकृता
हारः तद्भवान्भोक्तुमर्हति १८ प्रतीक्षतेत्वांदाशार्हभोक्ष्यमाणोव्रजाधिपः एह्यावा
योःप्रियंदेहिस्वगृहान्यातबालकाः १९ इत्यानीयगृहंकृष्णंयशोदामंगलार्हणैः स्नप
यित्वोपमोजयित्वातौमुदामायपशायिनी २० वनंवृंदावनंगंतुमतः कृष्णेनयेचिताः स्वतथा
एवनंदादयोमंत्रमंत्रयन् २१ शुकउवाच गोपवृंदामहोत्पातानन्भूयबृहद्वने नंदा
दयःसमागम्यव्रजकार्यममंत्रयन् २२ तत्रोपनंदनामाहगोपोज्ञानवयोधिकः देशका
लार्थतत्वज्ञःप्रियकृद्रामकृष्णयोः २३ उत्थातव्यमितोस्माभिःगोकुलस्यहितैषिभिः आ
यांत्यत्रमहोत्पाताबालानांनाशहेतवः २४

विपदंवीक्ष्यपदानांपदंविहारस्थानंविपदंविगतप्रतिष्ठंवा २५ अन्यतमोवाकश्चिद्वालःतत्रापिपुत्रंतेनैवव॰
त्तामासीत् २६ अविशिष्टोनिष्टदतःस्थानात् २७ पश्चात्पशुभ्योहितेनवानिवनांतराणिविचिंतयस्मि

मुक्तःकथंविरहात्तस्याबालस्याबालकोह्यसौ हरेरनुग्रहात्तेनेमनस्त्रापमिनापतत् २३ वत्कवा
तेननीतोयंदेशेनविपदंवियत् शिलायांपतितःतत्रपरिज्ञातःस्वैरस्वैरैः २५ यन्नश्रियेतद्रुमयो
रंतरेप्यास्यबालकः अस्मावन्यतमोवापित्तदप्यद्भुतदर्शनं २६ यावदौत्पातिकोदिष्टोव्रजेनाभि
भवेदितः तावद्वालानुपादाययाम्यामोम्यत्रसानुगाः २७ वनेष्टंदावनेनामपशव्यंनवकाननै
गोपगोपीगवांसेव्यंपुण्याद्रितृणवीरुधं २८ तत्राद्यैवव्रजयामस्माम्यःशकटान्युङ्क्तमाचिरं गो
धवान्प्रश्नेयांद्विभवनायदिरोचते २९ ततत्क्षेवैकधियागोपाःसाधुःसाधितिवादिनः व्रजा
न्स्वान्स्वान्समायुज्ययपुरूढपरिच्छदाः ३० वृद्धान्बालान्स्त्रियोराजन्सर्वोपकरणानिच अनः
स्वारोप्यगोपालायत्ताआत्तशरासनाः ३१ गोधनानिपुरस्कृत्यशृंगाण्यापूर्यसर्वतः तूर्यघोषे
णामहतायत्तुःसहपुरोहिताः ३२

स्तत् २८ एकधियोविप्रमतिपत्तिरहिताःव्रजान्त्र्यावदत्व्रजान्तरात्ताःशकटान्यारोपिताःपरिच्छदायैस्ते
यत्राकृतप्रयत्नाः ३१ ॥ ६१

श्री:
भा० द०
पू० टी०
९३

वृत्तैर्नवैः कुचगतैः कुंकुमैः कांतिर्यासां ताः वृत्तेषु कुचयुगलेषु कुंकुमं तेन कांतिर्यासामिति वा ३३ व्रजवासं
गोकुलवसतिस्थाने ३५ स्वकालेन तद्योग्यकालेन ३७ प्रथमं कौमारलीलां दर्शयति अविदूर इत्यादि ३८

गोप्यो रूढरथा नूत्नकुचकुंकुमकांतयः कृष्णलीला जगुः प्रीता निष्ककंठ्यः सुवाससः ३३
तथा यशोदारोहिण्यावेकं शकटमास्थिते ३४ रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके ३४
मलं शरदिति ३४ त्यक्तैषणाः त्यक्ताः पुत्रवित्तलोकैषणा यैस्ते ३५ शुभ्रं भावः नद्युपाध्यायाः कर्मविधाभि
वत्तानि तोयानि ज्ञानामृतं सर्वे नो वितरन्ति अपि तु दत्ता विवेकवतो यथा एवं गिरयः शिवं निर्मलं तोयं क्व
चिन्मुमुचुः क्वचित्तु नः प्रावृषीव सर्वत्र इति
३६ ॥

गाधेल्पेऽपि जलेवर्तमाना इति तथा ते मीनादयः नैवाविंदन्नैवलेभिरे ३७ शनैः शनैरिति तद्वन्ममतामिव पंकं अहंता
मिवाममतां च पंकत्वेनोज्जहुरिति ३८ आत्मनि जीवात्मनि उपरते सम्यक् उपरतक्रियो मुनिरिव निश्चलांबुरभूदसौ
उपरतागमाः निवृत्तवेदघोषः समुद्रो निरविवादःमौनो बभूव समुद्र इति ३९ केदारेभ्यो दृढसेतुशालिक्षेत्रेभ्यो

नैवाविंदन्क्षीयमाणं जलंगाधजलेचराः यथायुरन्वहं क्षय्यं नरामूढाः कुटुंबिनः ३७ गाधवा
रिचराःतापमविंदन्शरदर्कजं यथादरिद्रःकृपणः कुटुंब्यविजितेंद्रियः ३८ शनैःशनैर्ज
हुःपंकंस्थलान्यामांश्च वीरुधः यथाहंममतांधीराः शरीरादिष्वनात्मसु ३९ निश्चलांबुरभूत्तूष्णीं
समुद्रः शरदागमे आत्मन्युपरते सम्यक् मुनिर्व्युपरतागमः ४० केदारेभ्यस्त्वपोऽगृह्णन्कर्षका
दृढसेतुभिः यथा प्राणैः स्रवज्ज्ञानं तन्निरोधेन योगिनः ४१ शरदर्कांशुजांस्तापान्भूतानामुडुपो
हरत् देहाभिमानजं बोधं मुकुंदो व्रजयोषितां ४२ खमशोभत निर्मेघं शरद्विमलतारकं स
त्वयुक्तं यथा चित्तं शब्दब्रह्मार्थदर्शनं ४३ अखंडमंडलो व्योम्नि रराजोडुगणैः शशी यथा यदु
पतिः कृष्णो वृष्णिचक्रावृतो भुवि ।
४४

दृढैःसेतुभिरपः अगृह्णन् ततः परं स्रुत्यभावात् प्राणैरिंद्रियैः तन्निरोधेनेंद्रियप्रत्याहारेण ४१ देहा
भिमानजं बोधमिव व्रजयोषितां मुकुंदः अहरदित्यर्थः ४२ शरदा विमलाः तारका यस्मिंस्तत् शब्दब्रह्म
णो वेदस्यार्थान् पूर्वोत्तरमीमांसानिर्णीतान् दर्शयतीति तथा तदिव ४३ ॥
कृष्ण कृष्ण

समोन्स्नाधिकः प्रीतंवोसखवृतं प्रफुल्लकुसुमसमसंपृक्तंमारुतमाश्लिष्यजनाः तापंजहुः नतुगोप्याः यतः कृष्णा
पहृतचेतसः तेनकारणेनतासांसद्रः सहृदिति यद्वानकारउपमार्थः गोप्यानगोप्यइवकृष्णगतचेतसइतिचे
तसाकृष्णमालिंगयथागोप्यः तापंजहुरित्यर्थः ४५ पुष्पिण्योगर्भिण्यः अन्वीयमानाः स्ववृषैः स्वपतिभिः अ
निच्छयापिबलादनुगम्यमानाईश्वराराधनार्थः क्रियाबलात्फलैरनुगम्यमानाः समस्तभोगगर्भायथेति ४६

आश्लिष्यसमशीतोष्णंप्रसूनवनमारुतं जनास्तापंजहुर्गोप्योनकृष्णहृतचेतसः ४५ गावोमृगाःख
गानार्यःपुष्पिण्यःशरदाभवन् अन्वीयमानाःस्ववृषैःफलैरीशक्रियाइव ४६ उदहृष्यन्वारिजा
निसूर्योत्थानेकुमुद्विना राज्ञातुनिर्भयालोकायथादस्यून्विनानृप ४७ पुरग्रामेष्वाग्रयणैरिंद्रियैश्च
महोत्सवैः बभौभूःपक्वसस्याढ्याकलाभ्यांनितरांहरेः ४८ वणिङ्मुनिनृपस्नातानिर्गम्यार्थान्प्रपेदिरे
वर्षरुद्धायथासिद्धाःस्वपिंडान्कालआगते ४९ इति भा व द म धे प्र तमो यः २०

कुमुत्कुमुदंकान्तितोमुत् यस्येतिदस्युसाम्यं ४७ आग्रायणैर्नवान्नप्राशनाख्यैर्वैदिकैः ऐंद्रियैरिंद्रियार्थैः लौ
किकैश्चमहोत्सवैः कलाभ्यांरामकृष्णाभ्यांदर्शनादिमहोत्सवाभ्यां ४८ वणिजोयतयोनृपाः स्नातकाश्चवर्षाभ्यां
रुद्धासिद्धाःसंतः ततोनिर्गम्यार्थान् वाणिज्यलाभभिक्षादिदिग्विजयविद्यादीन्प्रपेदिरेप्रापयंत यथामंत्रयोगादि
सिद्धाः आयुषारुद्धाःकालेआगतेस्वपिंडान्भोगादिप्राप्यदेवादिदेहानिति ४९ इतिश्री भा टी का दश
मस्कंधेविंशोध्यायः २०

श्रीः
भा॰द
स॰टी
८५

श्रीः ॥ नरकं विंशे शरदृष्ट्वा वृंदावनगते हरौ तद्वेणुस्वनमाकर्ण्य गोपीभिर्गीतमीर्यते इत्थमेवं वृत्तं त
देवाह शरदा स्वच्छानि जलानि यस्मिंस्तत् वायुना वातमनुगतं तत्रैकं वाम मित्यर्थः १ ततः कुसुमि
तवनराजिषु शुष्मिणो मत्ता भृंगा द्विजाश्च तेषां कुलानि तैर्घुष्टानि सरांसि सरितो महीध्राश्च यस्मिंस्तद्वनं कु
सावगाह्य प्रविश्य वेणुमवादयत् २ तत्कृष्णस्य वेणुगीतं स्मरस्योदयो यस्मात् तत्तश्रुत्वा परोक्षं यथा भ
वति व्रजे स्थितत्वात् ३ विक्षिप्तमनसो व्याकुलचित्ता भीता यादृक् कृष्णस्मरणेन तासां मनसः क्षोभकं

शुक उवाच इत्थं शरत्स्वच्छजलं पद्माकरसुगन्धिना न्यविशद्वायुना वातं सगोगोपालकोऽच्युतः
१ कुसुमितवनराजिशुष्मिभृंगद्विजकुलघुष्टसरःसरिन्महीध्रं मधुपतिरवगाह्य चारयन् गाः
सहपशुपालबलः चुकूज वेणुं २ तद्व्रजस्त्रिय आकर्ण्य वेणुगीतं स्मरोदयं काश्चित्परोक्षं कृष्णस्य
स्वसखीभ्योऽन्ववर्णयन् ३ तद्वर्णयितुमारब्धाः स्मरंत्यः कृष्णचेष्टितं नाशकन् स्मरवेगेन
विक्षिप्तमनसो नृप ४ बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं बिभ्रद्वासः कनककपिशं वै
जयंतीं च मालां रंध्रान्वेणोरधरसुधयापूरयन् गोपवृंदैर्वृंदारण्यं स्वपदरमणं प्राविशद्गीत
कीर्तिः ५

त्वात्तदाह बर्हापीडमिति ४ नटवद्वरं वपुर्बिभ्रत् वृंदावनं प्राविशत् कथंभूतं वनं स्वपदैरंकितैः रमणं
रतिजनकं गोपवृंदैर्गीतकीर्तिः तथा बर्हस्य मयूरस्यापीडं शिरोभूषणं बिभ्रत् बर्हमापीडो यस्मिन् हरि
वपुषो विशेषणं वा वेणुवादनसमये हेतो रंध्रान्वेणोरिति श्रोतेन्द्रवदधरं वैधव भर्णाद्वे तारुण्यलतीगी
तत्वमपितमर्हतीति भावः ५

मुभिरेभिरेव वर्णयंत्यः पदे पदे परमानंदस्फूर्तिः श्रीकृष्णं परिष्वजिरे अनुवर्णनमेवाह अक्षण्वतामिति त्रयोदश
भिः ६ अक्षण्वतां चक्षुष्मतां नानावत्त्विदमेव फलं प्रियदर्शनं परमन्यन्न विदामः न विद्म इत्यर्थः तत्र फलं सखि
भिः सह पशून् वनं प्रवेशयतोः रामकृष्णयोर्वक्त्रं निपीतं तैरेव तज्जुष्टं सेवितं नान्यैरित्यर्थः कथंभूतं वक्त्रं अणुवेणवे
णुमनुवर्तमानं तेनावादयत् तथा अनुरक्तकटाक्षमोक्षं स्निग्धकटाक्षविसर्गं अथवा यैर्निपीतयोर्वक्त्रं तेन जुष्ट

इति वेणुरवं राजन्सर्वभूतमनोरमं श्रुत्वा व्रजस्त्रियः सर्वाः वर्णयंत्योभिरेभिरे ६ गोप्य ऊचुः
अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननु निवेशयतोर्वयस्यैः वक्त्रं व्रजेशसुतयोरन
वेणुजुष्टं यैर्वा निपीतमनुरक्तकटाक्षमोक्षम् ७ चूतप्रवालबर्हस्तवकोत्पलाब्जमालानुपृक्तप
रिधानविचित्रवेषौ मध्ये विरेजतुरलं पशुपालगोष्ठ्यां र
ङ्गे यथा नटवरौ क्वच गायमानौ
॥ ८ ॥

मेतदक्षण्वतामक्ष्णोः फलमिति ७ अन्या आहुः चूतेति चूतप्रवालादीनां विचित्राभिर्मालाभिरनुपृक्तैर्युक्तं
तरां तरतः संयुक्तोपरिधानेन नीलपीतांबरेताभ्यां विचित्रौ वेषौ ययोस्तौ कुत्र कदाचित्पशुपालगोष्ठ्यां गोपाल
समाजानां मध्ये अलमत्यर्थं विरेजतुः अहो गोपानां पुण्य
मितिभावः ८ ॥

श्री:
भा-द-
पू-टी-
८६

हे गोप्यः अयं वेणुः किं स्म पुण्यमाचरत् कृतवान् कथं यस्मात् गोपिकानामेव भोग्यां सतीमपि दामो
दराधरसुधां स्वयं स्वातंत्र्येण यथेच्छं भुंक्ते कथं अवशिष्टरसं केवलमवशिष्टरसमात्रं यथा भवति यस्मो
याः सोऽजलेन पुष्टाः ता मातरः तन्त्याः ह्रदिन्यः हृष्यत्त्वचः विकसितकमलवनमिषेण रोमांचिताः लसंति ते ये
वंशे जाताः तेतरवो मधुधारामिषेणाश्रूणि मुमुचुः यथार्याः कुलवृद्धाः स्ववंशे श्रीभगवत्सेव
कं दृष्ट्वा हृष्यत्त्वचो मुमुचुर्वाऽविनतुष्टिरिति ९ हे सखि वृंदावनं भुवः कीर्तिं स्वर्गादपि विशेषेण तनोति विस्ता
रयति कथं यत् देवकीसुतस्य पादांबुजैर्लब्धा लक्ष्मीः शोभा संपद् येन तत् किंच गोविंदस्य वेणुमनु

अन्या ऊचुः गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानाम् भुं
क्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथार्याः ९ काश्चिदूचुः वृंदाव
नं सखि भुवो वितनोति कीर्तिं यद्देवकीसुतपदांबुजलब्धलक्ष्मि गोविंदवेणुमनु मत्तमयू
रनृत्यं प्रेक्ष्याद्रिसान्ववरतान्यसमस्तसत्त्वं १० अपरा आहुः धन्याः स्म मूढमतयोऽपि हरिण्य ए
ता या नंदनंदनमुपात्तविचित्रवेशं आकर्ण्य वेणुरणितं सहकृष्णसारैः पूजां दधुर्विरचितां
प्रणयावलोकैः ११

वा गोविंदवेणुमनु तदनंतरं मंद्रगर्जितनीलमेघं तं मत्वा मत्ता ये मयूराः तेषां नृत्यं प्रेक्ष्य अद्रिसानुषु अवरतानि
उपरतक्रियाणि अन्यानि समस्तानि सत्त्वानि यस्मिंस्तत् नैतदन्येषु लोकेषु विद्यते
अतो भुवः कीर्तिं वितनोतीत्यर्थः १० हे सखि मूढमतयः तिर्यग्जातयोऽपि एता हरिण्यः धन्याः यस्मात्
मानेव्याहुः कृतवत्यः किंच कृष्णसारैः स्वपतिभिः सहिता एव दधुः अस्माकं तु पतयो गोपाः ह्युद्धताः समा
लोकनं न सहंते इति भावः सविस्मये ११

हे गोप्य आश्चर्यं शृणुत वनवनितानामुत्सवो यस्मात् हृदयं श्रीलं वयस्यं तं श्रीकृष्णं निरीक्ष्य तेन वादितवेणोः संकीर्णगीतीं
तेषु वा विमानेनागच्छन्त्यो देव्यो देवानामेकेषु स्थितानामपि स्मरेणान्तर्मानाः परिशिथिलं मध्ये यासां मुग्धहृदः मोहे लिं
गमाहुः श्रुत्वा पद्मजः कवयः चूडया मानताः ॥११॥ अत्र सर्वं च वक्तुं भेदाश्चानीव समानिवक्तव्यात्तु रणो शृंकयये
तेभिमितेन त्वमितेः कर्णपुटैः पिबन्त्यः सत्यः तथाश्रावावनत्रास्मरणेन पानेन श्रद्धानां शुश्रूषमनेन तरमेव गीतं तस्य वाता

अस्मात्तुः कृष्णं निरीक्ष्य वनितोत्सवरूपशीलं श्रुत्वा च तत्क्वणितवेणुविचित्रगीतं देव्यो विमा
नगतयः स्मरनुन्नसारा भ्रश्यत्प्रसूनकबरा मुमुहुर्विनीव्यः ॥१२॥ गावश्च कृष्णमुखनिर्गतवेणु
गीतपीयूषमुत्तभितकर्णपुटैः पिबन्त्यः शावाः स्नुतस्तनपयःकवलाः स्म तस्थुर्गोविंदमात्म
नि दृशाश्रुकलाः स्पृशन्त्यः ॥१३॥

देवपीयूषमुत्तभितकर्णपुटैः पिबन्त्यः स्नुतस्तनपयःकवलान् हरितं तृणग्रासान् मुखे धृत्वा येषां तेन तस्थुः विस्मृता
त्रिपावभूत्तु इत्यर्थः अथ हे नः गोविंदं दृशा मार्गेणाश्रुभ्यामात्मनि स्पृशन्त्यः आलिंगन्त्यः अनपवादस्तु(?) णमकणाले
राम
शालोकनवो यो मांसनागावः तेच प्रणवाः ॥१३॥ ॥
हे.म

श्री
भा० द
स्क० टी
८३

हेअंबमातः अस्मिन्वनेयेविहगाः पक्षिणस्तेप्रायेणमुनयोभवितुमर्हन्ति कुतः कृष्णेक्षितंकलदर्शनंवेणुप्र
फलाद्युत्तंविनायथाभवति तथाकृष्णविरावैः प्रवालायेषांतान्द्रुमभुजान्वृक्षशाखाआश्रित्य श्रीकृष्णेनोदितं
प्रकटितंकलवेणुगीतंकेनापि विनमीलितदृशः मुकाश्चवाचः संतः ये शृण्वन्तीति तथाहिमुनयः श्रीकृ
ष्णकीर्तनंयथाभवति तथावेदोक्तकर्मफलत्यागेनवेदद्रुमशाखामाश्रित्य कृष्णविरप्रवालस्थानीयानियानिकर्माणि
वोपदेदाना संतः श्रीकृष्णगीतमेवशृण्वन्ति तेवासुदेवरूपाभवितुमर्हन्तीतिभावः १४ आत्मावे

अम्बाऊचुः प्रायोबताम्बविहगामुनयोवनेस्मिन्कृष्णेक्षितंतदुदितंकलवेणुगीतं आरुह्येयेद्रुम
भुजान्रुचिरप्रवालान्शृण्वन्त्यमीलितदृशोविगतान्यवाचः १४ नद्यस्तदातदुपधार्यमुकुन्दगी
तमावर्तलक्षितमनोभवभग्नवेगाः आलिंगनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णन्तिपादयुगलंकम
लोपहाराः १५ दृष्ट्वातपेव्रजपशून्सहरामगोपैः संचारयन्तमनुवेणुमुदीरयन्तं प्रेमप्रवृद्ध
उदितः कुसुमावलीभिः सख्युर्व्यधात्स्ववपुषाम्बुदआतपत्रं १६ ॥ सम

कृष्ण

वनानांकथानद्योपिआवर्तैः परिभ्रमैर्लक्षितेनसूचितेन मनोभवेनकामेनभग्नावेगोयासांताः आलिंगने
स्थगितमाच्छादितंयथाभवति तथाऊर्मय एवभुजास्तैः कमलोपहाराः कमलान्युपहरन्त्यःमुरारेः पादयुग
लंगृह्णन्तिधारयन्ति १५ लोकान्तिहरणशीलत्वादिसाम्यात्सख्युः श्रीकृष्णस्यप्रेम्णावृद्धःतत्रपरिउदितः पुनः
प्रसृतप्रवृद्धः सन्कुसुमावलीभिः कुसुमसदृशैः तन्तुलैस्तुषारैर्वासहस्ववपुषाआतपत्रंविहितवान् १६
राम

८३

साहंकारमाहुः पुलिंद्यः प्राववंगनाः पूर्णाः कृतार्थाः कुतस्तत्राह प्रथमं दयितानां स्तनेन मंडितेन ताडेल
म्बेन पुनस्तद्रतिसमये उरुगाय श्रीकृष्णस्य पदाब्जयो रागेण आरुणेन श्रीः कांतिः यस्य तेन कुंकुमेन पुनस्तस्य वनस्थ
ले पुर्वकं मरतृणेषु त्रुषितेन लग्नेन तथा तस्य कुंकुमस्य दर्शनेन स्मररुजा तारुचू नापीयासोत्ताः तेन कुंकुमेनान
नेषु कुचेषु चकाम नतमे पुलिंपत्यः तदाकामव्यथां जहुः अतस्ताः कृतार्थाः धिगन्यामाद्याशीः याये पवंश्च ततदा
धिगाममंतलभंतेइति १७ पुनरप्याश्चर्यं हंतेतिहर्षे हे सख्यः अयमद्रिगोवर्धनः अवेहरिदासेषु श्रेष्ठः कुतस्तत्रा
तमाह यस्माद्रामकृष्णयोश्चरणस्पर्शेन प्रमोदोयस्य सः तृणाद्युद्गमभिषेण रोमहर्षदर्शनात् किंचतन्मा(

पूर्णाः पुलिंद्य उरुगायपदाब्जरागश्रीकुंकुमेन दयितास्तनमंडितेन तद्दर्शनस्मररुजस्तृणरूषिते
न लिंपंत्य आननकुचेषु जहुस्तदाधिं १७ हंतायमद्रिरबला हरिदासवर्यो यद्रामकृष्णचरणस्पर्श
प्रमोदः मानं तनोति सहगोगणयोः तयोर्यत्पानीयसूयवसकंदरकंदमूलैः १८ गागोपकैरनुव
नं नयतोरुदारवेणुस्वनैः कलपदैः तनुभृत्सु सख्यः अस्पंदनं गतिमतां पुलकस्तरूणां निर्योगपा
शकृतलक्षणयोर्विचित्रं १९

नं तनोति सहगोभिर्गणेन सखिभिस्सहेन च सहवर्तमानयोः तयोः पानीसूयवसैः शोभनतृणैः कंदरैः कंदमूलैश्च य
ध्यावितं भुतायमानि धन्य इत्यर्थः १८ हे सख्यः इदं त्वतिविचित्रं गोपैः सख्याः वनेवने चारयतोः तयोरामकृष्णयोर्म(
धुरपदैर्महावेणुनादैः प्राणिषु येगतिमतः तेषाम स्पंदने स्थावरधर्मः तरूणां पुलको जंगमधर्म इति निर्यु
ज्यंते गावः एभिरिति निर्योगाः पादबंधनरज्जवः शृंखला गवां यस्तेषां पाशास्तैः कृतं लक्षणं चिह्नं ययोः
शिरसि निर्योगपाशविहितेन तस्कंधस्यां पाशेन च गोपपरिवृढे श्रिया विराजमानयोरित्यर्थः १९ ॥ ॥

श्रीः
भा·द
स्·टी
८८

इ श्री कृष्णेटीपि यां द म थे को वि ध्यायः २२ द्वाविंशेगोपकन्यानां यस्त्राहरणलीलया वरंदत्वा
गतः कृष्णोयज्ञपत्न्यामितीर्यते गोपीनांकामतः कृष्णेनिःसीमप्रेमसंगमः कात्यायन्यर्चनोद्भूततत्प्रसादसमुहो
द्भवः प्रथमं मासि मार्गशीर्षे १ महामायेत्यादिमंत्रबोधनैः नवनकिं विदशकामितिन्हचेयमः प्रत्येकं या

एवंविधा भगवतो या वृंदावनचारिणः वर्णयंत्यो मिथो गोप्यः क्रीडास्तन्मयतां ययुः २१ इ श्री
ग ते श स्कं एकोनविंशोध्यायः २१ श्रीशुक उवाच हेमंते प्रथमे मासि नंदव्रजकुमारिकाः चे
रुर्हविष्यं भुंजानाः कात्यायन्यर्चनव्रतं १ आप्लुत्यांभसि कालिंद्या जलांते चोदितेरुणे कृत्वा प्रति
कृतिं देवीमानर्चुर्नृप सैकतीं २ गन्धैर्माल्यैः सुरभिभिर्बलिभिर्धूपदीपकैः उच्चावचैश्चोपहारैः
प्रवालफलतंडुलैः ३ कात्यायनि महामाये महायोगिन्यधीश्वरि नंदगोपसुतं देवि पतिं मे कु
रु ते नमः ४ इति मंत्रं जपंत्यस्ताः पूजां चक्रुः कुमारिकाः एवं मासं व्रतं चेरुः कुमार्यः कृष्णचेत
सः ५ भद्रकालीं समानर्चुर्भूयान्नंदसुतः पतिः उषस्युत्थाय गोत्रैः स्वैरन्योन्याबद्धबाहवः ६
कृष्णमुच्चैर्जगुर्यांत्यः कालिंद्यां स्नातुमन्वहं नद्याः कदाचिदागत्य तीरे निक्षिप्य पूर्ववत् वासांसि
कृष्णं गायंत्यो विजह्रुः सलिले मुदा ७

धियं तेकृष्णमेवेनस्त्वमेवाहभूयान्नंदसुतः पतिरिम्यानर्चुरिति व्रतस्य शर्वांगमाह उषसीति गोत्रैर्नामभिरन्यो
न्यावद्धबाहवः परस्परं गृहीतपाणयः ७ ८८

योगीश्वराणामीश्वर इति श्रुत्वैकेनाहं मनोरथपूरणासामर्थ्यं दर्शयति नासौ कर्मणः सिद्धये फलदानायेति
८ नीपंकदंबवालेः सह ९ एकैकशो वाससामात्मस्वीकृतमहेवमनताशुण्केसैग्रहइत्यर्थः १० देवलितपरि
ना

भगवांस्तदभिप्रेत्य कृत्स्नयोगेश्वरेश्वरः वयस्यैरावृतस्तत्र गतः तत्कर्मसिद्धये ८ तासां वासांस्युपादा
यनीपमारुह्य सत्वरः हसद्भिः सहसवालैः परिहासमुवाच ह ९ अत्रागत्याबलाः कामं स्वं स्वं वा
सः प्रगृह्यतां सत्यं ब्रुवाणि नो नर्म यद्यूयं व्रतकर्षिताः १० न मयोदितपूर्वं वा अनृतं तदिमे वि
दुः एकैकशः प्रतीच्छध्वं सहैववास्तु मध्यमाः ११ तस्य तत्क्ष्वेलितं दृष्ट्वा गोप्यः प्रेमपरिप्लुताः व्री
डिताः प्रेक्ष्य चान्योन्यं जातहासा न निर्ययुः १२ एवं ब्रुवति गोविन्दे नर्मणाक्षिप्तचेतसः आकंठम
ग्नाः शीतोदे वेपमानास्तमब्रुवन् १३ मानयं भोः कृथास्त्वां तु नन्दगोपसुतं प्रियं
जानीमोऽंग व्रजश्लाघ्यं देहि वासांसि वेपिताः १४ श्यामसुन्दर ते दास्यः करवाम तवो
दितं देहि वासांसि धर्मज्ञ नो चेद्राज्ञे ब्रुवामहे १५ श्रीभगवानुवाच भवत्यो यदि मे दास्यो मयोक्तं वा
करिष्यथ अत्रागत्य स्ववासांसि प्रतीच्छध्वं शुचिस्मिताः १६ ततो जलाशयात्सर्वाः दारिकाः शीतवे
पिताः पाणिभ्यां योनिमाच्छाद्य प्रोत्तेरुः शीतकर्षिताः १७ भगवानाहता वीक्ष्य शुद्धभावप्रसा
दिताः स्कंधे निधाय वासांसि प्रीतः प्रोवाच सस्मितम् १८

हासं प्रेमपरिप्लुताः प्रेमरसमग्नाः १२ अंगभो कृष्णमनयुमन्यायं माकृथाः १४ हे कृष्णेति प्रतीच्छध्वं ॥ १८
गृह्णीध्वं १६ प्रोत्तेरुर्निर्गताः १७ आहताः ईषद्दत्ततयानीवीक्ष्य १८
यस्माद्वस्त्रेणगतावकुंगाकृष्णस्यस्वाहुनं एवाकरतल्लेयस्यमेवस्तुः प्रसीदनः

श्रीः
भा॰ द॰
स्क॰ टी॰
८९

पूर्वं कृतवता मत्तो विवस्वान् श्रेयो व्यगात् तत्प्रपृच्छन्नाह इति वक्तुं देवहेलनं उग्रपरमाधर्मवेनार्थः ब्रह्मैव गृणन्मीता
नां श्रावयन्निव मेवाह श्रुत्वा हे सः पापस्य निहन्तये श्रीं ओं ब्रह्मन् लिङ्ग कृत्वा पृथो नमः प्रणामे कृतमेति ९९ इति दोषके
श्च च्युतेनाभिहितं विवस्वान् लवनं व्रतमच्युतिहितं मत्वा तत्स्यव्रतस्य शङ्किकामाः तदशेषकर्मणां तत्स्यव्रतस्यान्येषा
मुशेषकर्मणां च मात्वा कृतफलं भूतेतमेव नेमुः यतः सर्ववायघ्नकपापमानेकः ३० हृदेशमर्थं प्रलब्धा वंवि

पूर्वं विवस्वान् यदपो धृतव्रताव्यगात् तैन ब्रह्मदेवहेलनं ब्रह्मांजलिं मूर्ध्नि पन्नत्येह सत्कृत्वानमोधो
वमनं मगृहत्वं ९९ इत्यच्युतेनाभिहिता व्रताबलामतां विवस्वान् लवनं धृतमच्युति तस्यांतिकामाः
स्तदशेषकर्मणां मात्वा कृते ते मुख वसम्प्रपतः ३० नात्मत्वावनत्वा हृद्य भगवान्देवकीसुतः वा
सोमितानाम्यः प्रायश्च कृत्वा कृतान्ते नतोषितः ३१ हृदेप्रलब्धाः उपयावदस्थापिताः प्रस्तोभिताः क्रीडनव।
त्कृताविताः वस्त्राणि वेवापहृतानात्तथाप्यमुं तानाम्यस्यघ्निपसंगनिहृताः ३२

ताः पूर्वं विवस्वाद्यस्यादिना उपलायालंकाया प्रवस्थापिताः स्थानिताः प्रयागमस्स्वबासोसिद्ध्याग्रहणार्थस्तोभि
तः उपहसिताः मतंकुर्वाणिनो न मेत्यादिना क्रीडनवत्कारिताश्च ब्रह्मांजलिमित्यादिना प्रायश्चित्तकलेनना।
नम्यस्यवसोघदत्तानापष्पत् नन्कृतप्रियसमगनिहताः श्रीकृष्णेन सुखिताः ३३

प्रेमसंगमेन सज्जिता वशीकृताः अतो गृहीतविस्रस्ताः सद्योनीवीवल्ल्यः गृहीतविस्रस्तत्वमेवाह तस्मिन्कृष्णे
लज्जाकुलेक्षणाः लज्जाविलसितमीक्षणं यासां ताः २३ दामोदर इति भक्तवात्सल्यं दर्शयति अबलाभतिः
२४ भोः साध्व्यो भवतीनां मद्दर्शनमेव संकल्प्यते मनोरथः सलज्जयाभ्युक्ताभिरकथितोऽपि मया विदितः समया
युक्तमोदितः अतः सद्यो भवितुमर्हति इति संभावनान्नयाधार्यंतिकौ न भविष्यतीति सूचितं २५ न तु न इत्यत

परिधाय स्ववासांसि प्रेमसंगमसज्जिताः । गृहीतविस्रस्तनीवेल्लस्तस्मिन्लज्जाकुलेक्षणाः ॥ २३ ॥ ना
मामिह आय भगवान् स्वपादस्पर्शकाम्यया । धृतव्रतानां संकल्पमहादामोदरोऽबलाः ॥ २४ ॥ संकल्पो
विदितः साध्व्यो भवतीनां मदर्चनं । मयानुमोदितः सोऽसौ सत्यो भवितुमर्हति ॥ २५ ॥ न मय्यावेशितधि
यां कामः कामाय कल्पते । भर्जिताः क्वथिता धानाः प्रायो बीजाय नेष्यते ॥ २६ ॥ याताबला
व्रजं सिद्धा मयेमा रंस्यथ क्षपाः । यदुद्दिश्य व्रतमिदं चेरुरार्यार्चनं सतीः ॥ २७ ॥

आह न मयीति कामाय पुनः कामभोगाय विषयाभिमुखेष्वः कामस्यापि शांतिहेतुत्वादिति भावाः कामाः
प्ररोहहेतवो न भर्जिताः दग्धाः क्वथिताः पक्वाः धाना यवादिबीजांकुरोत्पादनाय न भवंतीति
लोकः यापुनः प्ररोहमपि सूचयतीत्याह नेति २६ सिद्धाः पूर्णमनोरथाः तदाह
इमाः आगामिनीः शरद्रात्रीः मया रंस्यथेति आर्याकात्यायनी
सतीः सत्यः २७ ॥ राम ॥

श्रीः भा०द० पू०टी० ५

विप्रभार्याणामनुग्रहाय यज्ञवाटं गच्छन् विप्राणां काठिन्यमभिप्रेत्य तेभ्योपि द्रुमाः श्रेष्ठा इति तानभिनंदति
तिवक्ताभिः ३१ हे स्तोक कृष्णादयो गोपाः एतान् द्रुमान् पश्यत परार्थमेवैकांतेन जीवितं येषां तान् तदाह

शुक उवाच इत्यादिष्टा भगवता लब्धकामाः कुमारिकाः ध्यायंत्यः तत्पदांभोजं कृच्छ्रान्निर्विविशु
र्व्रजं २८ अथ गोपैः परिवृतो भगवान्देवकीसुतः वृंदावनाद्गतो दूरं चारयन्गाः सहाग्रजः
२९ निदाघार्कातपे तिग्मे छायाभिः स्वाभिरात्मनः आतपत्रायितान्वीक्ष्य द्रुमानाह व्रजौकसः
३० हे कृष्ण स्तोक हे अंशो श्रीदामन्सुबलार्जुन विशालर्षभ तेजस्विन्देवप्रस्थ वरूथप ३१ पश्य
तैतान्महाभागान्परार्थैकांतजीविनः वातवर्षातपहिमान्सहंतो वारयंति नः ३२ अहो एषां
वरं जन्म सर्वप्राण्युपजीवनं सुजनस्येव येषां वै विमुखा यांति नार्थिनः ३३ पत्रपुष्पफलच्छा
यामूलवल्कलदारुभिः गंधनिर्यासभस्मास्थितोक्मैः कामान्वितन्वते ३४ एतावज्जन्मसा
फल्यं देहिनामिह देहिषु प्राणैरर्थैर्धिया वाचा श्रेय—वाचरेत्सदा ३५

वातवर्षादीन्स्वयं सहमानाः अस्माकं वारयंति सुजनस्य कृपालोरर्थिन इव ३३ निर्यासो रसः तोक्मा ः
पल्लवाः यद्वा क्रमात् पल्लवादिसमूहैः कामान्वितन्वते अर्थिन इति शेषः ३४ देहिषु जन्मसाफल्यमेतावत् कि
यत् प्राणादिभिः देहिनां श्रेय आचरेत् ३५ ॥ ५

ह्याभिनंदयन्प्रवालादिसम्बर्हैः ततश्चावालानांतत्रणांमध्यात्तोयमुनांगतः प्राप्तः ३६ कुमारिकाभ्यः सर्वमे
वतत्रमीऽऽलेत्या गृहीतभोज्यानामेवनिर्गमात् तथातीऽस्मकं ३८ इति भा द वि यो श
येद्वाविंशतमोध्यायः २२ त्रयोविंशेतत्रगोपैरन्नयाञ्चापदेशतः भक्त्यानुग्रहात्कृष्णोदीक्षितानन्नमाप्य

इतिप्रवालस्तबकफलपुष्पदलोत्करैः तरूणांनम्रशाखानांमध्येनयमुनांगतः ३६ तत्रगाः
पाययित्वापः सुमृष्टाः शीतलाः शिवाः ततोनृपस्वयंगोपाः कामंस्वादुपपुर्जलं ३७ तस्याउ
पवनेकामंचारयंतःपशून्नृप कृष्णरामावुपागम्यगोपाववचमब्रुवन् ३८ इति भा द
ते श स्कं द्वा पो यः २२ शुकउवाच तत्रगतोपविष्टास्तेगोपालायमुनातटे कृत
बुभुक्षितास्तानजगदामकृष्णोजगम्यतौ १ गोपाऊचुः रामराममहावीर्यकृष्णदुष्टनिबर्हण एष
वैबाधतेक्षुन्नस्तच्छांतिंकर्तुमर्हथः २ शुकउवाच इतिविज्ञापितोगोपैर्भगवान्देवकीसुतः भ
क्तायाविप्रभार्यायाः प्रसीदन्निदमब्रवीत् ३ श्रीभगवानुवाच प्रयातदेवयजनंब्राह्मणाब्रह्म
वादिनः सत्रमांगिरसंनामह्यासतेस्वर्गकाम्यया ४

त भक्तायाऽइत्येकवचनेमथः मातुस्त्वाभिप्रायेण यद्वाजातावेकवचनं ३ ॐनमोनमोगजेंद्रायएकदं
तधरायच नमईश्वरपुत्रायगणे
शायनमोनमः
॥

श्रीः देवयजनेयजनवाटेअस्मद्विसर्जिताः ग्रावाभ्यांप्रहिताः संतोयावावधंयुष्माकंकोनवलजा नन्वंतथाप्यपात्र
भा॰द॰ त्वात्अस्माकंकिमितिदास्यंतीतिचेत्तत्राह कीर्तयंतइति अस्मान्नामयुष्माकंपात्रतामविष्यतीतिभावः ७
स्क॰टी अविद्विदैवनिकृष्टेवर्तमानेमंत्रोवोपदत्रेउल्लंघनं अभिलषन्तः वद्वेदनंअद्धावयपाप्तिनहियच्छतेति ८ टी
५९ हितोवयमभोज्यान्नाइति वदिष्यंतीतिभयमेवापांक्याहुः दीक्षायाआरभ्याग्नीषोमीयपशुमस्थालंभात्पूर्वेदोषः

तत्रगत्वोदनंगोप्यायाचनास्मद्विसर्जिताः कीर्तयंतोभगवतआर्यस्याममनामिधां ५ इत्यादि
ष्टाभगवतागत्वायाचनेनेतथा कृतांजलिपुटाविप्रान्दंडवत्पतितान्भुवि ६ हेभूमिदेवाशृणुत
कृष्णस्यादेशकारिणः प्राप्तान्जानीतभद्रंवोगोपान्नोरामचोदितान् ७ गावादयंत्नावविहृत्यदूर
नेक्षुत्क्षामाच्युतोऽस्यग्रजोत्तुभुक्षिता तयाद्विजाभोदनमर्थिनोयदिश्रद्धाचवोयच्छतधर्मवित्तमाः
श्रवदीक्षितस्याविनाचमशनत्रुहिदुष्यति ९ इतितेभगवद्याच्ञांशृण्वंतोपिनशुश्रुवुः क्षुद्राशा
भूरिकर्माणोबालिशावृद्धमानिनः १० देशकालपृथग्द्रव्यमंत्रतं——त्रमृत्विजः देवतायजमान
नस्वक्रतुधर्मश्चयन्मयाः ११

एपा

ननेनोन्यत्रसोत्रामण्यामित्रामदा अग्नीषोमीयामस्थालंमात्मवैसौत्रामण्यांवावः अमोज्यात्रेवेननतोमयत्र
रमिन्नदोषइत्यर्थः ९ तदेतत्कृष्णस्यवस्तुगोपीस्वाध्यायमत्रंयेषांतेयज्ञास्तन्दृष्टाणान्तवंतःकर्तृणः भूरिदोणिकेर्मा
ण्यादिकानिक——गण्यपराते अतोबालिशाः अस्ताःहृथाद्भावेहृत्वाद्भुतिमानेवंतः १० ननुकर्मकर्मसमुल्लंघ्य
देशकालेन्याप्यर्चमनस्यैकपदेयंतत्राह देशेतिपृथकद्रव्यंतत्रप्रयोजनम गोधर्मोयन्मयं ११ ॐतास॰
वंद्रायनमः

मनुष्यमितिदृष्ट्वा मर्त्यात्मानो ब्राह्मणा वयं महान्त इति मन्यमानाः १३ लौकिकीं गतिमिति न हि का
र्यार्थं नानिर्विघ्नं नेको वा याचकेन वा पराभूयन्त इत्यादि लोकस्थितिं दर्शयन् १४ ज्ञापयन् बोधयन् केव
लं देहेन गृहे वसंति धियात्मन्येवोषितः यतो मय्यपि स्त्रियः श्रुयथा स्त्रियथमिति स्त्रियं सहन्नमन्नदास्यंति

तं ब्रह्म परमं साक्षाद्भगवंतमधोक्षजं मनुष्यदृष्ट्या दुष्प्रज्ञा मर्त्यात्मानो न मेनिरे १२ न ते यदोमि
ति प्रोचुर्न नेति च परंतप गोपा निराशाः प्रत्येत्य तथोचुः कृष्णरामयोः १३ तदुपाकर्ण्य भगवा
न् प्रहस्य जगदीश्वरः व्याजहार पुनर्गोपान्दर्शयँल्लौकिकीं गतिम् १४ मां ज्ञापयत पत्नीभ्यः
ससंकर्षणमागतं दास्यंति काममन्नं वः स्निग्धा मय्युषिता धिया १५ गत्वाथ पत्नीशालायां
दृष्ट्वासीनाः स्वलंकृताः नत्वा द्विजसतीर्गोपाः प्रश्रिता इदमब्रवीत् १६ नमो वो विप्रपत्नीभ्यो
निबोधत वचांसि नः इतोविदूरे चरता कृष्णेनेहेषिता वयम् १७ गाश्चारयन्स गोपालैः सरा
मो दूरमागतः बुभुक्षितस्य तस्यान्नं सानुगस्य प्रदीयतां १८ श्रुत्वाच्युतमुपायातं नित्यं तद्दर्शनो
त्सुकाः तत्कथाक्षिप्तमनसो बभूवुर्जातसंभ्रमाः १९ चतुर्विधं बहुगुणमन्नमादाय भाजनैः
अभिसस्रुः प्रियं सर्वाः समुद्रमिव निम्नगाः २० ॥

१५ इषिताः प्रेरिताः १७ सरामो गोपालैः सह १८ तत्कथाक्षिप्तमनस्त्वात्तद्दर्शनोत्सुकाः अत एव
तमुपायातं श्रुत्वा जातसंभ्रमा बभूवुरिति १९ भक्ष्यभोज्यलेह्यचोष्यभेदैः चतुर्विधं बहुगुणं संस्का
रविशेषैः बहवो गुणा रससौरभ्यादयो यस्मिंस्तत् भाजनैरमत्रैर्भाण्डैः २० ॥
॥

पत्यादिभिर्वार्यमाणा अपि प्रियं श्रीकृष्णमभिसत्कर अभिजग्मुः श्रुतत्वेपोरहतैः समुद्रं निम्नगा इवेति
श्रवहेतव भगवतीति दीर्घं बहुकालं श्रुते श्रवणे धृत आश्रयो याभिः ताः २२ तथायातः सत्पतदृष्टपूर्वा(
षाह्यः हिरण्यवत्परिधिः परिधानं यस्य तं पीताम्बरमित्यर्थः वरमाल्यैर्बर्हैर्धातुभिः प्रवालैश्च नटवद्वे
षो यस्य तं अनुव्रतस्य सख्युः अंसे मो विन्यस्तो विहितो हस्तो येन तं इतरेण हस्तेन लीलया अब्जं धुनानं भ्राम
यन्तं कर्णोत्पले यस्य तं अलकाः कपोलयोर्यस्य मुखाब्जहासो यस्य तं च तेन २४ बहुशः श्रुतानाये प्रिय

निषिध्यमानाः पतिभिः भ्रातृभिर्बंधुभिः सुतैः भगवत्युत्तमश्लोके दीर्घश्रुतधृताशयाः २२
यमुनोपवने शोकनवपल्लवमंडिते विचरंतं वृतं गोपैः साग्रजं ददृशुः स्त्रियः २३ श्यामं हिरण्य
परिधिं वनमाल्यबर्हधातुप्रवालनटवेशमनुव्रतांसे विन्यस्तहस्तमितरेण धुनानमब्जं कर्णो
त्पलालककपोलमुखाब्जहासं २४ प्रायः श्रुतप्रियतमोदयकर्णपूरैर्यस्मिन्निमग्नाः मनसः
तमथाक्षिरंध्रैः अंतः प्रविश्य सुचिरं परिरभ्य तापं प्राज्ञं यथाभिमतयो विजहुर्नरेंद्र २५ ॥

तमस्योऽत्कर्षाः तपवकर्णपूराः कर्णपूरायेति कृतार्थीकुर्वंतीति तथा तैः कर्णादिनिवा यस्मिन् श्री
कृष्णे निमग्नमनसः गाविष्टचेतसः तं लोचनद्वारैः अंतः प्रविश्य सुचिरं उपगूह्य तापं जहुः यथा अभिमा
तयो अहंमतयः प्राज्ञं सुषुप्तिसाक्षिणं परिरभ्य तस्मिन् लयं प्राप्य जगत्तापम
निमित्तं त्यजंतीति तथेति २५ ॥

अखिलदृग्द्रष्टा सर्वबुद्धिसाक्षी तासामाशामपि विज्ञाय तयैवैतद्दिदृक्षयेति सक्तसर्वाशाः त्यक्ताः सर्वा आ
शा याभिस्ताः केवलमात्मनः कृष्णस्यैव दिदृक्षयेति २६ हे महाभागाः वः स्वागतं शुभमागमनं तद्देवा ह
अद्धा साक्षादित्यर्थः अहैतुकीमव्यवहितां फलाभिसन्धिरहितामन्तरव्यवधानरहितां निरन्तरमाह २७ आत्म
नः सर्वप्रेष्ठत्वमुपपादयति २८ तत्तस्मान्नार्यो यूयं यात देवयजनं यज्ञवाटं गच्छत ननु ज्ञातयः किमिति

तासां तत्यक्तसर्वाशाः प्राप्ता आत्मदिदृक्षया विज्ञायाखिलदृग्द्रष्टा प्राह प्रहसिताननः २५
स्वागतं वो महाभागा आसितां करवाम किं यन्नो दिदृक्षया प्राप्ता उपपन्नमिदं हि वः २६ नन्वद्धा
मयि कुर्वन्ति कुशलाः स्वार्थदर्शिनः अहैतुक्यव्यवहितां भक्तिमात्मप्रिये यथा २७ प्राणबु
द्धिमनःस्वात्मदारापत्यधनादयः यत्सम्पर्कात्प्रिया आसंस्ततः को न्वपरः प्रियः २८ तद्यात दे
वयजनं पतयो वो द्विजातयः स्वसत्रं पारयिष्यन्ति युष्माभिर्गृहमेधिनः २९ पत्न्य ऊचुः
मैवं विभोऽर्हति भवान्गदितुं नृशंसं सत्यं कुरुष्व निगमं तव पादमूलं प्राप्ता वयं तुलसिदाम प
दावसृष्टं केशैर्निवोढुमतिलङ्घ्य समस्तबन्धून् ३०

यास्याम इति चेत् तत्राह पतय इति पारयिष्यन्ति समापयिष्यन्ति पत्नीनामनुग्रहसहायेष्वेषाः २९ नृशंसं कु
रु निगमं प्रतिज्ञां न मे भक्तः प्रणश्यतीति वेदं वा निगमं प्रतिज्ञातं तव पादमूलं वा न पुनरावर्त्तन्ते
इति पादाग्रावसृष्टमेव त्यक्तं यदि तन्नैव बहुमानेन केशैर्विवोढुं दासीभवितुं तस्मात् ईश्वरेण क्षेवा विधास्या
मइति शेषः यद्वा भवता युष्माभिः पतयः स्वसत्रं पारयिष्यन्तीति तत्राहुः शरणं नीति ३० ॥

श्रीः
भा॰ द
पू॰ टी
१८३

किं च नोस्मान्न गृह्णंतीति हे अरिंदम कामलोभादिप्रमथन भवतः पादयोः निपतितदेहा मामन्या स्वर्गादिगति
र्भवितुमर्हति मा भूत् तस्मात् दास्यमेवं विधेहीति ३२ मया उपेताः अनुज्ञाताः प्रसादे देवाश्च दर्पणे हृदेवाश्च
पीति ३३ तथापि त्वां त्यक्त्वा न शक्नुम इति चेत्तत्राह नेति ३३ प्रीतये सुखाय अनुरागाय स्नेहाय हि अंगसंग

गृह्णंति नो न पतयः पितरः सुता वान्भ्रातृबंध सुहृदः कुत एव चान्ये तस्माद्भवत्प्रपदयोः पति
तात्मनां नो नान्या भवेद्गतिररिंदमत द्विधेहि ३२ श्रीभगवानुवाच पतयो नाभ्यसूयेरन्पितृभ्रा
तृसुतादयः लोकाश्च वो मयोपेता देवा अप्यनुमन्वते ३३ न प्रीतयेनुरागाय ह्यंगसंगो नृणा
मिह तन्मनो मयि युंजाना अचिरान्मामवाप्स्यथ ३४ श्रवणाद्दर्शनाद्ध्यानान्मयि भावोनुकीर्तना
त् न तथा सन्निकर्षेण प्रतियात ततो गृहान् ३५ शुक उवाच इत्युक्ता द्विजपत्न्यस्ता यज्ञवाटं पु
नर्गताः ते चानसूयवः ताभिः स्त्रीभिः सत्रमपारयन् ३६ तत्रैका विधृता भर्त्रा भगवंतं यथाश्रु
तं हृदोपगुह्य विजहौ देहं कर्मानुबंधनं ३७

मः अंगानां संगः शरीरसंपर्कः तस्माद्गृहे स्थिताः पतिरूपेण मामेव सेवध्वमिति भावः ३५ अनसूय
वः प्रद्वेषरहिताः सत्रं यज्ञमपारयन् समाप्तिं चक्रुः ३६ तत्रैका द्विजपत्नी भर्त्रा विधृता वनिता देहं तत्रैव वि
हाय चैतन्येन भगवंतं प्राप्तेत्यर्थः ३७ कृष्ण कृष्ण
कृष्ण

हृषावाहूतैः हृषेणावावावहूतैः चरितैस्तु रमयन् ४९
प्रत्युपमीलयन् प्रकुर्वन् गोगोपगोपीरित्यर्थः
यितं रेमे इत्यर्थः ४८ प्रत्युक्तानिषकारमाह व्यभिचारत्वयोर्नरान्तकरणावंत्रोः विधंबरयोर्यामहत्वमद
नवेनः तत्तानागमासोवयमिति प्रत्युक्तसेवानितदासभार्याः तत्तुनिवमानयंतोभगवद्भक्तिरहितमात्मानं
व्यनंदविन्याह ४' प्रोक्तसाविवंदेवामितिविग्रणानिजन्मव्रतेश्चवर्यक्रियाः कर्माणिद्वादशंव क्रिया

भगवानपिगोविंदः तेनैवान्नेनगोपकाः वनविधेनाशयित्वास्वयंचवनर्भजेमयुः ४८ एवंली
लानरवपुर्लोकमनुशीलयन् रेमेगोगोपगोपीनांरमयन्नूपवाहूतैः ४८ प्रयात्तुस्समवि
प्रान्तेम्यत्तुनयत्ततानागमः यदिशेषरयोर्याज्ञामहत्मत्यविडंबयोः ४' दृष्ट्वास्त्रीणांभगवति
कृतिभक्तिमलोकिकीं आत्मानंचतयाहीनंमत्वानमावगर्हयन् ४८ विघाः चिगस्मा
कंतिवृत्जन्मधिग्व्रतंधिग्बहुज्ञतां धिक्कुलंधिक्क्रियादाक्ष्यंविमुखायेत्वधोक्षजे ४२
नूनंभगवतोमायायोगिनामपिमोहिनी यद्वयंगुरवोनृणांस्वार्थमुह्यामहेद्विजाः ४२
अहोपश्यतनारीणामपिकृष्णेजगद्गुरौ दुरंतभावंयोविध्यन्मृत्युपाशान्गृहाभिधान् ४४

दादाभित्वेकंचापरंधिगिति अथिदैपेवयमथोक्षजेविमुखः तेषांजन्मादितत्सर्वंधिगिधिगितिव्यगर्हया
व्रित्यर्थः ४२ स्वार्थेहरिभक्तौ ४२ योविध्यत् अच्छिनत् नत दुरंतभावंभक्तिंपश्यतेति
४४ ॥

श्रीः
भा-द
पू-टी
२४

द्विजातिसंस्कारः उपनयनं न क्रिया सन्ध्योपासनादयः आत्ममीमांसा आत्मविचारः ४५ अहो कष्टं भगव
ता कारुण्येन सागरेण प्रबोधिता न बुद्ध्याम इत्याहुः ४६ ननु महत्सेवा प्राप्तो योगोपायस्मर्थापयामास नो युक्ता

नासां द्विजातिसंस्कारो न निवासो गुरावपि न तपो नात्ममीमांसा न शौचं न क्रियाः शुभाः ४५
अथापि ह्युत्तमश्लोके कृष्णे योगेश्वरेश्वरे भक्तिर्दृढा न चास्माकं संस्कारादिमतामपि ४६ ननु
स्वार्थविमूढानां प्रमत्तानां गृहेहया अहो नः स्मारयामास गोपवाक्यैः सतां गतिः ४७ अन्यथा
पूर्णकामस्य कैवल्याद्याशिषां पतेः ईशितव्यैः किमस्माभिरीशस्यैतद्विडम्बनम् ४८ हित्वा
न्यान्भजते यं श्रीः पादस्पर्शाशयासकृत् स्वात्मदोषापवर्गेण तद्याच्ञा जनमोहिनी ४९ देशः
कालः पृथग्द्रव्यं मन्त्रतन्त्रर्त्विजोग्नयः देवता यजमानश्च क्रतुर्धर्मश्च यन्मयः ५० स एष भगवान्विष्णुः
साक्षाद्योगेश्वरेश्वरः जातो यदुष्वित्याशृण्म ह्यपि मूढा न विद्महे ५१ अहो वयं धन्यतमा येषां नस्ता
दृशीः स्त्रियः भक्त्या यासां मतिर्जाता अस्माकं निश्चला हरौ ५२ नमस्तस्मै भगवते कृष्णायाकुण्ठमेध
से यन्मायामोहितधियो भ्रमामः कर्मवर्त्मसु ५३ स वै न आद्यः पुरुषः स्वमायामोहितात्मनां
अविज्ञातानुभावानां क्षन्तुमर्हत्यतिक्रमम् ५४ इति स्वाघमनुस्मृत्य कृष्णे ते कृतहेलनाः दिदृ
क्षवोपि ते विप्राः कंसाद्भीता न चाचलन् ५५

तस्मादयुक्तमिति चेत्तत्राहुः ४७ स्वात्मदोषापवर्गेण चापल्यगर्वादित्यागेन ४९ इति श्रुत्वानामेवं सर्वे
द्रष्टुं न वन्तोपि तथापीति ५० तयोर्दर्शनाय न जग्मुः अच्युतयोः कंसाद्भीताः स्वाश्रमस्था एव भगवन्तं मन
न्त्रित्यर्थः ५५

१ श्री वा दी का द श म धे च यो विं ध्यायः २४ चतुर्विंशे महेंद्रस्य मखं व्यावर्त्य हेतुभिः कृष्णः प्रव
र्तयामास गोवर्धनमखोत्सवं भूसुराणां क्रियायागैर्वनिरस्य मखः स्मरेस्तव मखवन्मदभगायतन्मखेमत्य
वारयन् ब्राह्मणाः कंसाद्भीताः स्वाश्रमस्थाएवमग्नावतेनमभजन् भगवानपितत्रैवनिवसन् इंद्रयाग
कृतोद्यमान् गोपानपश्यदितिसंबंधः १ वृथासंभ्रमोयं न भवति मखोयमिति एवंचेत् किमत्रफलं
काद्देवताकेनाधिकारिणाकेनवासाधनेनसाध्यते ३ एतद्ब्रूहिमहान्कामोममशुश्रूषावर्तते यद्यामव

श्रु ३ व

१ श्री ग ते श्र स्कं त्रयो वि ध्या यः २४ भगवानपितत्रैवबलदेवेनसंयुतः अपश्यन्नि
वसन्गोपानिंद्रयागकृतोद्यमान् १ तदभिज्ञोपिभगवान्सर्वात्मासर्वदर्शनः प्रश्रयावनतोपृच्छद्वृ
द्धान्नंदपुरोगमान् २ कथ्यतांमेपिताकोयंसंभ्रमोवउपागतः किंफलंकस्यवोद्देशः केनवासाध्य
तेमखः ३ एतद्ब्रूहिमहान्कामोमह्यंशुश्रूषवेपितः नहिगोप्यंहिसाधूनांकृत्यंसर्वात्मनामिह
४ अस्त्यस्वपरदृष्टीनाममित्रोदास्तविद्विषां उदासीनोरिवद्वर्ज्यः आत्मवत्सुहृदुच्यते ५

महान्कामो हृष्यत इति तस्मिन्स्थितेप्यन्याह नेनेति सर्वात्मानां सर्वशात्मदृष्टीनां अतएवनविद्यतेस्वःपरइति
दृष्टीर्येषांतथास्वपरइतिदृष्ट्यभावादेवनतत्रोदासमित्रादयोपियेषांसंतीत्याह अस्तीति नमित्रंउदास्तउ
दासीनः विद्विट्येषांतेषांकृत्यंसर्वंकर्मनगोपनीयं किंचिदस्तीत्यर्थः सत्यपिभेददर्शनेउदासीनःप्रा
प्तवद्वर्ज्यः आत्मतुल्यत्वात्सुहृन्मंत्रेपुनर्वर्जनीयइत्याह उदासीनइतिकिंचसुहृद्भिःसहविचार्यकर्त्ता
नैवकर्त्तकर्त्तव्यं नतद्गतानुगतिमात्रेणेत्याह
ज्ञात्वेति ५ राम कृष्ण

श्री:
भा॰ द॰
स्क॰ टी॰
२५

तावत्तत्तावत्तत्र विदुषो यथावत्कर्मफलं स्यात्तथा नाविदुषः ६ भगवन्नामयं क्रियायोगः शास्त्र
तोविवावितः वा लौकिकः तन्मे श्रद्धतः साधु भणपतो ७ प्रवृत्तो लौकिक आचारः शास्त्रो वेति साधुसो
पपत्तिकं भणपतो कथ्यतामिति ७ आचारं शास्त्रमेवेति महेन्द्रकमाह पर्जन्य इति आत्ममूर्तयापि या
मूर्तयः ततः किमत आह ८ तमिंद्र वाई वामेयानां तद्रेत मातत्त्वृष्टिपयसा ९ उपजीवंतिजी

तावत्तावत्कर्माणि जनोऽयमनुतिष्ठति विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत् ६
तत्रत्तावत्क्रियायोगो भवतां किं विधारितः अथवा लौकिकः तन्मे श्रद्धतः साधु भणपतां ७ श्री
वेदः पर्जन्यो भगवानिंद्रो मेघास्तस्यात्ममूर्तयः तेऽभिवर्षंति भूतानां प्राणनं जीवनं पयः ८
तं तात वयमन्ये च वार्मुचां पतिमीश्वरं द्रव्यैस्तद्रेतसा सिद्धैर्यजंते क्रतुभिर्नराः ९ तच्छेषेणोप
जीवंति त्रिवर्गफलहेतवे पुंसां पुरुषकाराणां पर्जन्यः फलभावनः १० य एनं विसृजेद्ध
र्मं पारंपर्यागतं नरः कामाल्लोभाद्भयाद्द्वेषात्स वै नाप्नोति शोभनं ११ श्रीशुक उवाच वचो नि
शम्य नंदस्य तथान्येषां व्रजौकसां इंद्राय मन्युं जनयन्पितरं प्राह केशवः १२

विकां कल्पयंति त्रिवर्गफलहेतवे धर्मार्थकामसिद्धये नन्वकृष्यादिभिर्जीवितां किमिंद्रेणेत्याह
पुंसामिति फलसाधकः पर्जन्यं विना कृष्यादिवैकल्यादित्यर्थः १० इंद्राय मन्युं जनयन्निति कोप
जननद्वारा गर्वपर्वतादिरूपं भवतारयितुं देवतानिराकर
णं तत्त्वयमेवाभिप्राय इत्यर्थः
॥ १२ ॥

प्रथमं तावत्कर्मवादेन देवान्निराकरोति कर्मेति नन्वनुगमकर्मणः केवलात्कर्तव्यसिद्धिः स्यात् सुदोग्प्रीलितमी
दमानानां समतिविलसितं श्रद्धा कर्मणः करणाकारणमेन वचनतेवगते किं तेनोपपन्नेनाम २२ किं चिकेचि
त्सुवदतिमाहुमभीताः कर्मपदं तत्समीश्वरं मन्यते तन्मम अत्रयनिराकरोति २३ स्वयं कर्मभिर्बलिमा अन्येषानी
वानां कर्मणां फलरूपी फलदाता कर्तारं भजते न तत्कर्मफलदानेन २४ यतस्तत्कर्मणः स्वफलसिद्धेः उत्याबत

श्रीभगवानुवाच कर्मणा जायते जन्तुः कर्मणैव विलीयते सुखं दुःखं भयं क्षेमं कर्मणैवाभिप
द्यते २३ अस्ति चेदीश्वरः कश्चित्फलरूप्यन्यकर्मणां कर्तारं भजते सोपि न ह्यकर्तुः प्रभुर्हि सः २४
किमिन्द्रेण ह भूतानां स्वस्वकर्मानुवर्तिनां अनीशेनान्यथा कर्तुं स्वभावविहितं नृणाम् २५ स्व
भावं तं यो हि जनः स्वभावमनुवर्तते स्वभावस्थमिदं सर्वं सदेवासुरमानुषम् २६

अन्येव अजनागान्तनन्तल्पत्वान्न देवतया कृत्यमित्याह किमिन्द्रेणेति अन्यकर्मणोपि प्रवृत्तिर्देवतायामपेक्षतये
वत्कथं सर्वथा देवतया अनुपयोग इत्याशंक्याह स्वभावविहितमिति स्वभावेन प्राक्तनसंस्कारेण विहितं
यत्कर्म तदन्यथा कर्तुमनीशेन २५ यतो हि स्वगुणेति स्वभावतत्र इति प्रवृत्तेः संस्काराधीनत्वात्किमेतया
निरूपेणोत्यर्थः २६

श्रीः
भा०१०
पू०टी०
५९

तस्मात्स्वभावतोनिष्पन्नस्यकर्मणएवसर्वकारणत्वात्कर्मैवपूज्यमित्याह १८ संपूजयेत्संमानयेत् न
नदेवतोद्देशेनरथ्यागात्मकत्वात्कर्मणः कथंदेवताविनासिद्धिरित्याशंक्याह कर्मांगमात्रंदेवतेतिपा
हमुपसंहरन्निवेदंतुवादमात्रमित्याशयेनाप्येवदेवतांसमर्थयतिनिग्रमसेति १९ हेतुबलेनैवविपक्षेदोषमा
ह आजीव्येतिउपजीवतिसेवतेसप्रहृत्रिवत्दृष्टांतेनैववर्णानांवृत्तिमाहवर्तेतेति २० ब्रह्मणावेदाध्य
यनादिनावैश्यपत्रेःवार्ताविध्यमाह कृषीति २१ कृषीवाणिज्यसहितागोरक्षाएवंत्रयंकुसीदंवृद्धिजीव

देहानुच्चावचान्जंतुः प्राप्योत्सृजतिकर्मणा शत्रुर्मित्रमुदासीनः कर्मैवगुरुरीश्वरः १८ तस्मा
त्संपूजयेत्कर्मस्वभावस्थः स्वकर्मकृत् अंजसायेनवर्तेततदेवास्यहिदैवतं १९ आजीव्यैकतरं
भावंयस्त्वन्यमुपजीवति नतस्माद्विंदतेक्षेमंजारान्नार्यसतीयथा २० वर्तेतब्रह्मणाविप्रोराज
न्योरक्षयाभुवः वैश्यस्तुवार्तयाजीवेच्छूद्रस्तुद्विजसेवया २१ कृषिवाणिज्यगोरक्षाकुसीदं
तूर्यमुच्यते वार्ताचतुर्विधातत्रवयंगोवृत्तयोनिशं २२ सत्वंरजस्तमइतिस्थित्युत्पत्त्यंतहेतवः
रजसोत्पद्यतेविश्वमन्योन्यंविविधंजगत् २३ रजसाचोदितामेघावर्षंत्यंबूनिसर्वतः प्रजाः
तैरेवसिद्ध्यंतिमहेंद्रः किंकरिष्यति २४

वनंचतुर्थं ननुगवामपिवृष्टिर्महेंद्राधीनैवेत्याशंक्याहनिरीश्वरंसांख्यमताश्रयेणनिराकरोतिसत्वमिति
स्त्राकृद्येन २१ अन्योन्यंस्त्रीपुरुषयोगेन २२ सर्वतः समुद्रशैलोषरादिष्वपिवृष्टिदर्शनेनमेघानांस्वं
कत्वंवृष्टेरितिभावः तैरेवमेघैरेवसिद्ध्यंतिजीवंति तथापियोगक्षेमार्थंदेवतापेक्षेतियदतत्राहनतः
पुरइति २३ २४

५९

पुरः पत्तनानि जनपदा देशाः अस्माकं योगक्षेमहेतवो वनशैलादय एवेति भावः २४ ब्राह्मणानपि संगृह्णन्मख
निगमयति तस्मादिति स्वयमेवेन्द्रियागप्रयोगकल्पनामाह य इन्द्रयागस्य संभारा इति सार्धैः पंचभिः संभा
राः साधनानि २५ सूपान्तं मोदकपायसकेवलं पयसि पक्वं संयावादयो गोधूमादिविकाराः क्रमश्च सूपश्च

न नः पुरो जनपदा न ग्रामा न गृहा वयं वनौकसः तात नित्यं वनशैलनिवासिनः २४ तस्माद्ग
वां ब्राह्मणानामद्रेश्चारभ्यतां मखः य इन्द्रयागसंभारास्तैरयं साध्यतां मखः २५ पच्यन्तां विवि
धाः पाकाः सूपान्ताः पायसादयः संयावापूपशष्कुल्यः सर्वदोहश्च गृह्यतां २६ हूयन्तामग्नयः
सम्यग्ब्राह्मणैर्ब्रह्मवादिभिः अन्नं बहुविधं तेभ्यो देयं वो धेनुदक्षिणाः २७ अन्येभ्यश्चाश्वचाण्डाल
पतितेभ्यो यथार्हतः यवसं च गवां दत्वा गिरये दीयतां बलिः २८ स्वलंकृता भुक्तवन्तः स्वनुलि
प्ताः सुवाससः प्रदक्षिणां च कुरुत गोविप्रानलपर्वतान् २९ एतन्मम मतं तात क्रियतां यदि
रोचते अयं गोब्राह्मणाद्रीणां मह्यं च दयितो मखः ३० शुक उवाच कालात्मना भगवता शक्र
दर्पजिघांसया प्रोक्तं निशम्य नन्दाद्याः साध्वगृह्णन्त तद्वचः ३१ ॥

योः क्रमादेकदेहस्यार्थः अन्येषां पाठतः २६ योगक्षेमार्थं अश्वादीनामाह येनु सहिताः दक्षि
णाः धेनुदक्षिणाः नाध्ववादक्षिणा वा ब्रह्माभिः २७ यवसं तृणं बलिः नैवेद्यं २८ सर्वान् शिरःकं
येनान्नमोदयन्नाह यो ब्राह्मणाद्रीणां मह्यं मम च ३० ॥ ॥

श्री:
भा०द०
स्क०टी०
५८

तद्द्रव्येनतेनमहेंद्रमखद्रव्येणगिरिद्विजान्व्रतिपयथायथं ३१ यथायथंबलीनुपहृत्यदत्वाश्रद्दत्ताःसा
दराः ३३ अनडुद्युक्तानिउक्तमश्वयुक्तानिसद्विजाशिषः द्विजाशीर्भिःसहिताऽशांतिपठंपठद्भिःस्तु
विद्भिःसगिरिंप्रदक्षिणांचक्रुः ३४ गोपविश्रंभनंगोपानांविश्वासजननंकंचरूपंगतःप्राप्तःसन्बलिंभु

तथाचव्यदधुःसर्वंयथाहमधुसूदनः वाचयित्वास्वस्त्ययनंतद्द्रव्येनगिरिद्विजान् ३२ उपहृ
त्यबलीन्सम्यगादृतायवसंगवां गोधनानिपुरस्कृत्यगिरिंचक्रुःप्रदक्षिणं ३३ अनांस्यनडुद्यु ॥
क्तानितेचारुह्यस्वलंकृताः गोप्यश्चकृष्णवीर्याणिगायंत्यःसद्विजाशिषः ३४ कृष्णस्त्वन्यतम
रूपंगोपविश्रंभनंगतः शैलोस्मीतिब्रुवन्भूरिबलिमादद्बृहद्वपुः ३५ तस्मैनमोव्रजजनैःस
हचक्रेत्मनात्मने अहोपश्यतशैलोसौरूपीनोनुग्रहंव्यधात् ३६ एषोवजानतोमर्त्यान्कामरूपीव
नौकसः हंतिह्यस्मैनमस्यामःशर्मणेआत्मनोगवां ३७ इत्यद्रिगोद्विजमखंवासुदेवप्रणोदिताः
यथाविधायतेगोपाःसहकृष्णाव्रजंययुः ३८ इतिश्रीभागवतेदशमस्कंधेचतुर्विंशोध्यायः
२४

बलिमादत् अभ्यवहरत् ३५ तस्मैआत्मनेस्वात्मस्वरूपंव्रजजनैःसहनमःचक्रेअहोइतिसार्धश्लोकपाठतः
३६ कामरूपीसर्पादिरूपः अस्मैचुरहेशर्मणेक्षेमाय ३७ कुर्मैबालेमाकस्मभावेनगुणोवाकर्मागंवानहृ।
शोवाहेभः वार्त्ताकश्रीदेवतेतीतीयज्ञाद्देवत्वाभेसंमतानवमीष्टा ३८ इतिश्रीभावार्थदीपिकायांदशमे।

पंचविंशे कृष्णपूजके व्रजे नाशाय वर्षति उद्धृत्य गिरिमामासादरद्गोकुलं प्रभुः कृष्णो नाथो येषां तेभ्यः १
क्रुद्धः च सः इंद्रः सांवर्तकं नाम सेवृतेः प्रलयः तत्कर्तारं मेघानां प्रसिद्धं गर्जे प्रचोदयात् प्रेषयामास नत्रक
थं कृष्णनाथानां याते प्रवृत्त इत्याशंक्यात्मसंभावनयातिरलविवेकत्वादित्याशयेनाह वाक्यं चाहेत्यादिपंचा
भिः ईशमानी अहमेव ईश्वर इति गर्ववान् २ देवहेलनं देवस्य ममावज्ञां ३ अदृढैरसमर्थैः कर्ममयैः क्रि
यानिष्पन्नैः अतएव नाममात्रेण नौनिभैः नाममात्रेण यानौरिति व्यवच्छियते तत्सदृशैः आन्वीक्षिकीयमात्मानुसं

शुक उवाच इंद्रस्तदात्मनः पूजां विज्ञाय विहतां नृप गोपेभ्यः कृष्णनाथेभ्यो नंदादिभ्यश्चुकोप
सः १ गणं सांवर्तकं नाम मेघानां चांतकारिणां इंद्रः प्रचोदयत्क्रुद्धो वाक्यं चाहेशमान्युत २ अ
हो श्रीमदमाहात्म्यं गोपानां काननौकसां कृष्णं मर्त्यमुपाश्रित्य ये चक्रुर्देवहेलनं ३ क्रियादृढैः क
र्ममयैः क्रतुभिर्नाम नौनिभैः विद्यामान्वीक्षिकीं हित्वा तितीर्षंति भवार्णवं ४ वाचालं बालि
शं स्तब्धमज्ञं पंडितमानिनं कृष्णं मर्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियं ५ ॥ ॥

त्पत्तिरूपं य तथा वाचालं बहुभाषिणं बालिशं शिशुं शिशुस्व अज्ञं स्तब्धं पंडितमानिनं पंडितंमन्यं अतः स्तब्धमवि
नीतमतिं निंदायायेजितापि इत्थं भारती श्रीकृष्णं स्तौति तथाहि वाचालं शास्त्रयोनिं बालिशमेव शिशुव
त्रिरभिमानं स्तब्धमनन्यस्य स्वस्य स्तब्धस्य भावादनन्तं अज्ञं सत्वा त्रियतयस्मात् सर्वज्ञमित्यर्थः पंडितमा
निनं अस्यविदो बहुमाननीयं कृष्णं सदानंदरूपं परब्रह्म मर्त्यान् तथापि भक्तवात्सल्ये
नमनुष्यतया प्रतीयमानमिति ५ ॥ ॥ ॥

श्री॰ अवलिप्तानां आध्मापितात्मनां हे हरिन्दैत्यहन्तारो धुनुत अपनयत श्रीमदेन यः स्तंभो गर्वस्तं ६ विभा
भा॰ द॰ न्त्वान्मेघान्प्रत्याह अहं चेति अनुव्रजे अनन्तरमेवागमिष्यामि मरुद्गणैर्देवगणैः सह ७ मघवता
पू॰ टी॰ इन्द्रेण निर्मुक्तं बंधनं येषां ते प्रलयाभिप्रायेण बद्धा आसन् तदा निर्मुक्तबंधनात् संतः आसारैः धारासं
९८ पातैः गोकुलं पीडयामासुः ८ स्तनयित्नुभिरशनिभिर्नदंतः मरुद्गणैरावहप्रवाहादिवायुसमूहैः

एषां श्रियावलिप्तानां कृष्णेनाध्मापितात्मनां धुनुत श्रीमदस्तंभं पशून्नयत संक्षयं ६ अहं
चैरावतं नागमारुह्यानुव्रजे व्रजे मरुद्गणैर्महावीर्यैर्नंदगोष्ठजिघांसया ७ शुक उवाच
इत्थं मघवताज्ञप्ता मेघा निर्मुक्तबंधनाः नंदगोकुलमासारैः पीडयामासुरोजसा ८ विद्यो
तमाना विद्युद्भिर्नदंतः स्तनयित्नुभिः तीव्रैर्मरुद्गणैर्नुन्ना ववृषुर्जलशर्कराः ९ स्थूणा
स्थूला वर्षधारा मुंचत्स्वभ्रेष्वभीक्ष्णशः जलौघैः प्लाव्यमाना भूर्नादृश्यत नतोन्नतं १० अत्या
सारातिवातेन पशवो जातवेपनाः गोपा गोप्यश्च शीतार्ता गोविंदं शरणं ययुः ११ शिरः
सुतांश्च कायेन प्रच्छाद्यासारपीडिताः वेपमाना भगवतः पादमूलमुपाययुः १२ ॥ ॥

नुन्नाः प्रेरिताः जलशर्कराः जलोपलान् स्थूणावत्स्थूलाः अभ्रेषु मुंचत्सु सत्सु नतोन्नतं नतं निम्नमुन्न
तं तद्विपरीतं यथा भवति तथा न दृश्यत १० जातवेपना जातकंपाः ११ तत्र पशुसुतांश्च याता तेन विशिना
शिशिर इति १२ ॥ ॥ राम॰

गोपगोपीनांप्रार्थनामाह त्वमेवनाथोयस्यतस्मिन्गोकुलेगवांनःसर्वेषांचनः अस्माकंदेवादिंद्रात्त्रातुंरक्षितुमर्हसि
विज्ञाप्यनात्सर्वमेवकुपितेनेंद्रेणकृतंतद्देशोमेनेकथयमेनेतदाह १४ अपगतेसंतत्वयस्यतद्दर्षणेन अतिशायितोवा
तोयसिक्तेन अतिवातंशिलामयंशिलाप्रचुरं १५ ततःप्रतिज्ञापूर्वंगोवर्द्धनोद्धरणमाह १५ प्रतिविधिंप्र
तीकारंस्वसामर्थ्येनसाधयिष्यामितेनचसौयालोकेशमानिनोश्रीमदलक्षणंतमोहरिष्यामि बहुवचनेनच

कृष्णकृष्णमहाभागत्वन्नाथंगोकुलंप्रभो त्रातुमर्हसिदेवान्नःकुपिताद्भक्तवत्सल १३ शिलाव
र्षनिपातेनहन्यमानमचेतनं निरीक्ष्यभगवान्मेनेकुपितेन्द्रकृतंहरिः १४ अपर्त्वत्युल्बणंवर्षम
तिवातंशिलामयं स्वयागेविहतेस्माभिरिन्द्रोनाशायवर्षति १५ तत्रप्रतिविधिंसम्यगात्म
योगेनसाधये लोकेशमानिनांमौढ्याद्धरिष्येश्रीमदंतमः १६ नहिसद्भावयुक्तानांसुराणामी
शविस्मयः मत्तोसतांमानभंगःप्रशमायोपकल्पते १७ तस्मान्मच्छरणंगोष्ठंमन्नाथंमत्परिग्र
हं गोपायेस्वात्मयोगेनसोयंमेव्रतआहितः १८ इत्युक्त्वैकेनहस्तेनकृत्वागोवर्द्धनाचलं
दधारलीलयाकृष्णश्छत्राकमिवबाल
कः १९

त्राणादीनभिप्रेत्य १६ ननुदेवाःसात्त्विकाःतत्कथंकुतस्तेषांतमःतत्राहनहीतिसद्भावःसत्त्वंसद्भावयु
क्तानांसुराणांईशोहमेवेतिविस्मयोगर्वोहियस्मात्तन्नघटतेअतःअसतांतेषांमानभंगःप्रशु
मायेत्याहमत्तइति १७ गोपायेरक्षिष्यामिकिंचसोयंमेमयाव्रतोनियमःसंकल्पोवाआहितःधृतःइत्य
र्थः कृष्णःउत्कमछत्राकंननु शिलींध्रंयथा १९ ॥ १९ ॥

श्री०
भा० द०
पू० टी०
९९

यथोपजोषं यथाश्रवं सधनाः शाकटमंडलीसहिताः २० सव्रजाः शाकटमंडलीसहिताः सोपजीविनः भृत्यपुरोहितादिसहिताः यथावकाशमलेकोचेनस्थिताः २२ पदात् स्थानात् सप्तदिनानि

अथाह भगवान्गोपान्हेंबतात व्रजौकसः यथोपजोषंविशत गिरिगर्त्तंसगोधनाः
२० नत्रासइहवः कार्योमद्धस्ताद्रिनिपातने वातवर्षभयेनालंतत्त्राणंविहितंहिवः २१
तथानिर्विविशुर्गर्त्तंकृष्णाश्वासितमानसः यथावकाशंसधनाः सव्रजाः सोपजीवि
नः २२ क्षुत्तृड्व्यथांसुखापेक्षांहित्वातैर्व्रजवासिभिः वीक्ष्यमाणोदधाराद्रिंसप्ताहंनाच
लत्पदात् २३ कृष्णयोगानुभावंतंनिशम्येन्द्रोतिविस्मितः निस्तम्भोभ्रष्टसंकल्पः
स्वान्मेघान्संन्यवारयत् २४ खंव्यभ्रमुदितादित्यंवातवर्षंचदारुणं निशम्योपरतंगोपा
न्गोवर्धनधरोब्रवीत् २५ निर्यातत्यजतत्रासंगोपाः सस्त्रीधनार्भकाः उपारतंवातव
र्षंव्युदप्रायाश्चनिम्नगाः २६ ततस्तेनिर्ययुर्गोपाः स्वंस्वमादायगोधनं शकटोढो
पकरणंस्त्रीबालस्थविराः शनैः २७ भगवानपितंशैलंस्वस्थानेपूर्ववत्प्रभुः पश्यतांस
र्वभूतानांस्थापयामासलीलया २८

व्युदप्रायाः विगलितोदकप्रायाः स्वल्पजला नाना इत्यर्थः २६ शकटोढोपकरणं शक
यावत् २३
टैरूढंउपकरणंभाण्डादिकं यस्यभवति तथागोधनमादा
यशनैर्निर्ययुः २७ २८ ॥

राम०
९९

विह्वलाः शर्माय यथा यशोदाविन्नं परिरंभणादिभिः समीयुरुपजग्मुः सदाशिषः प्रेष्ठानां शीर्षादाव २९ ततो गो
वर्धनोत्थानानंतरमस्य श्रीकृष्णस्य तथाविधानि गोवर्धनोद्धरणरूपाणि कृतानि कर्माणि गायंत्य ईयुर्ययुः कथंभू

तं प्रेमवेगान्निभृता व्रजौकसो यथा समीयुः परिरंभणादिभिः गोप्यश्च सस्नेहमपूजयन्मुदा दध्य
न्नाक्षताद्भिर्युयुजुः सदाशिषः २९ यशोदा रोहिणी नंदो रामश्च बलिनां वरः कृष्णमालिंग्य युयुजु
राशिषः स्नेहकातराः ३० दिवि देवगणाः साध्याः सिद्धगंधर्वचारणाः तुष्टुवुर्मुमुचुस्तुष्टाः पु
ष्पवर्षाणि पार्थिव ३१ शंखदुंदुभयो नेदुर्दिवि देवप्रचोदिताः जगुर्गंधर्वपतयः तुंबुरुप्र
मुखा नृप ३२ ततोऽनुरक्तैः पशुपैः परिश्रितो राजन्स्वगोष्ठं सबलोऽव्रजद्धरिः तथाविधान्यस्य
कृतानि गोपिका गायंत्य ईयुर्मुदिता हृदिस्पृशः ३३ इति श्रीभागवते दशमस्कंधे पंचविंशो
ऽध्यायः २५ श्रीशुक उवाच एवंविधानि कर्माणि गोपाः कृष्णस्य वीक्ष्य ते अतद्वीर्यविदः प्रोचुः सम
भ्येत्य सुविस्मिताः १ ॥

ता एवं प्रेम्णा हृदिस्पृशंतीति हृदिस्पृशस्ताः यद्वा कथंभूतस्य प्रेष्ठत्वेन तासां हृदिस्पृशतीति हृदिस्पृक् तस्य
३३ इति श्रीभावार्थदीपिकायां दशमस्कंधे पंचविंशोऽध्यायः २५ वीर्ये विस्मितान्गोपान्कृष्णस्याद्भु
तकर्मभिः नंदो गर्गोक्तिमाश्वास्य तदैश्वर्यमवर्णयत् समभ्येत्य नंदं समभिगम्य पप्रच्छुः तदाह बालक

श्री॰ यद्यस्मात् बालकस्यकृत्स्नस्य अद्भुतानिकर्माणितस्मात् ग्रामेषुगोपेषुकथंजन्माहतीति आत्म
भा॰ द॰ जशङ्कितं आत्मानमर्हैअद्भुतानिकर्माण्यष्टादशाभिः यः सप्तहायनइतिसप्तहायनतः सप्तवार्षिकः
पू॰ टी॰ कथंविभ्रत्स्थितइतिपुष्करंपद्मंगजराट् महाराजइत ३ महौजसः महाबलयाः तनैर्वयः आयुर्यौ
१०० वनंवाकालेनयथापीयते ४ अथः आयाशाम्यमासाः त्रयः परिच्छेदकाः यस्यउदकंऊर्ध्वंशारणोहि

गोपाऊचुः बालकस्ययदेतानिकर्माण्यत्यद्भुतानिच कथमर्हत्यसौराजन्माग्रामेष्वात्म
जुगुप्सितं २ यः सप्तहायनोबालः करेणैकेनलीलया कथंविभ्रद्गिरिवरंपुष्करंगजराडिव
३ तोकेनामीलिताक्षेणपूतनायामहौजसः पीतः स्तनः सहप्राणैः कालेनेववयस्तनोः
४ हिन्वतोधः शयानस्यमास्यस्यचरणावुदक् अनोपतद्विपर्यस्तंरुदतः प्रपदाहतं
५ एकहायनआसीनोह्रियमाणोविहायसा दैत्येनयस्तृणावर्तमहन्कण्ठग्रहातुरं
६ क्वचिद्धैयंगवस्तैन्येमात्राबद्धउदूखले गच्छन्नर्जुनयोर्मध्येबाहुभ्यांतावपातयत् ७
वनेसंचारयन्वत्सान्सरामोबालकैर्वृतः हन्तुकामंबकंदोर्भ्यांमुखतोरिमपाटयत् ८ वत्से
षुवत्सरूपेणप्रविशन्तंजिघांसया हत्वान्यपातयत्तेनकपित्थानिचलीलया ९ स हत्वारा
सभंदैतेयंतद्बन्धूंश्चबलान्वितः चक्रेतालवनंक्षेमंपरिपक्वफलान्वितं १०॥ ॥

स्वतः चालयतः प्रपदेनपादाग्रेणाहतंविपर्यस्तंविपरीतंअनः कथमपतत् ५ योदैत्येनह्रियमाणः
सन् तंतृणावर्तंदैत्यंकथमहन्निमर्षः हैयंगवस्तैन्येनवनीतचौर्येबाहुभ्यांगच्छन् रिङ्खन्निमर्थः ङः
खतोहन्तुकामोयस्यतंबकंवेगसहितंबाहुभ्यांमुखतः कथमपाटयत् ८ ९ १०॥ ॥

राम॰
१००

आशीविषतमोऽतिक्रूरविषः वासौ अहीन्द्रः च आशीविषतमाहीन्द्रस्तत् उत्पत्तिकः स्वाभाविकः कथमिति किं सर्वे
वासात्मस्यादिति शंका उक्तमप्यतिविस्तयेनाभिनयेन वदेतित्कृष्णस्तत्त्वायनइति १३ प्राकृतमेव गर्गाचार्यैर्वा
कं तद्वितत्वपदि पीलत्वेन निर्दिष्टसंभावनस्य कृष्णस्तत्त्वावद्योतकेन इदानीं तेनैव वाक्येन गोपानुपदिशति अय

प्रलंबं घातयित्वोग्रं बलेन बलशालिना अमोचयद्व्रजपशून्गोपांश्चारण्यवह्नितः ११ आशीवि
षतमाहीन्द्रं दमित्वा विमदं हृदात् प्रसह्योद्वास्य यमुनां चक्रेऽसौ निर्विषोदकां १२ दुस्त्यजश्चानुरागो
ऽस्मिन्सर्वेषां नो व्रजौकसां नंद ते तनयेऽस्मासु तस्याप्यौत्पत्तिकः कथं १३ क्व सप्तहायनो बालः क्व
महाद्रिविधारणं ततो नो जायते शंका व्रजनाथ तवार्भके १४ नंद उवाच श्रूयतां मे वचो गोपा व्येतु
शंका च वोऽर्भके एनं कुमारमुद्दिश्य गर्गो मे यदुवाच ह १५ वर्णास्त्रयः किलास्यासन्गृह्णतोऽनुयु
गं तनूः शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः १६ प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः वा
सुदेव इति श्रीमानभिज्ञाः संप्रचक्षते १७ बहूनि संति नामानि रूपाणि च सुतस्य ते गुणकर्मानुरूपा
णि तान्यहं वेद नो जनाः १८ एष वः श्रेय आधास्यद्गोपगोकुलनंदनः अनेन बहुदुर्गाणि यूयमंजस्त
रिष्यथ १९ पुरानेन व्रजपते साधवो दस्युपीडिताः अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः २०
य एतस्मिन्महाभागाः प्रीतिं कुर्वंति मानवाः नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः २१ तस्मा
न्नंद कुमारोऽयं नारायणसमो गुणैः श्रिया कीर्त्यानुभावेन तत्कर्मसु न विस्मयः २२ इत्यद्धा मां समा
दिश्य गर्गे च स्वगृहं गते मन्ये नारायणस्यांशं कृष्णमक्लिष्टकारिणं २३ इति नंदवचः श्रुत्वा गर्गगीतं
व्रजौकसः दृष्टश्रुतानुभावास्ते कृष्णस्यामिततेजसः २४

नामिति १९ तत् तस्मात्तस्य कर्मसु विस्मयो नास्तीति नंदस्योक्तिः २१ २२ इत्यद्धा साक्षान्मां प्रति समादिश्य गर्गे च स्व
गृहं गते सति तदानीं मन्यमानोऽपि इदानीं कृष्णं नारायणस्यांशं मन्ये अद्य देवतः अक्लिष्टकारिणमिति २३ गोव
र्धनोद्धरणं सपरिकरमनुस्मरन् प्रकटितैश्वर्यं प्रीतिपार्थयनेदेव इति २४

श्री॰ भा॰ द॰ टी॰ १०१

यज्ञविप्लवेन या रुषा तया देवे इंद्रे वर्षति सति वज्राश्मवर्षानिलैः अशनिजलशर्करातीव्रवायुभिः सीदत्पशुस्त्रि

सीदंतिपालाःपशवःस्त्रियश्चयस्मिंस्तत् तथा आत्मा स्वयमेव शरणं यस्य तत्गोष्ठं दृष्ट्वा अनुकंपोद्दयावान् उत्स्मय

नुशोषितमना विस्मृतं गोवर्धनशैलमुत्पाट्य अबलोबालो लीलार्थमुच्छिलींध्रंयथा एकेन करेण बिभ्रद्धृतगोष्ठमपात्अपा

लितवान् एवं महेंद्रमदभित् गवामिंद्र इत्युत्तराध्यायार्थं स्मारयति सएवंभूतःकृष्णःनःप्रीयत्प्रीयतामिति

२६ इतिश्रीभागवतेदशमेषड्विंशोध्यायः २६ षड्विंशेदशमेयत्कृतःषड्विंशेदशमोहरिः यानकोपव्विंशमा

वतर्विंशतिनःपृथक् सप्तविंशेतदालत्सकृष्णस्यप्रभवेयं वर्ण्यते सुरभीन्द्राभ्यामभिषेकमहोत्सवः गोवर्धनधृतेशै

मुदितानेदमानर्चुःकृष्णंचगतविस्मया २५ देवेवर्षतियज्ञविप्लवरुषावज्राश्मवर्षानिलैः सीदत्पालपशु

स्त्रिआत्मशरणंदृष्ट्वानुकंप्युत्स्मयन् २६ उत्पाट्यैककरेणशैलमबलोलीलोच्छिलींध्रंयथा बिभ्रद्गोष्ठमपा

न्महेंद्रमदभित्प्रीयान्नइंद्रोगवां २७ इतिभागवतेदशमेषड्विंशोध्यायः २६ शुकउवाच गोवर्धनेधृते

शैलेआसाराद्रक्षितेव्रजे गोलोकादाव्रजत्कृष्णंसुरभिशक्रएवच १ विविक्तउपसंगम्यव्रीडितःकृत

हेलनः पस्पर्शपादयोरेनंकिरीटेनार्कवर्चसा २ दृष्टश्रुतानुभावोस्यकृष्णस्यामिततेजसा नष्टत्रिलो

केशमदइदमाहकृतांजलिः ३ विशुद्धसत्वंतवधामशांतंतपोमयंध्वस्तरजस्तमस्कं मायामयोयंगु

णसंप्रवाहोनविद्यतेतेग्रहणानुबंधः ४ ॥ ॥

लेइतिशक्रस्यभयेनागमनेहेतुः ततइंद्रआगत्यकिंकृतवांस्तत्राह विविक्तउपगम्येत्यादिना अथाहस्तदभिविमनेनग्र

थेन १ विविक्तएकांतेपादयोः पस्पर्शनमश्चकार कथंभूतःकृतहेलनःकृतावज्ञः २ अस्यश्रीकृष्णस्यश्रुतआसी

अनुभावःदृष्टःश्रुतश्चानुभावोयेनसइंद्रःनष्टास्त्रिलोकेशोहमितिमदोयस्यसः तत्रममापराधंक्षमस्वइतिवक्तुं

तवतावदपराधोनास्त्येवावयानुग्रहःकृतइत्याह विशुद्धसत्वमितिचतुर्भिः ३ विशुद्धसत्वंधामस्वरूपंशांतमेकरूपंअ

तएवतपोमयंप्रचुरज्ञानंसर्वज्ञमित्यर्थः कुतःध्वस्तरजस्तमस्कंध्वस्तेअविद्यामानेरजस्तमसीयस्मिन् अतएवायम

स्मदादिषुदृश्यमानोमायाकार्यरूपोगुणसंप्रवाहः गुणैःसंयोगइतेररितिधासंसारइत्यर्थः सतेनवर्ततेविद्यतेयतः

अग्रहणेनाज्ञानेनानुबंधस्तेइतितथा समर्थइत्यतेनास्तीत्यर्थः अज्ञानसंबंधोवायदाअज्ञानमतत्कृतेदेहसंबंधोनस्तः

तदातत्कृतानांलोभादीनांकावार्तेत्याह कुतोनितिक ४

हेर्देशाऊतोविनियिताभेदाव् देहलोभयोः परस्पराश्रयतानतत्कृताः देहसंबंधकृताः तद्धेतवः लोभादयः लोभ
मग्नुमोहादयस्त्वेति नतु ज्ञानिनामपि ते दृश्यंते अत आह अबुधलिंगभावाः अज्ञानितागमकाः अज्ञानमस्य
कारणार्थः यावद्रागादिसद्भावस्तावत्तानित्वमेवासिद्धमित्यर्थः लोभाद्यभावेपि यन्मानभंगो दंडार्थमित्याह तथा
पीति नतु वद्दृढेर्मम गोपालपुत्रस्य का शक्तिः किंच कारणेन को वा दंडो मया कृत इत्यत आह पितेति जगतामपितामि
नकः गुरुरुपदेष्टा अधीशो नियंतेति दंडधारणे हेतुत्रयं कालत्वात्समर्थः तस्मात्तद्दंडैर्लीलावतारैस्समीहसे
तव समीहा लीलैव जगदीशमानिनामस्माकं मानं विधुन्वन् दूरयन्नित्यर्थः कथमेतदित्याह ये इति ६ मद्विधा अज्ञास्ते
ताख्रुतो जगदीशमानिनः कालेभयकालेपि यथाग्रेवातिवृष्टौ वा मामभयं भयरहितं वीक्ष्य आशु तन्मदं जग

कुतो नु तद्धेतव ईश तत्कृता लोभादयो येऽबुधलिंगभावाः तथापि दंडं भगवान्बिभर्ति धर्मस्य गुप्त्यै खल-
निग्रहाय ५॥ पिता गुरुस्त्वं जगतामधीशो दुरत्ययः काल उपात्तदंडः हिताय चेच्छातनुभिः स-
मीहसे मानं विधुन्वञ्जगदीशमानिनाम् ६॥ ये मद्विधाज्ञा जगदीशमानिनस्त्वां वीक्ष्य कालेऽभयमा-
शु तन्मदं हित्वार्यमार्गं प्रभजन्त्यपस्मया ईहा खलानामपि तेऽनुशासनं ७ स त्वं ममैश्वर्यमदप्लुतस्य
कृतागसस्तेऽविदुषः प्रभावं क्षन्तुं प्रभोऽथार्हसि मूढचेतसो मैवं पुनर्भून्मतिरीश मेऽसती ८ तवाव-
तारोऽयमधोक्षजेह भुवो भराणामुरुभारजन्मनां चमूपतीनामभवाय देव भवाय युष्मच्चरणानु-
वर्तिनाम् ९ नमस्तुभ्यं भगवते पुरुषाय महात्मने सर्वस्मै सर्वबीजाय सात्वतां पतये नमः १०

दीशामहे हित्वा विगतगर्वाः संतः आर्यमार्गं भजंतेति अतः खलानामप्यनुशासनं दंड इत्यर्थः हेभग
वत्स्वरूपमभिप्रायं वा न वेत्यतः क्षमापयति स त्वमिति ७ एवंभूता मा ईश असती मतिः पुनर्माभूदिति प्रार्थनानेन
र्दमहानयमपराधः गोपालकद्रूपः कथं हि तन्मवतरति चेदत आह तवेति ८ भुवो भराणां पुनः उरुभारज
न्मनां उद्भरणं वहनं भाव उत्पत्तिर्येषां तेषां चमूपतीनामभावाय देव भवाय युष्मच्चरणसेविनां हितायाय अ
तो मम मत्स्यैव कर्तृत्वं नापराधिनोपि दंडनीया इति भावः क्षमापयन्नमस्करोति नम इति नमस्तुभ्यं भगवते कृष्णाय नमः
पुरुषाय सर्वान्तर्यामिने महात्मने अनंतस्यापरिच्छिन्नाय कृतः वासुदेवाय सर्वनिवासाय सात्वतां यादवानां पत

तेषां भक्तानां छंदेन स्वेच्छया स्वीकृतो देहो यस्य तत्रापि विशुद्धज्ञानमेव मूर्तिर्यस्य तस्मै मायया सर्वस्मै भूतः सर्वस्य बीजाय कारणाय अत एव सर्वभूतानामात्मने नम इति कृतागस्त्वेन नम्रतां स्वापराधं निवेदयति मयेदमिति ११ आसारवायुभिः गोष्ठनाशाय चेष्टितं कृतम् १२ तथापि ईश त्वयानुगृहीतोऽस्मि अनुग्रहं दर्शयति ध्वस्तस्तम्भः निष्फलोद्यमश्च इन्द्रेण स्वाभिप्राये निवेदिते भगवान् पितेव वाङ्मयेति १४ इन्द्रश्रिया देवराज्येन १५ वः

स्वच्छंदोपात्तदेहाय विशुद्धज्ञानमूर्तये सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ११ मयेदं भगवान् गोष्ठनाशायासारवायुभिः चेष्टितं विहते यज्ञे मानिना तीव्रमन्युना १२ त्वयेशानुगृहीतोऽस्मि ध्वस्तस्तम्भो वृथोद्यमः ईश्वरं गुरुमात्मानं त्वामहं शरणं गतः १३ श्रीशुक उवाच एवं संकीर्तितः कृष्णो मघोना भगवानमुम् मेघगम्भीरया वाचा प्रहसन्निदमब्रवीत् १४ मया तेऽकारि मघवन्मखभंगोऽनुगृह्णता मदनुस्मृतये नित्यं मत्तस्येन्द्रश्रिया भृशम् १५ मामैश्वर्यश्रीमदान्धो दण्डपाणिं न पश्यति तं भ्रंशयामि संपद्भ्यो यस्य चेच्छाम्यनुग्रहं १६ गम्यतां शक्र भद्रं वः क्रियतां मेऽनुशासनम् स्थीयतां स्वाधिकारेषु युक्तैर्वः स्तम्भवर्जितैः १७ अथाह सुरभिः कृष्णमभिवन्द्य मनस्विनी स्वसन्तानैरुपामन्त्र्य गोपरूपिणमीश्वरम् १८ सुरभिरुवाच कृष्ण कृष्ण महायोगिन्विश्वात्मन्विश्वभावन भवता लोकनाथेन सनाथा वयमच्युत १९ त्वं नः परमकं दैवं त्वं न इन्द्रो जगत्पते भूताय भव गोविप्रदेवानां ये च साधवः २० इन्द्रं नस्त्वाभिषेक्ष्यामो ब्रह्मणा चोदिता वयं अवतीर्णोऽसि विश्वात्मन्भूमेर्भारापनुत्तये २१ श्रीशुक उवाच एवं कृष्णमुपामन्त्र्य सुरभिः पयसात्मने जलैराकाशगंगाया ऐरावतकरोद्धृतैः

युष्माभिः बहुवचनं करुणाद्यभिप्रायेण ननु क्व गन्तव्यं स्वर्गोऽपि तवैवेत्युक्त्वा दितिचेत्तत्राह क्रियतामिति मदनुशासनेन यथापूर्वं तत्र स्थीयतामित्यर्थः युक्तैरप्रमत्तैः स्तम्भवर्जितैर्निरहंकारैः हे कृष्ण कृष्ण इन्द्रेणाहृतानां भवतामनाथा वयं कृतारक्षितास्त्वर्थः १८ १९ त्वं नः परमं दैवं देवता हे जगत्पते गोविप्रदेवानां ये चान्ये साधवः तेषां भवाय अभ्युदयाय त्वमेव नन्वभवतीनामिन्द्रोऽस्ति तत्राह इन्द्रमिति २० अन्येषु इन्द्रस्येन्द्रत्वे नयेत्यर्थः ननु देवेन्द्रे सम्भवति मम त्वं कथमिन्द्रो भवेयमिति चेत्तत्राह अवतीर्णोऽसीति २१ सुरभिरात्मनः पयसाभ्यषिंचत् इ

देवमातृभिः देवैर्मातृभिश्चादित्यादिभिर्देवैर्मातृभिश्चेति वा गाः पशून् गां स्वर्गं वा इंद्रत्वेन विंदते लभते इति गोविंदेस
भ्यधात् नाम कृतवानित्यर्थः २४ देवनिकायेषु देवसमूहेषु केतवः प्रदर्शनीयास्तुष्टुवुरित्यर्थः गावः गां पृथ्वीं प
योभिर्द्रुतामार्द्रामानयन्नित्यर्थः २५ नानारसौघाः क्षीरादिवाहिन्यः अकृष्टपच्याः कर्षणं विनैव पक्वाः
ओषधयो व्रीह्यादयः उन्मणीन् गर्भगतान्मणीन् उद्गतान् बहिः प्रकटान् अबिभ्रुरबिभरुः २६ इति श्री
भावार्थदीपिकायां दशमे सप्तविंशोऽध्यायः २७ अष्टाविंशे ततो नंदो नयन् वरुणालयात् वैकुंठदर्शनेनाथ गोपानामनुग्रहः

इंद्रः सुरर्षिभिः साकं नोदितो देवमातृभिः अभ्यषिंचत दाशार्हं गोविंद इति चाभ्यधात् २३ अहं हि
इंद्रो देवानां नेता वामितः नागतः गोविंद इति लोके वागाम्येति अथ विमानगाः २४ तत्रागतास्तुंबुरु
नारदादयो गंधर्वविद्याधरसिद्धचारणाः जगुर्यशो लोकमलापहं हरेः सुरांगनाः संननृतुर्मुदा
न्विताः २५ तं तुष्टुवुर्देवनिकायकेतवो ह्यवाकिरंश्चाद्भुतपुष्पवृष्टिभिः लोकाः परां निर्वृतिमाप्नु
वंस्त्रयो गावस्तदा गामनयन्पयोद्रुताम् २६ नानारसौघाः सरितो वृक्षा आसन्मधुस्रवाः अकृष्ट
पच्यौषधयो गिरयोऽबिभ्रन्नुन्मणीन् २७ कृष्णेऽभिषिक्त एतानि सर्वाणि कुरुनंदन निर्वैराण्यभवंस्ता
त क्रूराण्यपि निसर्गतः २८ इति गोगोकुलपतिं गोविंदमभिषिच्य सः अनुज्ञातो ययौ शक्रो वृतो
देवादिभिर्दिवम् २९ इति श्रीभागवते महापुराणे सप्तविंशोऽध्यायः २७ शुक उवाच एकादश्यां निरा
हारः समभ्यर्च्य जनार्दनं स्नातुं नंदस्तु कालिंद्यां द्वादश्यां जलमाविशत् १ तं गृहीत्वानयद्भृत्यो व
रुणस्यासुरोंतिके अविज्ञायासुरीं वेलां प्रविष्टमुदकं निशि २ ॥

र्पिते गोवर्धनेन सुहृत्त्वं शक्रेणापुरंदरे नंदानयनतः कृष्णो वरुणं वनयोऽनथ कलामात्रायां द्वादश्यां पा
रणादभिनिवेशेनासुरीं वेलामविज्ञायैवारुणोदयात्सर्वमेव स्नानस्य बलेन निशि उदके प्रविष्टं तदनभिज्ञो वरु
णभृत्योऽनयदिति तथा च स्मृतिः कलाद्वादशीं दृष्ट्वा निशीथादूर्ध्वमेव हि आमध्याह्नात् क्रियाः सर्वाः कर्तव्याः
शंभुशासनादिति वक्ष्यति वरुणः अजानता मामकेनेति श्रीभगवद्धर्ममजानतेत्यर्थः २ ॥

श्रीः
भा.टी.
द.टी.
१०२

स्वानां भगवद्धर्मपरायणानां अभयदः मा भैष्टेति अभयं ददत् ३ सपर्यया अर्हणेन ४ अद्येदानीं मे मया देहो निभृतः
धृतः यद्वा अद्य त्वदङ्घ्रीणां ज्ञानेन देवस्य फलं प्राप्तमित्यर्थः यद्वा निभृतः शान्तो मनोरथ इत्यर्थः किंच अद्यैवार्थोधिगतः स
वेश्राकरपतिनापि इत्यर्थः पूर्वं नैव विधोर्थः प्राप्त इत्यर्थः किंच समागोपि निवृत्तं एव त्वत्प्राप्त्ये नाहं त्वत्पादभाजः इति
अध्वनः पारमीशं ५ भगवते निरतिशयैश्वर्याय ब्रह्मणे शरण्याय परमात्मने सर्वजीवानां नियन्त्रे वेदेत्रे न यत्रेति लो
कसृष्टिविकल्पयति या माया सा यत्र न श्रूयते अविद्यमानेव तिष्ठतीत्यर्थः ६ अजानतामजेनेव नानियोगात्करणाय

चुक्रुशुस्तमपश्यन्तः कृष्ण रामेति गोपकाः भगवांस्तदुपश्रुत्य पितरं वरुणाहृतं ३ तदन्तिकं गतो रा
जन्स्वानामभयदो विभुः प्राप्तं वीक्ष्य हृषीकेशं लोकपालः सपर्यया महत्या पूजयित्वाह तद्दर्शनमहो
त्सवः ४ वरुणः अद्य मे निभृतो देहोद्यैवार्थोधिगतः प्रभोः त्वत्पादभाजो भगवन्नवापुः पारमध्व
नः ५ नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने न यत्र श्रूयते माया लोकसृष्टिविकल्पिता ६ अजा
नता मामकेन मूढेनाकार्यवेदिना आनीतोयं तव पिता तद्भवान्क्षन्तुमर्हसि ७ गोविन्द नीयतामेष
पिता ते पितृवत्सल ८ शुकः एवं प्रसादितः कृष्णो भगवानीश्वरेश्वरः आदायागात्स्वपितरं बन्धू
नां चावहन्मुदं ९ नन्दस्त्वतीन्द्रियं दृष्ट्वा लोकपालमहोदयं कृष्णे च सन्नतिं तेषां ज्ञातिभ्यो विस्मितोब्रवी
त् १० ते चौत्सुक्यधियो राजन्मत्वा गोपास्तमीश्वरं अपि नः स्वगतिं सूक्ष्मामुपधास्यदधीश्वरः ११
इति स्वानां स भगवान्विज्ञायाखिलदृक्स्वयं सङ्कल्पसिद्धये तेषां कृपयैतदचिन्तयत् १२ जनो वै लोक ए
तस्मिन्नविद्याकामकर्मभिः उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन् १३ इति सञ्चिन्त्य भगवान्महाकारु
णिको हरिः दर्शयामास लोकं स्वं गोपानां तमसः परम् १४ सत्यं ज्ञानमनन्तं तद्ब्रह्मज्योतिः सनातनं यद्धि प

कृष्णेन तदिति निवेदं विशुद्धमसमर्पयति गोविन्देति ८ ९ अतीन्द्रियमदृष्टपूर्वं लोकपालस्य महोदयमैश्वर्यं १० ते च उत्सुकधियो
ज्ञात्वा धीर्येषां ते अपि किं स्वगतिं स्वस्थानं सूक्ष्मां दुर्ज्ञेयां उपधास्यत् उपधास्यति नः अस्माकं प्रापयिष्यतीति सङ्कल्पवन्त इत्य
र्थः ११ इत्येवंभूतं स्वानां तेषां सङ्कल्पमखिलदृक् सर्वज्ञः स्वयमेव विज्ञाय तेषां सङ्कल्पसिद्धये कृपया एतद्वक्ष्यमाणमचि
न्तयत् १२ अविद्या देहाद्यभिबुद्धिः ततः कामः ततः कर्म तेन उच्चावचासु देवतिर्यगादिषु भ्रमन् स्वां गतिं न वेद सब्रह्मस्वरूपं
लोकं वैकुण्ठाख्यं तमसः प्रकृतेः परं १४ देहादिपरिच्छिन्नेन दर्शनेन मम लोकमिति प्रपञ्चे देहादिव्यतिरिक्तं ब्रह्मस्वरूपं दर्शयामा

१०३

ब्रह्महृदं ब्रह्मैव ह्रदः तत्र निमग्नस्य विशेषविज्ञानाभावात् ते ब्रह्महृदं तेन नीताः प्रापिताः तस्मिन्निमग्नाश्च तेन श
ब्दोक्तं विशेषमाह पुनः कृष्णेनोद्धृता समाधेर्व्युत्थापिताः सन्तो ब्रह्मणः तस्यैव लोकं वैकुण्ठाख्यं ददृशुरिति
ननु ब्रह्मणि निमग्नानां पुनर्लोक---नमयुक्तमिवेत्याशंक्याह यत्रेति यत्र यस्मिन् कृष्णेन निमित्तेन सति स्वयमक्रूरो
ध्यगात् दृष्टवान् शुकपरीक्षित्संवादात्पूर्वं तत्वाद्भूतनिर्देशः न त्वेतदर्थं स्त्रेये भगवति किं चिदप्यसंभावितमित्य
र्थः अथवा अक्रूरो यद् दृष्टवान् तस्यैव यमुनाह्रदस्य ब्रह्महृद इति नाम ते ह्रदं नीताः सन्तो ब्रह्मणो लोकं दद
शुः पुनश्च कृष्णेनोद्धृताः एवं च तं दृष्ट्वा विस्मिता बभूवुरिति क्रमवर्णितात्वेय अथ नित्येकृष्णेनावसो त्वयेति
यद्वा अक्रूरोऽयं दृष्टवान् धमादधिगमिष्यतीति भाविनि भूतवदुपचारः न त्वक्रूरः अक्रूरो योगी संसारान्निवृत्तो मत्वा

तेतु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृताः ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात्पुरा १६ नंदादयस्तु
तं दृष्ट्वा परमानंदनिर्वृता कृष्णं च तत्र छंदोभिः स्तूयमानं सुविस्मिताः १७ इति भागवते दशमस्कंधे अष्टा
विंशोऽध्यायः २८ शुक उवाच भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः वीक्ष्य रंतुं मनश्चक्रे योगमा
यामुपाश्रितः १ तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमैः सचर्षणीनामुदगा
च्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः २

परं लोकमधिगच्छति तथा १६ तत्र तस्मिन् ह्रदे कृष्णं छंदोभिर्वेदैः स्तूयमानं दृष्ट्वा विस्मिता बभूवुः १७ इति भा॰
वार्थे दशमस्कंधे अष्टाविंशोऽध्यायः २८ ऊनत्रिंशे तु रासार्थमुक्तिप्रश्नकथा हरेः गोपीभी रासंसंरंभो तत्र संक्षेपतोऽधिको
तके ब्रह्मादिजयसंरूढदर्पकंदर्पदर्पहा जयति श्रीपतिर्गोपीरासमंडलमंडनः ननु विपरीतमिदं परदारवि
नोदेन कंदर्पविजयेनाप्रतीतेः सत्यं योगमायामुपाश्रितः आत्मारामोऽप्यरीरमत् साक्षान्मन्मथमन्मथः आत्म
न्यवरुद्धसौरतः इत्यादिषु स्वातंत्र्याभिधानात् तस्माद्रासक्रीडाविडंबनं कामजयख्यापनायेत्येव तत्वम् किंच शृंगा
रकथापदेशेन विशेषतो निवृत्तिपरेयं पंचाध्यायीति व्यक्तीकरिष्यामः ता रात्रीरिति याताबला व्रजं सिद्धा मये
मा रंस्यथ क्षपा इति याः प्रतिश्रुता इत्यर्थः तदा तस्मिन्नेव क्षणे उडुराजः चंद्र उदगात् उदितः किं कुर्वन् दीर्घकालेन
दर्शनं यस्य सः स्वप्रियाया मुखमरुणेन कुंकुमेन यथा प्रियो विलिंपति तथा प्राच्याः ककुभो मुखं स्वैः शंतमैः सुखतमैः करैः
रश्मिभिः अरुणेनोदयरागेण विलिंपन् अरुणीकुर्वन्नित्यर्थः स प्रसिद्ध उडुराजः तथा चर्षणीनां जनानां शुचस्तापं ग्लानीन्

[illegible]

कुमुदं विकमनीयं यस्य तं कुमुद्वन्तं अखंडमंडलं यस्य रमायाः आननस्य शुभेनाभा यस्य तं एवंविधं चोडुपं आवने च तस्या
कोमलैर्गोभिः रश्मिभिः रंजिते दृष्ट्वा कलं मधुरं जगौ गानं चकार वामदृशां वामाः कमनीया दृशो यासां तासां मनोहरम् ३
श्रवणपथ्यमन्योन्यमलक्षितः उद्यमो याभिः ताः सकान्तो यत्र गीतध्वनिः मार्गेण आजग्मुः जवेन वेगेन लोलानि
कुण्डलानि यासां ताः श्रीकृष्णस्य वक्षसा कृष्णश्रवणेन तस्य वरणविज्ञानान्तःकरणमेव वै विधकर्मनिवृत्तिर्गोपीनां यत्र इवाधाव
सितैः कर्म विहाय ययुरित्याह ४ पयः स्थालीचुल्ल्यामधिश्रित्य तत्क्वाथमप्रतीक्षमाणाः काश्चिद्ययुः संयावं गोधूम
कणान्नपक्वमवद्वास्य अनवतार्य ५ अन्याः प्रमृजन्त्यः अंगोद्वर्तनादि कुर्वन्त्यः काश्च काश्चित् कृष्णनष्टार्थमन्यथा कथ

दृष्ट्वा कुमुद्वन्तमखंडमंडलं रमाननाभं नवकुंकुमारुणं वनं च तत्कोमलगोभिरंजितं जगौ कलं वामदृशां
मनोहरं ३ निशम्य गीतं तदनंगवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः आजग्मुरन्योन्यमलक्षितोद्यमाः
स यत्र कान्तो जवलोलकुंडलाः ४ दुहन्त्योऽभिययुः काश्चिद्दोहं हित्वा समुत्सुकाः पयोऽधिश्रित्य संयावमनु
द्वास्यापरा ययुः ५ परिवेषयन्त्यस्तद्धित्वा पाययन्त्यः शिशून् पयः शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योऽपास्य भोज
नम् ६ लिंपन्त्यः प्रमृजन्त्योऽन्या अंजन्त्यः काश्च लोचने व्यत्यस्तवस्त्राभरणाः काश्चित् कृष्णान्तिकं ययुः ७
ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबंधुभिः गोविंदापहृतात्मानो न न्यवर्तन्त मोहिताः ८ अन्तर्गृ
हगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ९ दुःसहप्रेष्ठवि
रहतीव्रतापधुताशुभाः ध्यानप्राप्ताच्युताश्लेषनिर्वृत्या क्षीणमंगलाः १० तमेव परमात्मानं जारबुद्ध्या
पि संगताः जहुर्गुणमयं देहं सद्यः प्रक्षीणबंधनाः ११ ॥

मपि कर्म तदासक्तमनसां पालनं च वैतियोगतत्राह द्वाभ्यामिति ७ ध्यानतः स्वरूपस्य कृष्णाश्लेषाधारणेन विपर्ययप्राप्तानि व
स्त्राणि आभरणानि च यासां ताः वरणाभरणे कर्णे कृत्वा कर्णाभरणं करे कृत्वा ययुरिति सच कृष्णाकृष्टमनसां विघ्नाः
प्रभवन्तीत्याह ता वार्यमाणा इति ८ न लब्धो विनिर्गमो याभिस्ताः प्रागपि तद्भावनायुक्तास्तदा नितरां दध्युरिमर्थः किं
वन्तदानीं प्रवन्ते परमात्मानं श्रीकृष्णं ध्यानतः प्राप्ताः सत्त्वोगुणमयं देहं जहुरिति श्लोकद्वयेनाह दुःसहेति नन्वकथं ज
हुः परमात्मेति ज्ञानाभावादित्याशंक्याह जारबुद्ध्यापीति न हि वस्तुशक्तिर्बुद्धिमपेक्षते अन्यथापि पीतामृतवदिति भावः
नन्वकथं भोगमन्तरेण प्रारब्धकर्मक्षीणं भोगेनैव सद्यः क्षीणमित्याह दुःसहेति दुःसहः प्रेष्ठविरहः तेन तीव्रतापः
तेन धुतान्यपगतान्यशुभानि यासां ताः अतो ध्यानेन परमात्मप्राप्तिः न कालसुखदुःखाभ्यां वर्तितः प्राचकर्मक्षयात् गु
णमयं देहं जहुरिति ११ ॥ ११ ॥

ननु यथा सति पुत्रादीनां वस्तुत्वेपि ब्रह्मत्वेपि तद्बुद्ध्यभावान्मोक्षः तथा बुद्ध्यभावात् एवं कृष्णेपि ब्रह्मबुद्धिं भावेन
तत्संगतिः कथमासां देहत्यागाशंकां तेन कृष्णं विदुः परं कान्तमिति परिहरति १२ अयं च भावः जीवेष्वावृतं ब्रह्म
ईश्वरे त्वनावृतं हृषीकेशवाचनादनावृतं अतो न तत्र ब्रह्मबुद्ध्यपेक्षेति न च देही कथमनावृतः स्यात्तत्राह नृणामिति
१३ गुणात्मनो गुणनियन्तुः भगवत एव तस्य स्वरूपाभिव्यक्तिः अतो न देहे हि स्वाद्दृश्यमनत्यपेक्ष्यतेति भावः अतो य
था कथंचित्तदासक्तिर्मुक्तिकारणमित्याह काममिति ऐक्यं संबंधः सौहृदं भक्तिं न च भगवतोयमनिमाद्दस्मा
दूनैवमिति १५ यतः श्रीकृष्णादेतत्स्थावरादिकमपि मुच्यते अस्ततमाह १६ वाचः पेशैर्वाग्विलासैः १७ सर्वाः

राजोवाच कृष्णं विदुः परं कान्तं न तु ब्रह्मतया मुने गुणप्रवाहोपरमस्तासां गुणधियां कथं १२ श्रीशुक
उवाच उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः द्विषन्नपि हृषीकेशं किमुताधोक्षजप्रियाः १३
नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप अव्ययस्याप्रमेयस्य निर्गुणस्य गुणात्मनः १४ कामं
क्रोधं भयं स्नेहमैक्यं सौहृदमेव च नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते १५ न चैवं विस्मयः का
र्यो भवता भगवत्यजे योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते, ता दृष्ट्वान्तिकमायाता भगवान्व्रजयो
षितः अवदद्वदतां श्रेष्ठो वाचः पेशैर्विमोहयन् १७ स्वागतं वो महाभागाः प्रियं किं करवाणि वः
व्रजस्यानामयं कच्चिद्ब्रूतागमनकारणं १८ रजन्येषा घोररूपा घोरसत्त्वनिषेविता प्रतियात व्रजं
नेह स्थेयं स्त्रीभिः सुमध्यमाः १९ मातरः पितरः पुत्रा भ्रातरः पतयश्च वः विचिन्वन्ति ह्यपश्यन्तो
मा कृढ्वं बन्धुसाध्वसं २० दृष्टं वनं कुसुमितं राकेशकररञ्जितम् यमुनानिललीलैजत्तरुपल्लवशो
भितं २१ तद्यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन्सतीः क्रन्दन्ति वत्सा बालाश्च तान्पाययत दुह्यत २२

किं च वि
मसेश्च समागता विलोक्य समभ्यामिवाह व्रजस्येति तन्मयामेदद्रूमिति मालस्याह रजन्येषेति १८ किं च वि
चिन्वन्ति मृगयन्ते बन्धूनां साध्वसं भयं मा कृढ्वं मा कुरुतेत्यर्थः ईषत्प्रणयकोपेनान्यतो विलोकयन्तीः प्रत्या
ह २० २० राकेशस्य कराणि रञ्जितं यमुनास्पर्शिनोऽनिलस्य लीलया मन्दगत्या एजन्तः कंप
मानास्तरूणां पल्लवास्तैः शोभितं २१ सतीः हे सत्यः स्वभर्तॄनभिलक्ष्यः प्रत्याह २२ यद्वा माया वशीकृत
चित्ताः उपपन्नं तु कस्मीयं ते प्रीता भवेतिदृष्ट्वा दृष्ट्वा प्रदर्शनेन निवर्तयति मतोरित्यादिश्लोकत्रयेण २३ ॥

श्रीः
भा० द०
टी०
१०५

हेकल्याण एव : फल्गुतुच्छं कृच्छ्रं दुःसंपाद्यं औपपत्यं जारसौख्यं अतः कुलस्त्रियाः सर्वथा त्याज्यं हे मूढा न वयं भवत्या
स्याकं भावः न मे वन प्राप्तिनी येनानास्यइ तिचेन्नत्राह २४ २५ २६ यथा श्रवणादिभिर्हे त्व स्य प्रेम मयि भवति
सन्निकर्षेण समीपस्थेनन न तथा ततो गृहान्प्रतियात २७ किंच श्रवण दर्शनादिनान्तरेण चिंता मात्रा नास्यि।
तिमाहू हुत्रेवि २८ शुक उवाच कृत्वा उद्गतेन श्वसनेन शुष्यंतो बिंबफल सदृशा अधराये षु तानि अग्रवा कृत्वा
तथाग्र गुष्ठेन मही लिखंत्यः तथा गृहीत कज्जलैरस्रुभिः कुचकुंकुमानि क्षालयंता तूष्णीं स्थिताः उरु दुःख
भरो यासां ताः किंच ३१ किंचित्संरंभेण कोपावेशेन गद्गदा गिरो यासां ताः संरंभकारणं प्रेष्ठं मिष्यास्विपि ये

भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमायया तद्बंधूनां च कल्याणः प्रजानां चानुपोषणं २४ दुः
शीलो दुर्भगो वृद्धो जडो रोग्यधनोपि वा पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी २५ अ
स्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयावहं जुगुप्सितं च सर्वत्र औपपत्यं कुलस्त्रियाः २६ श्रवणाद्द
र्शनाद्ध्यानान्मयि भावो नुकीर्तनात् न तथा सन्निकर्षेण प्रतियात ततो गृहान् २७ शुक उवाच
इति विप्रियमाकर्ण्य गोप्यो गोविंदभाषितं विषण्णा भग्नसंकल्पाश्चिंतामापुर्दुरत्ययाम् २८
कृत्वा मुखान्यव शुचः श्वसनेन शुष्यद्बिंबाधराणि चरणेन भुवं लिखंत्यः अस्रैरुपात्तमषिभिः
कुचकुंकुमानि तस्थुर्मृजंत्य उरुदुःखभराः स्म तूष्णीम् २९ प्रेष्ठं प्रियेतरमिव प्रतिभाषमाणं कृ
ष्णं तदर्थविनिवर्तितसर्वकामाः नेत्रे विमृज्य रुदितोपहते स्म किंचित्संरंभगद्गदगिरो ब्रुवतानु
रक्ताः ३० मैवं विभोर्हति भवान्गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूलं भक्ता भजस्व
दुरवग्रह मा त्यजास्मान् देवो यथादिपुरुषो भजते मुमुक्षून् ३१ यत्पत्यपत्यसुहृदामनुवृत्तिरं
ग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तं अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवांस्त------ ३२

तरमिव प्रतिभाषमाणं प्रत्याचक्षाणं गोप्यः ३० नृशंसं क्रूरं हे दुरवग्रह स्वच्छंद पादमूलं भक्ताः सेवितवत्यः।
अस्मान्भज स्वमा त्यजेति यद्गुक्तं भर्तुः शुश्रूषणं स्त्रीणामित्यादिना तत्राहुः ३१ त्वया धर्मविदेति सोपहासम् एवमे
तदुपदेशानां पदे विषये त्वय्येवास्तु उपदेशावेदेतः ईशोति विविदिषा वाक्येन सर्वोपदेशानामीश्वरपरत्वात्
मास्ति भावः आत्मा किल भवानिति भोग्यसाक्षि सर्वस्य भोक्तृत्वात्तैव शरीरिणः प्रेष्ठो बंधुः भवानिति सर्वबंधु

शुद्धरणीयं ग्रंथेनात्रिमदार्थः ३२

१८५

अथवा धर्मोपदेष्टानोपदेश्यानेउपदेशधर्मोपदेशाः इष्टा इति विषिष्टानि अस्मास्वधर्मे विजिज्ञासमानास्वस्मतीश
त्वयाधर्मं विधाय उक्तमेवमेतदस्मान्नत्वं धर्मोपदेशाः किंतु भवानात्मेति अथवा यदुक्तं एवं उपदेश्यपदेन ज्ञानेच्छ
कृष्णोस्तुनामत्वयि ईश्वरस्वामिनि समनिषवं कांक्षानैव मिमार्थः यतस्त्वं भूतानां नमात्मा फलं उपायश्चास्ययुक्तं उपस
दिष्टस्वरूपं धर्म इति एवमेतत्त्वयैवास्मत्कृततउपदेशपदेश्युश्रूषणीयत्वेन उपदिश्यमानानां पत्याद्दीनां पदेश्या
धिष्ठानेकृतमीश्वरोप्येकदिहमुरमधिष्ठानं विनाकोपि पतिपुत्रादिनामास्ति अत्रयत्समानेयुक्तमतिविस्तरेण एतत्स
हावात्मेणाहृदयमः प्रार्थयते २२ पूर्वश्लोकटीका ॥ कुशलाः शास्त्रनिपुणाः रतिं कुर्वंति तथा च शास्त्र

कुर्वंति हि त्वयि रतिं कुशलाः स्वशास्त्र नित्यप्रियेपतिसुतादिभिरादितैः किं तन्नः प्रसीद परमेश्व
र मास्म छिदो राशां त्वयि चिरादरविंदनेत्र २३ चित्तेसुखेनभवतापहृते गृहेषु यन्निर्विश
त्युत करावपि गृह्यकृत्ये पादौ पदं न चलतः तव पादमूलाद्यामः कथं ब्रजमथो करवाम किं वा २४
सिंचांग नस्त्वमधरामृतपूरकेन हासावलोककलगीतजहृच्छयाग्निः नो चेद्वयं विरहजाग्न्युपयु
क्तदेहाध्यानेन याम पदयोः पदवीं सखे ते २५ यर्ह्यंबुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचि
दरण्यजनप्रियस्य अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमंग स्थातुं त्वयाभिरमिता नव पारयामः २६

किं प्रत्नयाककरिष्यामो येषां नोयमालोक इत्यादि किं च पतियानइति यदुक्तं तदशक्यं चित्तादीनामपहृतत्वादित्या
र्थः २३ यदस्माकं चित्तमेतावंतकालं सुखेन गृहेषु निर्विशति अधिष्ठमेतत्त्वयापहृतं करावपि गृहकृत्ये
निर्विशतस्तावपि त्वया पहृतौ सुखेनस्वात्मना त्वयेति वा २४ अतः अंगश्रीकृष्णत्वं अस्माकं तवाधरामृतपूर
कणत्वैव हासेन हसितेन अवलोकनेन कलगीतेन जातो यो हृच्छयाग्निः कामाग्निः तं सिंच नो चेद्वयं तावदेको
ग्निसिंचो भवितिचेन्न गाहुः २५ रमयालक्ष्म्यादत्तं क्षणं उत्सवो येन तव पादतलं अपि कुचिदेव न सर्वदा अरण्यजन
नामप्रिय यस्मात्तवअरण्यजनप्रियत्वाद् अरण्ये क्वचिदपि यर्हि कामायस्मादस्प्राक्ष्म अस्पाक्षं स्पृष्टवंतो वयं तच्चैव त्वयाभि
रमिताः आनंदिताः सन्तः तदारभ्य अन्यसमक्षं स्थातुमपि न पारयामः तच्छक्तिं प्राप्ता नो भवतीति भावः तस्मात् सो भा

गंगाविनिर्मितस्तवःसटीकः ४४

श्रीः श्रीःलक्ष्मीःवक्षसिश्रमापत्न्यांस्थानंलब्ध्वापितुलस्यासहतवपदांबुजरजःकामयतेस्मभृत्यैःसर्वैर्जुष्टमितिसौभा
भा॰ द॰ ग्यातिरेकोक्तिः यस्याःलक्ष्म्याःस्ववीक्षणकृतेश्रीरात्मनोविलोकयतुइत्येतदर्थमन्येषांब्रह्मादीनांतपोभिःप्रयास
स॰ टी॰ स्तादृशःतद्वद्वयमपिप्रपन्नाः ३७ हेवृजिनार्दनदुःखहर्त्तःत्वदुपासनेतदङ्घ्रिजनतयवाशेयासांताःवयंचवसतीर्गृ
१०६ हान्विसृज्यप्राप्तानस्तवप्राप्ताः तवसुंदरस्मितंविहसितंतन्निरीक्षणेनयःतीव्रःकामस्तेनतप्तचित्तानांनःहेपुरु
षभूषणदास्यंदेहिनतुगृहस्वाम्यंविहाय महादास्यमार्थ्यंतेपतत्प्रार्ह्य ३८ अलकावृतमुखंविकासितेगाढंतत्सुखेन

श्रीर्यत्पदांबुजरजःचकमेतुलस्यालब्ध्वापिवक्षसिपदंकिलभृत्यजुष्टं यस्याःस्ववीक्षणकृतेन्यसुरप्र
यासाःतद्वद्वयंचतवपादरजःप्रपन्नाः ३७ तन्नःप्रसीदवृजिनार्दनतेंघ्रिमूलंप्राप्ताविसृज्यवसतीस्त्व
दुपासनाशाः त्वत्सुंदरस्मितनिरीक्षणतीव्रकामतप्तात्मनांपुरुषभूषणदेहिदास्यं ३८ वी
क्ष्यालकावृतमुखंतवकुंडलश्रीगंडस्थलाधरसुधंहसितावलोकं दत्ताभयंचभुजदंडयुगंविलो
क्यवक्षःश्रियैकरमणंचभवामदास्यः ३९ कास्त्र्यंगतेकलपदामृतवेणुगीतसंमोहितार्यचरिता
न्नचलेत्रिलोक्यां त्रैलोक्यसौभगमिदंचनिरीक्ष्यरूपंयद्गोद्विजद्रुममृगाःपुलकान्यबिभ्रन् ४०
व्यक्तंभवान्व्रजजनार्तिहरोभिजातोदेवोयथादिपुरुषःसुरलोकगोप्ता तन्नोनिधेहिकरपंक
जमार्तबंधोतप्तस्तनेषुचशिरःसुचकिंकरीणाम् ४१ ॥ ॥

ण्या कुंडलयोःश्रीर्ययोस्तेगंडस्थलेयस्मिंस्तत् अधरयोःसुधायस्मिंस्तच्चतत्सुखंवीक्ष्यदत्ताभयंभुजदंडयुगंच
वक्षःचश्रियाएकमेवरमणंरतिजनकंवीक्ष्यतदास्यएवभवामइतिनत्वज्ञात्यपितामाःपप्राप्नंतत्राहुः ३९ अंग
गाहेकृष्णकलानिपदानियस्मिंस्तद्यथास्यात्तथायतंदीर्घंमूर्च्छितंस्वरालापभेदस्तेनयाकृतंतत्कलपदामृतमयंवेणुगी
तंतेनसंमोहिताकावास्त्रीआर्यचरितान्निजधर्मान्नसतीधर्मान्नचलेत् यत्संमोहिताःपुरुषाअपिचलिताःकिं
वत्रैलोक्यसौभगमिदंरूपंनिरीक्ष्यपुलकान्यबिभ्रन्स्यावराद्ययोरप्याप्यपलिनोपिद्रुमाअपिमृगादीन्
अपिवकथाश्रवणमात्रेणापितावन्निजधर्मंपरित्यागोयुक्तःकिंपुनस्त्वदनुभवेनेतिभावः ४० व्यक्तंनिश्चितं ४१

विक्लवितं पारवश्यं प्रलपितं गोपीररीरमत् रमयामास ४२ प्रियमीक्षणेनोत्फुल्लानि मुखानि यासां ताभिः उदारहा
सः च द्विजाश्च ते कुंदकुसुमवत् दीधितिर्यस्य सः एणांकः चंद्रः ४३ ४४ ४५ ४६ बाहुप्रसारश्च परिरंभश्च क
रादीनामालंभनं स्पर्शश्च नर्मपरिहासश्च नखाग्रपातश्च तैः क्ष्वेल्या क्रीडया च अवलोकश्च हसितैश्च कामं तासामु
द्दीपयन् तारमयामास ४७ महात्मनो विमुक्तचित्तात् ४८ तत्सौभगमदं च स्वाधीनतामानं गर्वं च केशः कश्च ईश
श्च तौ वशयतीति केशवः तथा सः ४९ इति श्रीभावार्थे दशमस्कंधे एकोनत्रिंशोध्यायः २९ त्रिंशे विरहसंतप्त

शुकउवाच इतिविक्लवितंतासांश्रुत्वायोगेश्वरेश्वरः प्रहस्यसदयंगोपीरात्मारामोप्यरीरमत् ४२ ताभिः
समेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः उदारहासद्विजकुंददीधितिर्व्यरोचतैणां
कइवोडुभिर्वृतः ४३ उपगीयमानः उद्गायन्वनिताशतयूथपः मालांबिभ्रद्वैजयंतींव्यचरन्मंडय
न्वनं ४४ नद्याःपुलिनमाविश्यगोपीभिर्हिमवालुकं रेमेतत्तरलानंदकुमुदामोदवायुना ४५ बाहु
प्रसारपरिरंभकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तं
भयन्रतिपतिंरमयांचकार ४७ एवंभगवतःकृष्णाल्लब्धमानामहात्मनः आत्मानंमेनिरेस्त्रीणांमा
निन्योभ्यधिकंभुवि ४८ तासांतत्सौभगमदंवीक्ष्यमानंचकेशवः प्रशमायप्रसादायतत्रैवांतरधीय
त ४९ इतिभागवतेदशमेएकोनत्रिंशोध्यायः २९ शुकउवाच अंतर्हितेभगवतिसहसैवव्रजांगनाः
अतप्यंस्तमचक्षाणाःकरिण्यइवयूथपं १ गत्यानुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्र
मैः आक्षिप्तचित्ताःप्रमदारमापतेस्तास्ताविचेष्टाजगृहुस्तदात्मिकाः २ गतिस्मितप्रेक्षणभाषणा
दिषुप्रियाःप्रियस्यप्रतिरूढमूर्तयः असावहंत्वित्यबलास्तदात्मिकान्यवेदिषुःकृष्णविहारविभ्रमाः ३

गोपीभिः कृष्णमार्गणं उन्मत्तवद्वर्ण्यते भ्रमंतीभिर्वने वने अचक्षाणा अपश्यंत्यः १ गत्या च अनुरागस्मिताभ्यां
च विभ्रमेक्षितानि विलासनिरीक्षणानि तैश्च मनोरमाश्चालापाश्च विहाराश्च क्रीडाश्च विभ्रमा ॥ अमी विलासास्तैश्च रमा
पतेर्गत्यादिभिरेतैराक्षिप्तानि आकृष्टानि चित्तानि यासां ताः अतस्तस्मिन्नेवात्मा यासां ताः तस्या विविधाश्चेष्टाज
गृहुस्तदनुकरणेनाक्रीडन् २ प्रियस्य गमनादिषु प्रतिरूढा आविष्टा मूर्तयो यासां ताः अतः कृष्णस्यैव विहार
विभ्रमाः क्रीडाविलासा यासां ताः अहमेव कृष्ण इति परस्परं निवेदितवत्यः ३ ॥

श्रीः
भा०द०
पू०टी०
१०१

वनाद्वनंतंगच्छंत्योविचिक्युरमगायन् उन्मत्तवत्तत्वमाह वनस्पतीनपप्रच्छुर्भूतेष्वंतर्बहिश्च संतं पुरुषमेव हि
स्मरंत इति तन्मयत्वं यतिनवभिः तत्र महत्त्वादेते पुष्पपुरिमाशयामहत्तादीन्पृच्छंति दृष्टो व इति ४ प्रेमहासमहि
तैरवलोकनैरस्माकं मनो हृत्वा चोर इव गतः वः युष्माभिः किं दृष्ट इति ५ मद्दोत्तः स्वपुष्पैरेवोपकारिणं पृच्छंति हे
नोः कुरवकादीन्पृच्छंति हे कुरवकादयः दर्पहरं स्मितं यस्य स इतो गतः कश्चिदिति ६ अलिकुलैः सहवर्तमानां विभ्र
न्नतिवातिप्रियः त्वया किं दृष्ट इति ७ गुणान्तरेणापि नम्रता इमाः पुष्पपुरिति मालत्यादीन्पृच्छंति हे मालति मल्लि
के जाति यूथिके वा युष्माभिः किमदर्शि दृष्टः करस्पर्शेन वः प्रीतिं जनयन्किं याता इति प्रश्ने मालतीजातीत्यादेर्वा तरविशे
षाद्दृष्टव्य इति शेषः ८ सर्वप्राणिनो मनुष्येकायपुष्पपुरिति चूतादीन्पृच्छंति हे चूतादयः येन्ये वपरार्थभविकाय

गायंत्य उच्चैरमुमेव संहता विचिक्युरुन्मत्तकवद्वनाद्वनं पप्रच्छुराकाशवदंतरं बहिर्भूतेषु संतं पुरुषं वनस्प
तीन् ४ दृष्टो वः कच्चिदश्वत्थ प्लक्षन्यग्रोध नो मनः नंदसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ५ कच्चित्
कुरबकाशोकनागपुन्नागचंपकाः रामानुजो मानिनीनामितो दर्पहरस्मितः ६ कच्चित्तुलसि कल्या
णि गोविंदचरणप्रिये सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेतिप्रियोच्युतः ७ मालत्यदर्शि वः कच्चिन्मल्लिके जा
तियूथिके प्रीतिं वो जनयन्यातः करस्पर्शेन माधवः ८ चूतप्रियालपनसासनकोविदारजंब्वर्कबि
ल्वबकुलाम्रकदंबनीपाः येन्ये परार्थभविका यमुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः ९
किं ते कृतं क्षिति तपो बत केशवांघ्रिस्पर्शोत्सवोत्पुलकितांगरुहैर्विभासि अप्यंघ्रिसंभव उरुक्रमविक्रमा
द्वा आहो वराहवपुषः परिरंभणेन १० अप्येणपत्न्युपगतः प्रिययेह गात्रैस्तन्वन्दृशां सखि सुनिर्वृतिम

र्थे परोपकारार्थं भवितुं जन्म येषां ते यमुनोपकूलाः यमुनायाः कूलसमीपे वर्तमानाः तीर्थवासिन इत्यर्थः हे भवे
तः रहितात्मनां शून्यचेतसां नः कृष्णपदवीं मार्गं शंसंतु कथयंतु अत्र चूतादिशब्दानां जातिभेदः कदंबनीपयोश्च ९ हे
क्षिति क्षिते त्वया किं तपः कृतं यतः केशवांघ्रिस्पर्शेनोत्सवो यस्याः सा कृतः तया घनैस्त्वंगरुहै
रुत्पुलकितैर्वा विभासि शोभसे तत्र विशेषं पृच्छति अपि किमयमत्स्ववः अंघ्रिस्पर्शसंभवः तवैव देवांघ्रिस्पर्श
संभूतः यद्वानेनावतारेण किं तु उरुक्रमविक्रमात्त्वमेव त्रिविक्रमस्य पदाक्रमणात् अहो अथवा नैतावदेव अपि तु ततो
पि पूर्वं वराहवपुषः परिरंभणेनेति अतस्त्वयानेन दृष्टस्तं दर्शयेति १० हरिण्या दृष्टप्रमदपरस्परदर्शनेन संभाव्याहुः
अपीति हे सखि एणपत्नि अपि किमुपगतः समीपगतः गात्रैः सुंदरैः भुजबाह्वादिभिः प्रियया सह तिष्ठन्निति योन्नयति

फलभारेणनतांम्लत्ववकृसंदृष्ट्याशलतानितिमताःप्रियायासहनस्पगतिविलासंसंभावयंत्यः इत्थंवियत्कामितित्व
लसिकायाश्रुलिकृलैः श्रतः तदामोदमदांधः अन्वीयमानः अनुगम्यमानरहववृतितित १२ कश्चिदाह हेमरवे
रमालताः कृसेनुसंगतान्ननरमाष्टछत नवस्पतिसगतोनस्पगतिदुर्वदोरनाकृवंतस्पेतेः पञ्चबाहलताश्लिष्टा
अपिश्रेष्ठाभाग्यनुनतत्वैः स्पृष्टायत्पुलकानिबिभ्रतिनहिसयंतिसगलावाहक्वपुलकसंभावरतिभावः १३ उन्म
त्तवत्प्रच्छुतियेनमपंवितरदानीरमायते: लास्ताविचेष्टाजन्यहः तदात्मिकाइतियत्कृतस्यपंचयतिरतीतिउन्मत
वचोगोप्यउन्मत्तवचसस्तागोप्यस्त्रकृसान्वेषणेनकातरा: अतिविह्वलाअतएवचक्रुः अनुकृतवसः १४ कस्याश्चि

वाहेप्रियोमरुवधायगृहीतपत्रोरामानुजस्तलसिकालिकृलैर्मदांधैः अन्वीयमानइहवस्तरवःप्रणा
मंकिंवाभिनंदतिचरन्प्रणयावलोकैः १२ पृच्छतेमाल्लताबाहूनप्याश्लिष्टावनस्पतेः नूनंतत्करजस्प
ष्टाबिभ्रत्पुलकान्यहो १३ इत्युन्मत्तवचोगोप्यः कृष्णान्वेषणकातराः लीलाभगवतस्तास्ताह्यनुचक्रु
स्तदात्मिकाः १४ कस्याश्चित्पूतनायंत्याः कृष्णायंत्यपिबत्स्तनं तोकायित्वारुदत्यन्यापदाहन्शकटा
यंती १५ दैत्यायित्वाजहारान्यामेकाकृष्णार्भभावना रिंगयामासकाप्यंघ्रीकर्षतीघोषनिःस्वनैः १६
कृष्णरामायितेद्वेतुगोपायंत्यश्चकाश्चन वत्सायितींहतीचान्यांतत्रैकातुबकायितीं १७ आहूयदूरगा
यद्वत्कृष्णस्तमनुकुर्वती वेणुंक्वणंतींक्रीडंतीमन्याःशंसंतिसाध्विति १८ कस्यांचित्स्वभुजंन्यस्यचलंत्या
हापरानन्वकृष्णोहंपश्यतगतिंललितामितितन्मनाः १९ माभैष्टवातवर्षाभ्यांतत्त्राणंविहितंमया
इत्युक्त्वैकेनहस्तेनयतंत्युन्निदधेंबरं २० आरुह्यैकापदाक्रम्यशिरस्याहापरांनृप दुष्टाहेगच्छजातोहं
खलानांनतुदंडधृक् २१ तत्रैकोवाचहेगोपादावाग्निंपश्यतोल्बणं चक्षूंष्याश्वपिदध्वंवोविदास्ये

दित्यादिभिः चतुर्भिः चतुर्भिरनुकरणेमपंचयेततः चतुर्भिस्तन्मयत्वेपुनर्देवोनानुकरणंइतिविवेकः पूतनायंत्याः
पूतनावदाचरंत्याः कृष्णवदाचरंतीस्तनमपिबत् तोकायितातेकवदाचरंतीतितदात्मानेकेवा १५ दैत्यायितादैत्य
वदात्मानंकृत्वापकाकृष्णार्भभावनांकृष्णस्यार्भवाल्यंभावयतियानामसोजहारहरेवर्तनागाः यद्वायथाकृष्णस्तथा
१६ हरणाःहरेवर्तमानाः मोहयद्यथातथाआह्वयमकृष्णमनुवर्ततीमितिवापाठः अन्याः साधुसाध्विति प्रशंसंति
१८ तस्मिन्नुष्णीकृत्वेमनोयासाताः १९ यतंतीप्रयत्नेकुर्वतीअंबरमनुवर्तमानान्ननुकुर्वतीरंयुत्तरीयवस्त्रमुन्निदधेऊर्ध्वधृत

श्रीः शयितं धनिमीलयन्तं २३ मुकुन्दस्य नयनमास्यं पिधाय स्वहस्तकरेणोक्तीति वाथीति विडम्बनं भयानुकरणं भेजे २४
भा॰ द॰ एवं पुनरपि पृष्ट्वा वनलतास्तत्र कृष्णस्पृष्टलतायाः भूमौ ह्येवं वनप्रदेशे प्रवदन्त्य अपश्यन् २५ स्पृष्टानामिति मित्राणि
श्री॰ टी॰ २७ तेन कृष्णेनांसे न्यस्तः प्रकोष्ठो यस्याः करेणोर्हस्तिन्याः २७ रहः एकान्तस्थाने २८ हे आल्यः हे सख्यः अहो धन्या
१०८ प्रतिग्रहणाः गोविन्दाङ्घ्र्यब्जरेणवः ननु देवैः यानिति अस्माभिर्यदि नन्देवाभिषेकेणैव तथैव कृष्णः श्रमयुक्तः तेइति
भावः ३० अस्मानाह तस्याः इति गोपीनां धनं सर्वस्वभूतं भावः भवेदेव यदि तस्याः पदानि संस्पृष्टानि न भवेयुः तदा

बद्धान्यया स्रजा काचित्तन्वी तत्र उलूखले बध्नामि भाण्डभेत्तारं हैयङ्गवमुषं त्विति भीता सुदृक् पिधाया
स्यं भेजे भीतिविडम्बनं २४ एवं कृष्णं पृच्छमाना वृन्दावनलतास्तरून् व्यचक्षत वनोद्देशे पदानि परमा
त्मनः २५ पदानि व्यक्तमेतानि नन्दसूनोर्महात्मनः लक्ष्यन्ते हि ध्वजाम्भोजवज्राङ्कुशयवादिभिः २६
तैस्तैः पदैस्तत्पदवीमन्विच्छन्त्योऽग्रतोऽबलाः वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् २७ कस्याः
पदानि चैतानि यातया नन्दसूनुना अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा २८ अनयाराधितो नू
नं भगवान्हरिरीश्वरः यन्नो विहाय गोविन्दः प्रीतो यामनयद्रहः २९ धन्या अहो अमी आल्यो गोविन्दा
ङ्घ्र्यब्जरेणवः यान्ब्रह्मेशौ रमा देवी दधुर्मूर्ध्न्यघनुत्तये ३० तस्या अमूनि नः क्षोभं कुर्वन्त्युच्चैः पदानि
यत् यैकापहृत्य गोपीनां रहो भुङ्क्तेऽच्युताधरम् ३१ न लक्ष्यन्ते पदान्यत्र तस्या नूनं तृणाङ्कुरैः खिद्यत्सु
जाताङ्घ्रितलामुन्निन्ये प्रेयसीं प्रियः ३२ इमान्यधिकमग्नानि पदानि वहतो वधूम् गोप्यः पश्यत कृष्णस्य
भाराक्रान्तस्य कामिनः ३३ अत्रावरोपिता कान्ता पुष्पहेतोर्महात्मना अत्र प्रसूनावचयः प्रियार्थे
प्रेयसा कृतः ३४ प्रपदाक्रमण एते पश्यतासकले पदे केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतं
३५ तानि चूडयता कान्तामुपविष्टमिह ध्रुवम् ३६

तानीति दुःखं कुर्वन्तीति तदसंस्पृष्टानि केवलं कृष्णपदानि प्रदर्शयैव विचिन्वन्त्यः तानि दृष्ट्वा पुनरसंस्पृष्टं समन्वय
न् तदाह श्लोकत्रयेण न लक्ष्यन्ते इत्यादिना ३१ खिद्यती सुजाते सुकुमारे अङ्घ्रितले यस्याः तां उन्निन्ये स्कन्धे समारो
पितवान् ३२ तत्रैव माह इमानीति भाराक्रान्तानि मग्नानि ३३ ३४ प्रपदाभ्यां पदाक्रमणाभ्यां आक्रम
णात् तेषामेकैकं मर्दनं यथा तत एव असकले पदे इति तत्कान्ताकुसुमानां तत उपविष्टायाः चिह्नं दृष्ट्वाहुः केशप्रसाधनम्

रेमे रत्यादिभिश्चेष्टाभिः आत्मरतः स्वतः तुष्टः आत्मारामः स्वक्रीडः अखंडितः स्त्रीविभ्रमैरनाकृष्टोत एवाकिमितिरेमे
अत आह कामिन्यामिति ३७ स्त्रीणां दुरात्मतामाह सा चेति द्वाभ्यां ३९ कामयाना मामसौ भजत साधिनेयासंताः गो
पीर्हित्वा मां भजते इति हेतोः आत्मानं वरिष्ठं मेने इति ४० कामिनां दैन्यं दर्शयति एवमुक्त इमे अधिरोहितमाह इत
श्रुतिनस्यां स्कंधरोहेहतायामंतर्हित इत्यर्थः अनुतापमाह हे नाथेति ४२ यदिच्छेषां मृगयमाणाविदूर

रेमे तया चात्मरत आत्मारामोप्यखंडितः कामिनां दर्शयन्दैन्यं स्त्रीणां चैव दुरात्मतां ३७ इत्येवं दर्श
यन्त्यस्ताश्चेरुर्गोप्यो विचेतसः ३८ यां गोपीमनयत्कृष्णो विहायान्याः स्त्रियो वने सा च मेने तदात्मा
नं वरिष्ठं सर्वयोषितां ३९ हित्वा गोपीः कामयाना मामसौ भजते प्रियः ४० ततो गत्वा वनोद्देशं दृप्ता
केशवमब्रवीत् न पारयेहं चलितुं नय मां यत्र ते मनः ४१ एवमुक्तः प्रियामाह स्कंध आरुह्यतामिति
ततश्चांतर्दधे कृष्णः सा वधूरन्वतप्यत ४२ हे नाथ रमण प्रेष्ठ क्वासि क्वासि महाभुजः दास्यास्ते कृप
णाया मे सखे दर्शय संनिधिं ४३ अन्विच्छंत्यो भगवतो मार्गं गोप्योविदूरतः ददृशुः प्रियविश्लेषमोहि
तां दुःखितां सखीं ४४ तया कथितमाकर्ण्य मानप्राप्तिं च माधवात् अवमानं च दौरात्म्याद्विस्मयं प
रमं ययुः ४५ ततोविशन्वनं चंद्रज्योत्स्ना यावद्विभाव्यते तमः प्रविष्टमालक्ष्य ततो निववृतुर्हरेः
४६ तन्मनस्काः तदालापास्तद्विचेष्टास्तदात्मिकाः समवेता जगुः कृष्णं तद्गुणानेव गायंत्यो
नात्मागाराणि सस्मरुः ४७ ततः पुलिनमागत्य कालिंद्याः कृष्णभावना समवेता जगुः कृष्णं
तदागमनकांक्षिताः ४८ इति भागवते दशमे त्रिंशत्तमोध्यायः ३० ॥

नः समीपे ४४ ततस्तयापि सहिताः कृष्णान्वेषणाय वनमविशन् ततो हरेरन्वेषणान्निवृत्ताः ४६ आत्मारा
रीत्नमः आत्माऽपि स्वशरीराण्येव स्मरंतवत्यः तदात्मिकाः सर्वदात्मायायासीताः तन्मया इत्यर्थः ४७ किंतु अवैय
त्रस्त्रीकृष्णेन मां गतिरासीत् तदेव कालिंद्याः पुलिनमागत्य कृष्णं भावयंती तितस्थाना ः कृष्णस्यागमनं कांक्षि
तेयासांताः कांक्षिताः सत्यः कृष्णमेव जगुरिति ४८ इति श्रीभावार्थदीपिकायां दशमस्कंधे त्रिंशत्तमोध्यायः
३० एकत्रिंशे निशश्रयस्ताः कालिंद्याः पुलिनमागताः कृष्णमेवानुध्यायंत्याः प्रार्थयंते तदागमम्

श्री: भा॰ द॰ पू॰ टी॰ १०५

हे दयित ते जन्मना व्रजः यथाधिकं भवति तथा जयति उत्कर्षेण वर्तते यस्मात्त्वमत्र जातः तस्मादिंदिरा लक्ष्मीः अत्र
हि श्रयते अनुवर्तते एवं व्रजे सर्वस्मिन्मोदमाने अत्र तावकास्त्वदीयाः गोपजनाः त्वयि तदर्थमेव कथंचिद्धृतासवः धृतप्राणास
ते त्वां विचिन्वते यतः त्वया दृश्यतां प्रसन्नीभूयतामिति यद्वा अस्माभिर्भवान्दृश्यतामिति यद्वा एवं त्वया दृश्यतामेतेत्वं विचिन्
वंतीत्यत्र सतां गावरहंतावकाः यथा आहुरिति सर्वे श्लोकेष्वेतावत्समं तथापि संगतिरूह्यते विचिन्वतमम किमिति चेत्तत्राहुः
शरदिति १ शरदुदाशये शरत्कालीने सरसि साधु जातं सत्सरसिजोदरश्रीमुषा साधुजातं सम्यग्जातं यत्सरसिजं तस्य कोशस्य
श्रीः तां मुष्णाति हरतीति तया तया दृशा नेत्रेण हे सुरतनाथ संभोगपते वरद अशुल्कदासिकाः अमूल्यदा
सीर्ना निघ्नतो मारयतः ते न तव त्वया क्रियमाणं इह लोके अयं वधो न भवति किं शस्त्रेणैव वधो नैव भवति किंतु भवतेव यतस्त्व

गोप्य ऊचुः जयति तेऽधिकं जन्मना व्रजः श्रयत इंदिरा शश्वदत्र हि दयित दृश्यतां दिक्षु तावकास्त्वयि धृ
तासवस्त्वां विचिन्वते १ शरदुदाशये साधुजातसत्सरसिजोदरश्रीमुषा दृशा सुरतनाथ तेऽशुल्कदा
सिका वरद निघ्नतो नेह किं वधः २ विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात् वृषम
यात्मजाद्विश्वतोभयादृषभ ते वयं रक्षिता मुहुः ३ न खलु गोपिकानंदनो भवानखिलदेहिनामंतरा
त्मदृक् विखनसार्थितो विश्वगुप्तये सख उदेयिवान्सात्वतां कुले ४

वदृशापहृतप्राणा मे दासिकास्त्वया दृश्यतामिति यथासंभवं सर्वत्र वाक्यशेषः २ किंच बहुभ्यो मृत्युभ्यः त्वं कृपया रक्षिता
किमिति इदानीं उपेक्षसे इत्याहुः विषेति हे वृषभ श्रेष्ठ विषमयाज्जलात् कालियात् अप्ययो नाशः तस्मात्
व्यालराक्षसात् अघासुरात् वर्षमारुतात् इंद्रकृतात् वर्षात् तृणावर्तात् वैद्युतानलाद्दावानलात् वृषो अरिष्टः तस्मात् मयात्मजा
त् व्योमात् विश्वतो अस्मात्कदापि सर्वतो भयात् कालियदमनात् रक्षिताः किमिदानीमुपेक्षसे इति भावः ३ अपि च वि
श्वपालनाय अवतीर्णस्य तव भक्तोपेक्षा अत्यंतमनुचितमित्याशयेनाहुः न खल्विति हे सखे भवान् खलु निश्चितं यशो
दासुतो न भवति येन अस्मानुपेक्षसे किंतु सर्वप्राणिनां बुद्धिसाक्षी किं दृष्टेन भवतीत्यत आहुः विखनसा ब्रह्मणा विश्वपालनाय
प्रार्थितः सन् सात्वतां यादवानां कुले उदेयिवानुदितः इति मद्भक्तानामस्माकं प्रार्थनाव्यर्थं संपादयेत्याहुः विरचि
ताभयमित्यादिचतुर्भिः ४ ॥

विरविलासभयंहेतुमिधुर्यसंस्तेभयात्तेशरणमीशुषांशरणशमानांविरविलंदन्नमभयंयेनतन्नथाहेकांतक
मलेवरदतयाश्रियःकरंरहृणातीतितथानद्भवतनेकरसरोरुहेनःशिरसिधेहिप्रार्थयेपय ४ हेव्रजजनार्तिह
नुहेवीरनिजजनानांयःस्मयोगर्वःतम्ध्वंसनेनापकंस्मितंयस्यतेतथाभूतहेसखेभवकिंकरीःनःअस्मान्भजप्रा
र्थयस्मेतिनिश्चितेयथमंतावतजलरुहाननंचारुयोषितांनोदर्शय ६ प्रविशेषेणप्रणतानांदेहिनांपापकर्ष
णपापापहंतरणचरान्पशूननुगच्छतिकृपयतितथासोभाग्येनश्रियोनिकेतनंवीर्यतिवेकेणफणिनःकाले
यस्यफणास्वर्पितंतेपदांबुजंनःकुचेषुकृणकृरुकिमयंहृच्छयंकामंछंधि ७ हेपुष्करेक्षणतेमधुरयागिरा

विरविलासभयंकुरुस्वधुर्यतेशरणमीशुषांसंस्तेभयात् करसरोरुहंकांतकामदंशिरसिदेहिनःश्रीकर
ग्रहं ४ व्रजजनार्तिहन्वीरयोषितांनिजजनस्मयध्वंसनस्मित भजसखेभवकिंकरीःस्मनोजलरुहान
नंचारुदर्शय ६ प्रणतदेहिनांपापकर्षणंतृणचरानुगंश्रीनिकेतनं फणिफणार्पितंतेपदांबुजंकृ
णुकुचेषुनःकृंधिहृच्छयं ७ मधुरयागिरावल्गुवाक्ययाबुधमनोज्ञयापुष्करेक्षण विधिकरीरिमा
वीरमुह्यतीरधरसीधुनाप्याययस्वनः ८ तवकथामृतंतप्तजीवनंकविभिरीडितंकल्मषापहं श्र
वणमंगलंश्रीमदाततंभुविगृणंतियेभूरिदाजनाः ९ मधुरयागिरावल्गुवाक्ययाबुधमनोज्ञयापुष्करेक्षण विधिकरीःप्रश
वल्गुनिरम्याणिवाक्यानियस्यांतयाबुधानांमनोज्ञयाहृद्ययागंभीरयेत्यर्थः मुह्यतीरिमाःविधिकरीःप्रश
रसीधुनाप्यधरामृतेनाप्याययस्वसंजीवयेति किंवास्माकंवधिरहेणश्रमेवशरणंकिंतवकथामृतंपाय
यद्भिःसहृद्भिःवंचितमित्याहुःतवेति ९ तथैवामृतंयस्यहेतुःतप्तजीवनं प्रसिद्धामृतादुत्कर्षमाहुःकविभि
र्ब्रह्मविद्भिरपिईडितंस्तुतंदेवभाग्येनमृतंतैःतत्त्वीकिंचकल्मषापहंकामकर्मनिरसनंतच्चामृतंनैवंभूतंकिंच श्र
वणमंगलंश्रवणमात्रेणमंगलप्रदंतच्चतुप्रशान्तापेदंकिंचश्रीमत्सुशान्तंतच्चमादकंएवंभूतंतवकथामृतंयेतनुभु
विगृणंतितेभूरिदाःबहुदातारःजीविततदत्तमित्यर्थःयद्वाएवंभूतंतवकथामृतंगृणंतितेभूरिदाः
विषयेगृणंतिनिरुपयंतियेजनाःभूरिदाःबहुदातारःजीवितदत्तमित्यर्थः एतदुक्तंभवतिसर्वस्वयेकेवलंकथामृतंगृणंतितेषितावद्तिधन्याः
तेएवंतत्त्वस्सबहुदत्तवंतःसुकृतिनइत्यर्थः एतदुक्तंभवतिसर्वस्वदेपनप्रतामितितिति ९ ननुतर्हिमतकथाश्रवणेनैवनिर्वृतास्तंभवेयुःकिमुद्दर्शी
किंपुनः येनायमुपनिश्रुतःप्रार्थयामहेसयाहृदपयतामितितिति ९ हेप्रियहेकुहकंकपटमवदःसंके
तेनतदिलास्यचिंतितविलासयेततापिध्यानेनतिविलामःस्माहु्मस्मितमिति ९ हेप्रियहेकुहककपटसर्वविदःसंके
ननदितास्यचिंतितविलासपदेमामित्यर्थःविमोहपनःअस्मान्कनहेतुनाकपटमावशीमाहःप्रेमवरयेनवलसीति
ननकमोहि किंचवतपितवप्रमविप्रेमार्हविमोहयनःश्रेयःकनहेतुनाकपटमावशीमाहःप्रेमवरयेनवलसीति
१० हेनाथकांतयपदावनागानलयामिपकस्मादयमितिसदातनम्नोलिनसुंदरंकामलंततेपदेशिलेकोणमःहृतोरउरेसमीदति

१. श्रीवाभितेम: से विनामम: कंसनाशिनि ॥

ति:येदिविनोमन:कलिलतामसाध्यगच्छतिप्राप्नोति एवंभूताश्चनामत
:त्वयांकितविलासपम ॥

श्रीः
भा॰टी॰
द॰स्त॰
११०

तेन दिनपरिक्षये सायंकाले नीलकुन्तलैरावृतं घनरजस्वलं गोरजः छुरितं वनरुहाननं अलिमालापरागच्छुरितं पद्मं तत्समाननं वि
भ्रत् त्वं वनेषु मुहुर्मुहुर्दर्शयंश्च नो मनसि केवलं स्मरं यच्छसि अर्पयसि न तु संगं ददासि कपटत्वमिति भावः अतोऽधुना कपटं विहायैवं
कुर्विति प्रार्थयन्ते श्लोकद्वयेन १२ हे आधिहन् हे रमण पद्मजेन ब्रह्मणार्चितं आपदि ध्येयं ध्यानमात्रेणापन्निवर्तकं शंतमं च सेवा
समये चापि सुखतमं तव चरणकमलं कामतापप्रणतेभ्यः नः स्तनेष्वर्पयेति १३ अपि च हे वीर ते यदधरामृतं नो वितर देहि कथंभूतमधरा
मृतं स्वरितेन नादितेन वेणुना सुष्ठु चुम्बितमिति नादामृतवासितमिति भावः इतररागविस्मारणं नृणामितरेषु सार्वभौमादिराज्य
सुखेषु रागमिच्छां विस्मारयति विलोपयतीति तथा तत् किं च त्वामपि न दर्शनेन सुरतस्पर्शनेन च वर्धयद्दृष्ट्वा सर्वस्मर्गपविता
गमयतयत्र वर्धनाम सुपागताः तेन कथमस्मास्त्यक्तुमर्हसि इति सकरुणमाहुः अटतीति द्वयेन १४ यद्यदा भवान् काननं वृन्दा
वनं प्रति गच्छति तदा त्वामपश्यतां प्राणिनां त्रुटिः क्षणार्धमपि युगवद्भवति एवमदर्शने दुःखमुक्तं दर्शनेऽपि विघ्नकारित्वेन तव
श्रीमन्मुखं च तव उदीक्षमाणानां तेषां दृशां पक्ष्मकृत् ब्रह्मा जडः मन्दः निमिषमात्रमपि व्यवधानमसहमानेति दर्शनसुखोद्वेगे १५ स

दिनपरिक्षये नीलकुन्तलैर्वनरुहाननं बिभ्रदावृतं घनरजस्वलं दर्शयन्मुहुर्मनसि नः स्मरं वीर यच्छसि १२ प्रणतकाम
दं पद्मजार्चितं धरणिमण्डनं ध्येयमापदि चरणपंकजं शंतमं च ते रमण नः स्तनेष्वर्पयाधिहन् १३ सुरतवर्धनं शोकना
शनं स्वरितवेणुना सुष्ठुचुम्बितं इतररागविस्मारणं नृणां वितर वीर नस्तेऽधरामृतं १४ अटति यद्भवानह्नि काननं त्रुटि
र्युगायते त्वामपश्यतां कुटिलकुन्तलं श्रीमुखं च ते जड उदीक्षतां पक्ष्मकृद्दृशां १५ पतिसुतान्वयभ्रातृबान्धवानति
विलंघ्य तेऽन्त्यच्युतागताः गतिविदस्तवोद्गीतमोहिताः कितव योषितः कस्त्यजेन्निशि १६ रहसि संविदं हृच्छयोदयं
प्रहसिताननं प्रेमवीक्षणं बृहदुरः श्रियो वीक्ष्य धाम ते मुहुरतिस्पृहा मुह्यते मनः १७ व्रजवनौकसां व्यक्तिरंग ते वृ
जिनहन्त्र्यलं विश्वमंगलं त्यज मनाक् च नस्त्वत्स्पृहात्मनां स्वजनहृद्रुजां यन्निषूदनं १८ यत्ते सुजातचरणांबुरुहं स्तने
षु भीताः शनैः प्रिय दधीमहि कर्कशेषु तेनाटवीमटसि तद्व्यथते न किंस्वित्कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः १९

किं च तव कृते त्वया वा इदि तमेवेदमित्यभिप्रेत्याहुः तस्मात्तेऽच्युत पतीन् सुतानन्वयान्तमेव धिनः भ्रातॄन् बान्धवांश्चातिविलं
घ्य तव समीपमागता वयं कथंभूतस्य गतिविदः अस्मदागमने गीतगतीर्जानतः गतिविदो वयं वा तवोद्गीतेन उद्गीतेन मो
हिताः हे कितव शठ एवंभूता योषितो निशि स्वयमेवागताः त्वादृशं कः पुमान् त्यजेत् न कोऽपीत्यर्थः अतः त्वया सक्तानामस्माकं मन
न तव दर्शनेन निदानं हृद्रोगमात्र दर्शनेन संगमेव चिकित्सां कुर्विति आहुः द्वयेन रहसीति १६ श्रियो धाम ते बृहद्विशालं उरश्च वीक्ष्य नः
अतिस्पृहा भवति तथा च मुहुर्मुहुर्मनो मुह्यति १७ तव व्यक्तिः अभिव्यक्तिः व्रजवनौकसां सर्वेषां अखिलं वृजिनहन्त्री दुःखवि
हन्त्री विश्वमंगलं सर्वमंगलरूपा च अतः त्वत्स्पृहात्मनां त्वत्स्पृहैव मनो येषां तेषां नः स्वजनानां किमपि स्वल्पमेवाल्पमौषधं देहि
मर्थाः किं तत् स्वजनहृद्रोगाणां यन्निषूदनं नाशकं औषधं तन्मे वक्ष्यामीति गूढाभिप्राये इति प्रेमपर्याकुलाः सत्याहुः
यदिति १८ हे प्रिय यत्ते तव सुजातं सुकुमारं चरणाम्बुजं कठिनेषु स्तनेषु संमर्दनशंकिताः शनैः शनैर्दधीमहि धारयामः तेनाटवीमट
सि तव मीति पाठे पद्मं तत्किंस्वित्स्यादा वा अस्मान् नमेकवाननयसि मापवसितत्वं नः तमादाबुजे वादिभिः कूर्मासस्तपाषाणादिभिः किंस्वि

[illegible]
११०

इति श्रीभावार्थदीपिकायां दशमे एकत्रिंशोऽध्यायः ॥ ३१ ॥ द्वात्रिंशे विरहालापविह्वलं हृदयो हरिः । तत्राविर्भूय गोपीस्ताः सान्त्वयामास मानयन् । स्वप्रेमाश्रुतकल्लोलविह्वलीकृतचेतसः सहृदयं नेदयं गोपीरुद्गतो नंदनंदन इति इत्येवं प्रभृतिविचित्रधा श्रुतेन कथा प्रेमशुद्धं सुस्वरं रुरुदुः कृष्णदर्शनेलालसाश्च भिस्वरा यासां ताः ॥ १ ॥ साक्षान्मन्मथः जगन्मोहकस्य कामस्यापि मनसः तु हृतः कामः साक्षात् तस्यापि मोहक इत्यर्थः ॥ २ ॥ तान्वः करवराणादयः ॥ ३ ॥ प्रेञ्जलिना संहृत हृतस्तदेव ॥ ४ ॥ भ्रुकुटीमाबध्य प्रेमसंरम्भेण प्रणयकोपावेशेन विह्वला विवशा ऽस्पष्टरोषा कटाः क्षेपाः कटाक्षाः तैर्ये

इति श्रीभागवते महापुराणे दशमस्कंधे एकत्रिंशोऽध्यायः ॥ ३१ ॥ शुक उवाच ॥ इति गोप्यः प्रगायन्त्यः प्रलापन्त्यश्च चित्रधा ॥ रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥ १ ॥ तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः ॥ पीताम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २ ॥ तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः ॥ उत्तस्थुर्युगपत्सर्वास्तन्वः प्राणमिवागतं ॥ ३ ॥ काचित्कराम्बुजं शौरेर्जगृहेऽञ्जलिना मुदा ॥ काचिद्दधार तद्बाहुमंसे चन्दनभूषितं ॥ ४ ॥ काचिदञ्जलिनागृह्णात्तन्वी ताम्बूलचर्वितं ॥ एका तदङ्घ्रिकमलं संतप्ता स्तनयोरधात् ॥ ५ ॥ एका भ्रुकुटिमाबध्य प्रेमसंरम्भविह्वला ॥ घ्नतीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ॥ ६ ॥ अपरानिमिषद्दृग्भ्यां जुषाणा तन्मुखाम्बुजं ॥ आपीतमपि नातृप्यत्संतस्तच्चरणं यथा ॥ ७ ॥ तं काचिन्नेत्ररन्ध्रेण हृदि कृत्वा निमील्य च ॥ पुलकाङ्ग्युपगुह्यास्ते योगीवानन्दसंप्लुता ॥ ८ ॥ सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ॥ जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥ ९ ॥ ताभिर्विधूतशोकाभिर्भगवानच्यु

क्षेपाः परिभाः तैः ताड्यंतीव ऐक्षत ॥ ६ ॥ अनिमिषेनीदृग्भ्यां आपीतमपि सम्यग्दृष्टमपि तृप्तः तुन तेषां तान् तृप्यत् ॥ ७ ॥ हृदि कृत्वा हृदयमावेश्येत्यर्थः ॥ ८ ॥ प्राज्ञमीश्वरं प्राप्य यथा सुषुप्तौ जनाः यद्वा प्राज्ञं ब्रह्म संप्राप्य यथा संसारिणः यद्वा प्राज्ञं सौषुप्तं प्राप्य यथा विश्वतैजसावस्थो जीवः ॥ ९ ॥ पुरुषः परमात्मा शक्तिभिः सत्वादिभिर्यथा यद्वा उपासकोऽहितरूपो वा शायी प्रकृत्यादिभिरिन्द्रियैर्वा अधिष्ठितो ऽधिरोचनन्दन ॥ १ ॥ ॥ ॥

श्री॰
भा॰ द॰
पू॰ टी॰
१५५

विकसत्कुंदमंदारैः सुरभिर्योनिलः तस्मात् षट्पदा यस्मिंस्तत् ११ शरच्चंद्रांशूनां संदोहैर्ध्वस्तं दोषातमः सत्रिगतं
नमो यस्मिंस्तत् अतः शिवं सुखकरं हस्तरूपैस्तरलैः तरंगैः रचिता आस्तृता कोमला वालुका यस्मिन् एवंभूते श
लिने ताः समादाय निविश्य तत्राभिहृतो थिकव्यापोवनेति पूर्वेणान्वयः १२ शृणीकामात्रवधूतः आनययायथे तामथम
र्थः यथा कार्मिकोऽध्यात्मनः परमेश्वरमपश्यंतः न तत्कर्मौत्रवेथे तस्मात् हृणाति इति भवति तानकांडेत्यपरमेश्वरं दृष्ट्वा आस्माद
शृणोः कामास्तत्वं जहाति न हृदि निश्रामकामा अपि श्रुता न मम भजन्नित्याह स्वैरिति अचीक्लृपन् रचयामासुः आत्म
बंधवे अंतर्यामिने १३ गोपीसभायां ताभिः समानितः सन् चकास शुशुभे त्रैलोक्यस्य या लक्ष्मीः शोभा तस्या एक

ताः समादाय कालिंद्या निर्विश्य पुलिनं प्रभुः विकसत्कुंदमंदारसौरभ्यानिलषट्पदं ॥ शरच्चंद्रांशुसं
दोहध्वस्तदोषातमः शिवं कृष्णाया हस्ततरलाचितकोमलवालुकं ॥ तद्दर्शनाह्लादविधूतहृद्रुजो मनो
रथांतं श्रुतयो यथा ययुः स्वैरुत्तरीयैः कुचकुंकुमांकितैरचीक्लृपन्नासनमात्मबंधवे १३ तत्रोपविष्टो भग
वानस ईश्वरो योगीश्वरांतर्हृदि कल्पितासनः चकास गोपीपरिषद्गतोर्चितः त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत्
१४ सभाजयित्वा तमनंगदीपनं सहासलीलेक्षणविभ्रमभ्रुवा संस्पर्शनेनांककृतांघ्रिहस्तयोः संस्तुत्य
ईषत्कुपिता बभाषिरे १५ गोप्य ऊचुः भजतोनुभजंत्येक एक एतद्विपर्ययं नोभयांश्च भजंत्येके एत
न्नो ब्रूहि साधु भोः १६ श्रीभगवानुवाच मिथो भजंति ये सख्यः स्वार्थैकांतोद्यमा हि ते न तत्र सौहृदं ध
र्मः स्वार्थार्थं तद्धि नान्यथा १७ भजंत्यभजतो ये वै करुणाः पितरो यथा धर्मो निरपवादोत्र सौहृदं च स

मेवं पदं स्यात् तेन तद्वपुः दधत् दर्शयन् १४ तत्र भगवतो कृतज्ञतां तद्वचनेनैव आपादयितुं क्रमात् कृत्वाभिप्राया लोकहा
र्दं तानमिव संकेति भजनत इत्याह १५ भजतः प्राणिनः अनुभजंते तर्केचित्कृतज्ञतमानुसारेण भजंति केचित् तद्विपर्ययं ये
यथा भवति तथा तत् अभजतामप्यतामधजतोपि भजंति अन्ये तु नोभयानिति विदिताभिप्रायश्च तत्रमा हामिथ इति १६ हे सा
ख्यो उपकारप्रत्युपकारतया ये मिथो भजंति ते अन्योन्यं न भजंति किंतु आत्मानमेव कृतं हि यस्मात् स्वार्थैकांततद्यमा
येषां ते तत्र तत्सौहृदं मनो न सुखं न च धर्मो हृष्टोद्देशात् ग्रामक्रियादि भजनदिवदित्यर्थः १७ ये त्वभजतो भजंति ते द्विवि
धाः करुणाः स्निग्धाश्च तत्र यथाक्रमं धर्म कामो भवत इत्याह भजंत्यभजत इत्यादि १८ ॥ ॥

राम॰
१११

तृतीयप्रश्नस्योत्तरमाह भजत इति अयमर्थः नैव ते चतुर्विधाः एके त्वात्मारामाः अपरे आप्तकामाः केचिदाप्तकामाः वि
षयदर्शनेपि पूर्णकामत्वपि भोगेच्छारहिताः अन्ये अकृतज्ञास्तु मूढाः अन्ये गुरुद्रुहः अतिकठिनाः सपिताय
स्तहृषिकः इति न्यायादुपकर्ता गुरुतुल्यः तस्मै द्रुह्यन्तीति तथेति १९ अत्र सर्वकोटिगतमात्मानं मत्वा अद्विषे
कैदैवैः परस्परं गूढस्मितं तत्सु वीक्ष्य तदभिप्रायमाह नाहं त्विति हे सख्यः अहं तेषां मध्ये न कोपि किं तु परमकारुणि
कः परमसुहृच्च हे कथममीषां भजतामनुवृत्तिनिवृत्तये चिरं न स्थानमवस्थानं यथा नानुभजामि एतत्सदृष्टान्तमाह यथेति
न सस्थन वैवर्विनयानिभृतः पूर्णधनमसइतियावत् अन्यत् द्रव्यं पितासाधयितुं न वेद २० एवं मदर्थोज्झितलोकवे
दस्वानां मदर्थमुज्झितलोकवेदस्वानां मदर्थोज्झितो लोकः पुत्राद्युक्ताः प्रतीदत्तान् स्वाज्ञानयत्र स्वस्य परित्या

भजतोपि न वै केचिद्भजन्त्यभजतः कुतः आत्मारामा ह्याप्तकामा अकृतज्ञा गुरुद्रुहः १९ नाहं तु सख्यो
भजतोपि जन्तून्भजाम्यमीषामनुवृत्तिवृत्तये यथाधनो लब्धधने विनष्टे तच्चिन्तयान्यन्निभृतो न वेद २०
एवं मदर्थोज्झितलोकवेदस्वानां हि वो मय्यनुवृत्तयेबलाः मयापरोक्षं भजता तिरोहितं मासूयितुं मा
र्हथ तत्प्रियं प्रियाः २१ न पारयेहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः या माभजन्दुर्जरगे
हशृंखलाः संवृश्च्य तद्वः प्रतियातु साधुना २२ इति श्रीभागवते दशमे द्वात्रिंशोध्यायः ३२ शुकः
इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः जहुर्विरहजं तापं तदङ्गोपचिताशिषः १ ॥

गान् याभिः स्वासां वो युष्माकं परोक्षं मद्दर्शनं यथा भवति तथा भजता युष्मत्प्रेमालापान् शृण्वतैव तिरोहितं अन्त
र्धानेन स्थितं तस्मात् हे अबलाः प्रियं माम् असूयितुं दोषारोपेण द्रष्टुं मा अर्हथ न योग्याः स्थ २१ परमार्थस्त्वेवं नेत्याह ने
ति निरवद्यसंयुजां निरवद्या संयुक् यासां वो विबुधानामायुषा अतिदीर्घकालेनापि स्वीयं साधुकृत्यं प्रत्युपकारं कर्
त्तुं न पारये न शक्नोमि या मे गेहशृंखलाः संवृश्च्य निःशेषं छित्त्वा मामभजन् तासां सम्यग्भिन्नवद्धप्रेमयुक्ततया
नैवमेकनिष्ठतया अस्माकं युष्माकमेव साधुना साधुकृत्येन तेन युष्मत्साधुकृत्येनैव प्रतियातु प्रतिकृतं भवतु युष्मत्सौशील्येन
ममानृण्येन न तु मत्प्रत्युपकारेणेत्यर्थः २२ इति श्रीभावार्थदीपिकायां दशमस्कन्धे द्वात्रिंशोध्यायः ३२ त्रयस्त्रिं
शे ततो गोपीमण्डलीमध्यगो हरिः प्रियास्ता रमयामास क्रीडादिनी वनकेलिभिः तत्र राजयेहेराजन यद्गतस्य भगवतो

श्री॰ भा॰ द॰ पू॰ टी॰ १११

गेनव भूषाकरवराणां यद्वयवैरुपचिताः सम्भूताग्राशिषायासंतताः १ रासक्रीडे रासोनाम बहूनर्तकीयुक्तो नृत्यवि
शेषः तां क्रीडामन्योन्यमाबद्धाः संग्रथिता बाहवो यैः तैः सह २ तत्साहित्यमभिनयेन दर्शयति रासोत्सव इत्यादिसार्द्धेनाष्ट
रवेन छायाधिकेन ततो सा मंडलरूपेणावस्थितानां द्वयोर्मध्ये प्रविष्टेनैकैकस्य कंठे तथा प्रवेशः सर्वसन्निहितत्वेनाकृतः स्व
वनिकटत्वाभिमानस्तासां तेनैव योगेश्वरेणासि प्रविंत्यशक्तिहेतुः ग्रीणैनवकंठे गृहीतानां उभयत आलिंगिता
नां कंठे गृहीतेन यं सर्वाः स्त्रियः स्वस्वनिकटे मामेवाश्लिष्यन्ति शक्तिनेत्यर्थः ४ ततः मे वोत्सुकाः पाश्रमनसां सस्त्रीकाणां
देवानां विमानशतैः संकीर्णं नभो बभूव ५ सप्रियाणां श्रीकृष्णा सहितानां तुमुलसंकीर्णं ७ महामरकतो नीलमणि

भगवांस्तत्रैवाविंदो रासक्रीडामनुव्रतैः स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः २ रासोत्सवः प्रवृत्तो गो
पीमंडलमंडितः योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ३ प्रविष्टेन गृहीतानां कंठे स्वनिकटं स्त्रियः
यं मन्येरन्नभस्तावद्विमानशतसंकुलं दिवौकसां सदाराणामौत्सुक्यापहृतात्मनां ५ ततो दुंदुभयो
नेदुर्निपेतुः पुष्पवृष्टयः जगुर्गंधर्वपतयः सस्त्रीकास्तद्यशोमलं ६ वलयानां नूपुराणां किंकिणी
नां च योषितां सप्रियाणामभूच्छब्दस्तुमुलो रासमंडले ७ ततोतिशुशुभे ताभिर्भगवान्देवकीसुतः
मध्ये मणीनां हैमानां महामरकतो यथा ८ पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यै
श्चलकुचपटैः कुंडलैर्गंडलोलैः स्विद्यन्मुख्यः कबररशनाग्रंथयः कृष्णवध्वो गायंत्यस्तं तडित इव २

रिव हैमानां मणीनां मध्ये ताभिः स्वर्णवर्णाभिराश्लिष्टाभिः शुशुभे गोपीदृष्टाभिर्यथैव विनैव मध्यपदाहारिमेक
वद्धेन ८ सयथा ताभिः शुशुभे तथा तत्रापि पितेनैरज्जरिस्माहपादन्यासैरिति भुजविधुतिभिः करचालनैः भज्यमा
नैर्मध्यैः चलद्भिः कुचैस्तु कंचुकीयवस्त्रैर्गंडलोलैः गंडेषु कपोलेषु वेचलः गंडेषु कपोलेषु स्विद्यन्मुख्यः स्विद्यंति
स्वेदयुक्तानि मुखानि यासां ताः कबरेषु रशनासु च ग्रंथयः उच्छ्रायासंताः यद्वा केशानां रशनायाश्च ग्रंथयः शि
थिलग्रंथय इत्यर्थः तेन नानारूपाणि श्रीकृष्णं मेघचक्रविमिव तास्तु वह्नविधाः तडित इव स्वेदस्तु धारामिव मी
ते गर्जितमिव तिय था सेभवन्मुखे ९

रास॰ ११६

नृत्यमानाः नृत्यन्तः रक्तकंठ्यः नानारागरंजितकंठ्यः कृष्णस्याभिमर्शनेन संस्पर्शेन मुदिताः इदं विश्वं ८
मुकुन्देन सह स्वरजातीः षड्जादिस्वरालापान् उन्निन्ये उच्चैर्गीतवती अमिश्रिताः कृष्णस्वरेणासंकीर्णाः प्रीयमाणेन स
म्मानिता पूजिता तत्रापि ध्रुवाख्यं तालविशेषं गीत्वा उन्निन्ये तस्मै प्रीयमाणेन स मानं च बह्वदात्
एवं ह्यन्यगीतादिना प्रीतः कृष्णः संमानितवान् नानारसोत्पत्तिशीतिविलसितेऽस्मिन्मान ९ श्लथंति विलयानि मल्लिका
च यस्याः सा १० उत्पलस्य सौरभमिव सौरभं यस्य तं बाहुं ११ नाट्येन नृत्येन विक्षिप्तयोः कुण्डलयोः त्विषः
प्रभा तया मण्डिते कपोलेन या स्वगण्डे संदधत्याः संयोजयन्त्याः १२ कूजन्ती नूपुरे मेखला च यस्याः

उच्चैर्जगुर्नृत्यमाना रक्तकंठ्यो रतिप्रियाः कृष्णाभिमर्शमुदिता यद्गीतेनेदमावृतं ८ काचित्स
मं मुकुन्देन स्वरजातीरमिश्रिताः उन्निन्ये पूजिता तेन प्रीयता साधु साधु इति ९ तदेव ध्रुवमुन्नि
न्येन तस्मै मानं च बह्वदात् तत्रैकांसस्थितं बाहुं कृष्णस्योत्पलसौरभं ९ काचिद्रासपरिश्रा
न्ता पार्श्वस्थस्य गदाभृतः जग्राह बाहुना स्कंधं श्लथद्वलयमल्लिका चंदनालिप्तमाघ्राय
हृष्टरोमा चुचुम्ब ह ११ कस्याश्चिन्नाट्यविक्षिप्तकुंडलत्विषमंडिते गंडं गंडे संदधत्याः प्रादा
त्ताम्बूलचर्वितं १२ नृत्यती गायती काचित्कूजन्नूपुरमेखला पार्श्वस्थाच्युतपादाब्जं श्रान्ता
धात्स्तनयोः शिवं १३ गोप्यो लब्ध्वाच्युतं कान्तं श्रिय एकान्तवल्लभं गृहीतकंठ्यस्तद्दोर्भ्यां गा
यन्त्यस्तं विजह्रिरे १४ कर्णोत्पलालकविटंककपोलघर्म वक्त्रश्रियो वलयनूपुरघोषवाद्यैः

गोप्यः समं भगवता ननृतुः स्वकेश

स्रस्तस्रजो भ्रमरगायकरासगोष्ठ्यां १५

कूजन्नूपुरा सा १३ एवमन्यासु प्रियो यथा यथार्थं नानाविभ्रमैः विजह्रिरे इत्याह गोप्य इति तत्र रास
संभ्रमदर्शायत्राह १४ कर्णोत्पलैश्चालकविटंकैश्चालकैः कपोलैश्च घर्मैश्च वक्त्रे श्रीः शोभा यासां
ताः वलयनूपुरघोषैर्वाद्यवादित्रैः स्वकेशेभ्यः स्रस्ताः स्रजो यासां ताः एते ते तालगानिसंनद्धाः केशाः
शिरः कंपपादे ... भ्रमरा एव गायका यस्यां रास
सभायां १५ ॥

श्री· भा· द· पू· टी· ११३

यथा गोप्यो नानाविधैर्भगवता सह विजह्रुः एवं श्रीभगवानेपि स्वविलासैस्ताभिः सह रेमे इत्याह एवमिति तद्विलासानामभ्युन्नतत्वेवर्णितौ दृष्टांतः यथार्भक इति स्वप्रतिबिंबविभ्रमः क्रीडायस्य स एव अनेनैतदर्शितं स्वयमेव सर्वकालाको प्राले सौगन्ध्यमाधुर्यलावण्यादिगुणास्तु संचार्य ताभिः सह रेमे यथार्भकः स्वप्रतिबिंबैरिति १९ तास्तु भगवद्विलासैराकुलाबभूवुरित्याह तस्यांगसंगेन प्रकृष्टा या मुत् प्रीतिस्तया आकुलानि अवशानि इंद्रियाणि यासां ताः विस्रस्त एव यान्केशादीन् अजस्र प्रतिव्योढुं यथापूर्वं धर्तुं नालं समर्था न बभूवुः विस्रस्ता माला आभरणानि च यासां ताः २० न केवलं ताएवाकुलेंद्रियाः किं तु देव्योपीत्याह हे कौरवेति किं च शशांकश्चन्द्रोपि विस्मितो बभूव गणैः ताराभिः सह सर्वेपि ग्रहाः

एवं परिष्वंगकराभिमर्शस्निग्धेक्षणोद्दामविलासहासैः रेमे रमेशो व्रजसुंदरीभि र्यथार्भकः स्वप्रतिबिंबविभ्रमः १९ तदंगसंगप्रमुदाकुलेंद्रियाः केशान्दुकूलं कुचपट्टिकां वा नांजः प्रतिव्योढुमलं व्रजस्त्रियो विस्रस्तमालाभरणाः कुरूद्वह २० कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः कामार्दिताः शशांकश्च सगणो विस्मितोभवत् २१ कृत्वा तावंतमात्मानं यावतीर्गोपयोषितः रेमे स भगवांस्ताभिरात्मारामोपि लीलया २२ तासामतिविहारेण श्रांतानां वदनानि सः प्रामृजत्करुणः प्रेम्णा शंतमेनांग पाणिना २३ ॥ ॥

ननु तन्नैव तस्य ननु स्त्रीणां तिरोधीवासः सर्वा विभ्रुयथा स्वं स्वं विजह्रुरिति अयं भावः कात्यायनि महामाये महायोगिन्यधीश्वरि नंदगोपसुतं देवि पतिं मे कुरु ते नम इति प्रत्येकं तासां प्रार्थनात् भगवतापि तावद्वारं तंसिद्धामयेमा रेस्यथ क्षपा इति नियेवशनिश्चतत्वात् तावंतमात्मानं कृत्वा रेमे इति यावतीर्याः वत्वः २२ कृपातिशयमाह तासामिति हे अंग शंतमेन सुखकरेण तनोतिराहः स्त्रीणां गोपीनां वदनान्यमार्जत् २३ ॥ ॥

राम· ११६

स्फुरन्नीस्वर्णाङ्कैरलानां चत्विषागडेष्वथाः श्रीः नयास्त्वपिनेना भूनापिन नहासससहितेन निरीक्षणेन ऋषभस्य
पत्युः श्रीहलसमानेरूपत्नः नत्कर्माणिजयतस्वकररुहैः नवैः स्पर्शेनप्रमोदो पासोना: २४ यस्य जलके
लिमाहृनाभिरिति त्वसायगसंगेनहृष्टामीत्वकु नस्याग्रतपवनासोऽकचकेकुमेनरंजिमायाः संबंधिभिर्गंध
र्वपालिभिः गंधर्वपत्नपङ्क्तिभिर्गायतोग्रेश्रलपः नैरन्तुरनः सहस्त्रोवाउदकमाविशत् भिन्नसेन्नविद्दारितवप्रः
स्वयंवानिक्रानिलोकवेदमर्यादाः २५ स्वरनिरान्मामोपिश्रुतंगोपीमण्डलेग्राभिसिवास्थलजलक्रीडदर्शी
नेवनक्रीडादर्शीयति २६ यमुनायाउपवनेजलस्थलप्रसूनामांगंधोयस्मिंस्तेनानिलेनजुष्टानि दशांतटानि

गोप्यः स्फुरत्स्फुरटकेडलकेनलत्विकुङ्कुमश्रियास्त्वपिनहासनिरीक्षणेन: मानेदपत्यः षभस्यजंगहृ
तानि: शुण्यानितत्कररुहस्पर्शप्रमोदाः २४ नाभिगुनः श्रमम्के हिनमेगसेगच्छष्टस्त्रजस्वकुचवि
केकुमरंजितायाः गंधर्वपालिभिरनुद्रुतस्याविशद्वाः श्रान्तोगजीभिरिभराडिवभिन्नसेतः २५ सो
भस्यलंयुवतिभिः परिषिच्यमानः प्रेम्णेक्षितः प्रहसतीभिरितस्ततोंग वैमानिकैः कुसुमवर्षिभिरी
ड्यमानोरेमेस्वयंस्वरतिरत्रगजेन्द्रलीलः २६ ततश्च कृष्णोपवनेजलस्थलप्रसूनगंधानलजुष्टदिक्त
टे चचारभृंगप्रमदागणावृतोयथामदच्युद्विरदः करेणुभिः २७ एवंशशांकांशुविराजितानि
शाः सत्यकामोनुरताबलागणः सिषेवआत्मन्यवरुद्धसौरतः सर्वाः शरत्काव्यकथारसाश्रयाः
२८ राजोवाच संस्थापनायधर्मस्यप्रशमायेतरस्य च अवतीर्णोहिभगवानंशेनजगदीश्वरः २९

नियमितवेगाः यद्वादिशस्तुतटंस्थलेवयस्मिन् वनेभृंगाणांप्रमदानांचगणेनावृतः २७ सक्रीडांनिगमयतिएव
मिति सत्यकामः सत्यसंकल्पः अनुरागिणीवरंवस्य: एवंसर्वानिशाः सेवितवान् शरत्काव्यकथारसाश्रयः श
रदिभवाः काव्येषुकथ्यमानापेरसाः तेषांग्राश्रयभूतानिशाः यद्वानिशाइत्येनयोगावाहिनीयाः शृंगाररसा
श्रयाः शरदिप्रसिद्धाः काव्येषुवर्ण्याः कथाःता: सिषेवेइतिएवमप्यात्मन्येवावरुद्धसौरतः चरमधातुः नत
स्खलितोयस्यातिकामतयोक्तिः २८ शनीयंप्रतिकूलमपर्मेमितार्थः आचरन्कृतवान् तत्रैवाधर्मेमाक्षेपलेकले

आप्तकामस्य नावधर्म इति चेत् यद्येवं कामाभावात् निंदितं केनाभिप्रायेण कृतवानिति पृच्छति सा
काम इति स काम इति ३१ परमेश्वरेऽकैवचनन्यायेन परिहर्त्तुं सामान्यतो महतीं हन्तमाह धर्मव्यतिक्रम इति
साहसं च दृष्टं प्रतापवतीं उ सोपि विश्वामित्रादीनां तस्य तेषां तेषां तेजस्विनां दोषाय न भवति नहि य ३२ य
दाचरति श्रेष्ठ इति येनान्योपि कुर्यादित्याशंक्याह ३३ नहि यद्यदाचरति श्रेष्ठ इति न्यायेनान्योपि कुर्यादि
त्याशंक्याह नैतदिति अनीश्वरो देहादिपरतन्त्रः यथाहे रुद्र इत्यतिरिक्तो विषं जक्षन् भक्षयन् कथं तर्हि
सदाचारस्य प्रामाण्यमत आह ईश्वराणामिति ३४ तेषां वचः सत्यमतस्तदुक्तमाचरेदेवाचरितं तु क्वचित् विरला
नत्वतः स्ववचोयुक्तं तेषां स्ववचसामायद्युक्तमविरुद्धं तदेवाचरेत् न च तर्हि तेषामपि किमेवं साहसमाचरन्तीत्यत आह
कुशलेति ३५ आरब्धकर्मक्षपणमात्रमेव तेषां कृतं नान्यदित्यर्थः प्रश्नमाह किमुतेति ३६ कुशलाकुश

आप्तकामो यदुपतिः कृतवान्वै जुगुप्सितम् किमभिप्राय एतन्नः संशयं छिन्धि सुव्रत ३१ श्रीशुक उवा
च धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ३२ नैतत्समा
चरेज्जातु मनसापि ह्यनीश्वरः विनश्यत्याचरन्मौढ्याद्यथारुद्रोब्धिजं विषम् ३३ ईश्वराणां वचः स
त्यं तथैवाचरितं क्वचित् तेषां यत्स्ववचोयुक्तं बुद्धिमांस्तत्समाचरेत् ३४ कुशलाचरितेनैषामि
ह स्वार्थो न विद्यते विपर्ययेण वानर्थो निरहंकारिणां प्रभो ३५ किमुताखिलसत्वानां तिर्यङ्मर्त्या
दिवौकसां ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ३६ यत्पादपंकजपरागनिषेवतृप्ता योग
प्रभावविधुताखिलकर्मबंधाः स्वैरं चरन्ति मुनयोपि न नह्यमानास्तस्येच्छयात्तवपुषः कुत एव बंधः
३७ गोपीनां तत्पतीनां च सर्वेषामेव देहिनां योन्तश्चरति सोध्यक्षः क्रीडनेनेह देहभाक् ३८ श्रीशु

लान्वयो न विद्यते इति किं पुनर्वक्तव्यमित्यर्थः एतदेव स्फुटयति ३७ यत्पादपंकजपरागनिषेवणेन तृप्ताः
पद्मायस्य पादपंकजपरागनिषेवायेषां तेन तथा तेन तृप्ताः भक्ता इत्यर्थः तथा तत्तेनिश्चलं न नह्यमानाः बंध
नं प्राप्नुवन्तः ३८ परदारत्वं गोपीनां संगीकृत्य परिहृतं इदानीं श्रीभगवतः सर्वान्तर्यामिनः परसेवानाम काचिदि

शृंगाररसाकृष्टचेतनः अतिबहिर्मुखानपि स्वपरान् कर्त्तुमिति भावः ननु अन्येऽपि अन्त्राचाराः स्वचेष्टितमेव वेत्ति वदन्ति नचाहं नास्त्यपश्यन्निति ३५ एवंभूतैः स्वधीभावेन यथा कुर्वतः पापाशेयाइत्यर्थः ३६ ब्रह्मरात्रे ब्राह्मे मुहूर्ते उपावृत्ते प्राप्ते ३८ भगवतः कामविजयरूपरासक्रीडाश्रवणादेः कामजयफलमाह विक्रीडितमिति श्रद्धयेत्यादि धीरः सन् हृद्रोगं कामम् आशु अपिहिनोति त्यजतीति ३९ सेयं श्रीपरमानन्दसेविश्रीधरनिर्मिता श्रीभागवतभावार्थदीपिका दशमाश्रया इति श्रीभावार्थदीपिकायां दशमस्कन्धे त्रयस्त्रिंशोऽध्यायः ३३ चन्द्रिकाशाहिनाग्रस्तं नन्दं हरिरमोच

अनुग्रहाय भक्तानां मानुषं देहमाश्रितः भजते तादृशीः क्रीडाः याः श्रुत्वा तत्परो भवेत् ३६ नासूयन् खलु कृष्णाय मोहितास्तस्य मायया मन्यमानाः स्वपार्श्वस्थान् स्वान्स्वान्दारान्व्रजौकसः ३७ ब्रह्मरात्र उपावृत्ते वासुदेवानुमोदिताः अनिच्छन्त्यो ययुर्गोप्यः स्वगृहान्भगवत्प्रियाः ३८ विक्रीडितं व्रजवधूभिरिदं च विष्णोः श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद्यः भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ३९ इति श्रीभागवते दशमस्कन्धे रासक्रीडानाम त्रयस्त्रिंशः ३३ श्रीशुक उवाच एकदा देवयात्रायां गोपाला जातकौतुकाः अनोभिरनडुद्युक्तैः प्रययुस्तेऽम्बिकावनं १ तत्र स्नात्वा सरस्वत्यां देवं पशुपतिं विभुं आनर्चुरर्हणैर्भक्त्या देवीं च नृपतेऽम्बिकां २ गावो हिरण्यं वासांसि मधु मध्वन्नमादृताः ब्राह्मणेभ्यो ददुः सर्वे देवो नः प्रीयतामिति ३ ऊषुः सरस्वतीतीरे जलं प्राश्य धृतव्रताः रजनीं तां महाभागा नन्दसुनन्दकादयः ४ कश्चिन्महानहिस्तस्मिन्विपिनेऽतिबुभुक्षितः यदृच्छयागतो नन्दं शयानमुरगोऽग्रसीत् ५ स चुक्रोशाहिना ग्रस्तः कृष्ण कृष्ण महा

पत् विद्याधरवादिरः शापात्सर्पत्वं प्राप्तं यथावर्णयत् तस्यापदेशतः कामं किंकरीकृतकामतः अत्र शङ्का त्वशनिन्येन यथा विद्याधरस्यापि नन्देवंकामनुग्रहस्तवेन कामविजयं प्रतिपादनत्वेव विद्याधरस्यापि विजयं प्रतिपादयितुं दर्शयति एकदेति गावः गाः मधु मधुरं सधृतं मधुना सहितमन्नं देवाः पशुपतिः ३ जलमात्रं प्राश्य धृतव्रताः उपोषिताः रात्रिं प्रान्ते ऊषुरन्वयसन् ४ महानहिः अजगरः उरगः उरसा गच्छतीति अनुलाप

विव्यधुः ताडयामासुः उल्मुकैः ज्वलत्काष्ठैः ७ अलातैस्तैरिव ८ विद्याधरैरर्चितं पूजितं ९ यः परया
लक्ष्म्या शोभते स भवान्कः इति ११ प्राहसम् उपहासितवान् तस्मिन्प्रलब्धैः उपहसितैः मदीयेनैव पापेन मिन्नेन

तस्य चाक्रन्दितं श्रुत्वा गोपालाः सहसोत्थिताः ग्रस्तं च दृष्ट्वा विभ्रान्ताः सर्पं विव्यधुरुल्मुकैः ७
अलातैर्दह्यमानोऽपि नामुञ्चत्तमुरङ्गमः तमस्पृशत्पदाभ्येत्य भगवान्सात्वतां पतिः ८ स वै भगव
तः श्रीमत्पादस्पर्शहताशुभः भेजे सर्पवपुर्हित्वा रूपं विद्याधरार्चितं ९ तमपृच्छद्धृषीकेशः प्र
णतं समवस्थितं दीप्यमानेन वपुषा पुरुषं हेममालिनं १० को भवान्परया लक्ष्म्या रोचतेऽद्भुतद
र्शनः कथं जुगुप्सितामेतां गतिं वा प्रापितोऽवशः ११ सर्प उवाच अहं विद्याधरः कश्चित्सुदर्शन
इति श्रुतः श्रिया स्वरूपसंपत्त्या विमानेनाचरं दिशः १२ ऋषीन्विरूपाङ्गिरसः प्राहसं रूपदर्पितः
तैरिमां प्रापितो योनिं प्रलब्धैः स्वेन पाप्मना १३ शापो मेऽनुग्रहायैव कृतस्तैः करुणात्मभिः यदहं लो
कगुरुणा पादस्पृष्टो हताशुभः १४ तं त्वाहं भवभीतानां प्रपन्नानां भयापहं आपृच्छे शापनि
र्मुक्तः पादस्पर्शादमीवहन् १५ प्रपन्नोऽस्मि महायोगिन्महापुरुष सत्पते अनुजानीहि मां देव स
र्वलोकेश्वरेश्वर १६ ब्रह्मदण्डाद्विमुक्तोऽहं सद्यस्तेऽच्युत दर्शनात् यन्नाम गृह्णन्नखिलाञ्छ्रोतॄ
न्नात्मानमेव च १७ सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते १८ इत्यनुज्ञाप्य दाशार्हं परिक्र
म्याभिवन्द्य च सुदर्शनो दिवं यातः कृच्छ्रान्नन्दश्च मोचितः १९ निशाम्य कृष्णस्य तदात्मवैभवं व्रजौ
कसो विस्मितचेतसस्तथा समाप्य तस्मिन्नियमं पुनर्व्रजं गोपाययुस्तत्कथयन्त आदृता २० अ
हिदेहं निमेषेणाय [illegible] स्वदर्शने नदद्भुन्मादिते कालः शोकविह्वरमताउयन् २१ कदाचिदथगो
विन्दो रामश्चाद्भुतदर्शनः विजह्रतुर्वने रात्र्यां मध्यगौ व्रजयोषितां २२

१ यतः शापात् लोकगुरुणा त्रैलोक्यनाथेन १४ आपृच्छे स्वलोकं गन्तुं संभाषयामि अमीवहन् दुःखना
शक १५ नत्वा समागमाह कदाचिदिति २१ ॥ ॥

विरमसीनिर्मलेगुंवरेयथासो २२ किंचनियायप्रवेशेमानयंनोउदितः उडुपः नारकाम्बुयस्मिंस्तत् मल्लिका
गंधेनमत्तायालयोयस्मिंस्तत् २३ प्रनिवद्धतारुन्यैर्गुणपत्नाल्पयिनमश्वकामयिनोस्वरमंडलमूर्छितेनगुण
पतलायंनोमनः श्रवणयोर्मंगलेयथाभवतितथाजगतः श्रागायतामिति २४ मूर्छितनाः नद्दीनलीवविन्नाः
स्रंसन् भ्रंशत् दुकूलेयस्मात्तमात्मानंदृहस्तलाः केशेभ्यः स्रजोयस्य देहस्यतंज्ञनतोनाविदन् २५ निर
रोहितोनिरीक्षमानास्यः नौनाग्रोयस्यतंकालयामाससहृवान्तेरयामास २६ गाइवसेगनाहस्मनावाक्षेण

उपगीयमानोललितंस्त्रीजनैर्वद्धसौहृदैः स्वलंकृतानुलिप्तांगोस्रग्विनोविरजोवरो २२ नि
शाम्यत्रामानयनानुदितोडुपतारकं मल्लिकागंधमत्तालिजुष्टंकुमुदवायुना २३ जगतुः सर्व
भूतानांमनःश्रवणमंगलं नौकल्पयन्तोयुगपत्स्वरमंडलमूर्छितं २४ गोप्यस्तद्गीतमाकर्ण्य
मूर्छितानाविदन्नृप स्रंसद्दुकूलमात्मानंस्रस्तकेशस्रजंततः २५ एवंविक्रीडतोः स्वैरंगायतो
तौःसंप्रमत्तवत् शंखचूडइतिख्यातोधनदानुचरोभ्यगात् २६ तयोर्निरीक्षतोराजंस्तन्नाथंप्रमदा
जनं क्रोशंतंकालयामासदिश्युदीच्यामशंकितः २७ क्रोशंतंकृष्णरामेतिविलोक्यस्वपरिग्र
हं यथागादस्युनाग्रस्ताभ्रातराववधावतां २८ माभैष्टेत्यभयारावौमालकौमौनरस्विनो या
सेदतःसतरसातावनिजगत्हकाथमे २९ संवीक्ष्यताअवनुपत्नौकालमृत्युइवोद्विजन् विसृज्यस्त्रीजनं
नमूढःप्राद्रवज्जीवितेच्छया ३० तमन्वधावद्गोविंदोयत्रयत्रसधावति जिहीर्षुस्तच्छिरोरत्नंतस्थौ
रक्षन्स्त्रियोबलः ३१ अविदूरइवाभ्येत्यशिरस्तस्यदुरात्मनः जहारमुष्टिनैवांगसहचूडामणिंविभुः
शंखचूडंनिहत्यैवंमणिमादायभास्वरं अग्रजायाददात्प्रीत्यापश्यन्तीनांचयोषितां ३२ इतिश्री

मञ्जुलवेणुवेनसः कृष्णलीलाया
यथानिजमन्दिरंवनवासरान् १।।

पाद नेदशमेवनसिंशः ३४
शुकउवाच गोप्यः कृष्णेवनंयातेन

२७ निरीक्षितोनिरी माभैष्टेत्यभयंमाभूतवनदत्यभयरावौ २८ शिरसासहचूडामणिंजहारेत्यर्थः ३२ इ
निश्रीभागवतेदशमेवनसिंशः ३४ पंचत्रिंशेवनेयातेकृष्णेगोकुलयोषितः पुनःश्लोकाभियोगेनतिस्र
ईःखेनवासरान् एवंगाद्भिरुक्षीणकृष्णेनसैरमभिरमेनानोदिवो नहिपादहृतानामउगीतेवानिस्ताप्रकारमाहगो।

पाइति वामबाहुकृतवामकपोल इत्यादीनि विहारदशश्लोकानि १

श्री· भा· द· पू· टी· ११८

वामेवाहौनन्मूलेवाहूनोर्पितोवामकपोलोयेनसः विलनेनर्तिते भ्रवोयेनसः वलानभ्रुःसुऊंदः अधरेत्रा
र्पितेवेणुं कोमलांगुलीभिराश्रितोमार्गः समक्षिकाप्तियेनसः यत्रदाईरयतिवादयतिनदा २ व्योमयाना
नोसिद्धानोवनिताःसिद्धैःस्वपतिभिः सहवर्तमानाश्रपितहेलवरगुपधार्याकर्ण्यप्रथमेविस्मितविन्नाः ततः
तःकाममार्गणेभ्यः समर्पितानिविन्नानियाभिःताःश्ररवशाइत्यर्थः सलज्जाःसमाःकश्मलेईहेयगुःनवलिं
गमपस्मृताविस्मृतानीवीयाभिरिति अत्रैवंभूतस्यविरहेकथंमहामहेइतिसर्वत्रवाक्यशेषः ३ हन्तेतिसंबो
धनेहेअबलाः इदंविचित्रमाश्चर्यंश्रृणुतनहाराहासः हारवहिषदोहासोयस्यसः यदावेणुंवाद्येनाथावदनेनहसे
नः हारेषु'' यद्वाहासोयस्यहारवत्‌ शोभमानोवक्षसिहासोयस्यपक्षाहाराणांहासाइवविषयास्फूर्तियस्यसः
तस्मिन्विनिवाउरसिस्थितविद्युदिवलक्ष्मीयस्यसः यर्हियदाकूजितवेणुंवादितिवेणुभवेति नदेतिनदा

गोप्यऊचुः वामबाहुकृतवामकपोलोवलितभ्रुरधरार्पितवेणुं कोमलांगुलिभिराश्रितमा
र्गोगोप्यईरयतियत्रमुकुंदः २ व्योमयानवनिताःसहसिद्धैर्विस्मितास्तदुपधार्यसलज्जाः काम
मार्गणसमर्पितचित्ताःकश्मलंययुरपस्मृतनीव्यः ३ हन्तचित्रमबलाःशृणुतेदंहारहासउप ८
रसिस्थितविद्युत्‌ नंदसूनुरयमार्तजनानांनर्मदोयर्हिकूजितवेणुः ४ वृंदशोव्रजवृषामृगगा
गावोवेणुवाद्यहृतचेतसआरात्‌ दंतदष्टकवलाधृतकर्णानिद्रितालिखितचित्रमिवासन्‌
५ बर्हिणस्तवकधातुपलाशैर्बद्धमल्लपरिबर्हविडंबः कर्हिचित्सबलआलिसगोपैःगाःसमा

व्रजेवेवृषाः मृगावास्तुवेणुंवाद्येनहृतानिचेतांसियेषांते आरातदूरादेवदंतैःदष्टाःकवलाग्रासो येर्धृता
उन्नैविनाःकर्णाः येतेनिद्रिताइवालिखितचित्रमिवासन्‌ अविद्यमानेतरव्यापाराआसन्नित्यर्थः किं
वाचेतनास्तुसरित्सुतस्तरतीविचित्रमित्याहुः ५ हेआलिबर्हिणस्यमयूरस्यपेस्तवकाःमयूरपिच्छाः धातवोधा
तवादयस्तुपलाशानिपत्रैर्बद्धोयोमल्लानांपरिबर्हःपरिकरः वेषंविडंबयति अनुकरोतीतितथासमुकुंदः
गोपैःसहवेणुनेतितृप्यरंतत्रमहापित्तानवीयत्रयत्रायः समाह्वयतितर्हितदातश्रवणा दोषिविनासजा

राम: ११८

स्याविरेषु पतितिचिरह्वरुपनइत्याहुः वनलतेति नदाप्रगतानाःभारेणविद्वधः शाखावनलताजीलेतालता
लसितान्विसेषकाणमाने स्त्रवयेन्त इवमधुधाराः सम्स्त्रः सेति विस्मयेनरवस्तुनघानित्यमीनासरितधौ
वानंदइतिभावः पतानिविलसिभक्तिलक्षणाति ८ किंचसमासिकमलवनेषु विरहहरनोपलितेणगुणार
कर्षणेनन्हीनेपुनरन्येषामित्याहुः दर्शनीयतिलकइति ९ दर्शनीयस्तिलकोयस्य दर्शनीयानां पुरुषा
णांमध्येतिलकइतिवावनमालास्तयादियगंध्यातुलसीतस्यामधुनामत्तैरलिकुलैरलघुउच्चैरभीक्ष्णमनुक्
लगीतमाहियत् आदरेणगृह्णात् यहिअपरेसंधितवेणुर्भवति ९ सरसीतितनाहियसारसाहंसाश्चन्येव

नहि भ्रमरगणयःसरितोवैयत्त्वदांबुजरजोतिलतीर्थे स्वहृदयेन्याव्ययमिवाबद्धपुलकाःप्रेमवेपि ९
तभुजाःनाःस्तिमितापः २ अत्रचरैःसमतवतितवीर्यग्रादिपुरुषइवाचलभूतिः वनचरोगिः
रितरेषुवरंतीवेणुनाहूयतिगाःस्वयदाहि वनलतास्तरवआत्मनिविलसयंजयन्त्यइवपुष्पफ
लाढ्याः प्रणतभारविटपामधुधाराःप्रमहृष्टतनवःससृःवस्म ४ दर्शनीयतिलकोवनमा
लादिव्यगंधतुलसीमधुमत्तैः अलिकुलैरलघुगीतमभीष्टमाद्रियन्यर्हिसंधितवेणुः ९ सरसि
सारसहंसविहंगाश्चारुगीतहृतचेतसएत्य हरिमुपासततयतविजाहेनमीलितदृशोधृत
मौनाः ११ सहवलःस्रगवतंसविलासःसानुषुक्षितिभृतेव्रजदेव्यः हर्षयन्यर्हिवेणुरवेणजा

विहगाः चारुगीतेनहृतचेतसः एत्यतच्चागत्यहरिमुपासतअभजंततत्समीपेउपविविश्वीहंतेतिविष
दिमेचोक्षिहरिं ववनइत्याहुः सहवलेति ११ भोव्रजदेव्योगोप्यः महवलः सरामः कृतस्रगभिनिर्मिता
भ्यामवतंसाभ्यांकर्णभूषणाभ्यां विलासोयस्यपदाशुनापलस्रगापीडेनविलासोयस्येति क्षितिभृतःसा
नुषुगिरितरेषुवर्तमानः स्वयंजाता हर्षाविस्म हर्षयन्यदवेणुरवेण उपरिभितितिनाइतिनादीनाहूयती
त्यर्थः १२ महदितित्रदामेघः महतः श्रीकृष्णस्यातिक्रमेणाशकितचेतोयस्मः नपुनरन्योयातितोम्बोगर्जे
तिकिंतनतैवस्थितः सन्वेणुरवमनुसदेमेद्गर्जतीति किंचसुहृदं विश्वातिहरितासाम्यान्समस्तःसः
तत्समनोभिरभ्यवर्षत आटपत्रवैः क्रियमाणोप्यवर्षमेववल्पायित्वानंतघारोवाजुस्समनयावल्पितःसप

श्रीः
भा० द०
पू० टी०
१५०

हृसति यशोदे नवसुतो नानागोपक्रीडासु निपुणो वेणुवाद्ये निजविषयनिसेवशिक्षा यास्ता नाः स्वान्ते
वासिनाः तत्वन्यतः स्मृत्वा इत्यर्थः स्वरजातीरिति षाड्जर्षभादिस्वरालापभेदाननयत् उन्नीतवान् १३ ना
म्नः स्वरजातीः सवनशः मंद्रमध्यतारभेदेन यतो गीतध्वनिरागतः ततश्रानतकंधराचित्तं च येषां ते उपधा
र्यमस्य गाकल्पकवयः केचिद्विदाश्चपि तेनानिश्चितं तत्वं तद्देवार्थः नैकेवलं कश्मलं मोहं ययुरिति यस्मा
केन तत्वं निजमोहं किं चेमहत्याहुः निजपदाब्जदलैरिति १४ नयनस्पष्टा एतस्य वेणोरवेणवादिनानिश्चय

महदतिक्रमशंकितचेतनामंदमंदमनुगर्जति मेघः सुहृदमभ्यवर्षत्सुमनोभिः छायया च वि
दधत्प्रतपत्रं विविधगोपचरणेषु विदग्धो वेणुवाद्य उरुधा निजशिक्षाः तव सुतः सति यदाधर
बिंबे दत्तवेणुरनयत्स्वरजातीः १३ सवनशस्तदुपधार्य सुरेशाः शक्रशर्वपरमेष्ठिपुरोगाः कव
य आनतकंधरचित्ताः कश्मलं ययुरनिश्चिततत्वाः १४ निजपदाब्जदलैर्ध्वजवज्रनीरजांकुशवि
चित्रललामैः व्रजभुवः शमयन्खुरतोदं वर्ष्मधुर्यगतिरीडितवेणुः १५ व्रजति तेन वयं सवि
लास वीक्षणार्पितमनोभववेगाः कुजगतिं गमिता न विदामः कश्मलेन कवरं वसनं वा १६ मणि
धरः क्वचिदागणयन्गाः मालया दयितगंधतुलस्याः प्रणयिनोनुचरस्य कदा `` ` प्रक्षिपन्भु
जमगायत यत्र १७ क्वणितवेणुरववंचितचित्ताः कृष्णमन्वसत कृष्णगृहिण्यः गुणगणार्णम
नुगत्य हरिण्यो गोपिका इव विमुक्तगृहाशाः १८ कुंददामकृतकौतुकवेषो गोपगोधनवृतो य
यमुनायां नंदसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार १९ ॥

हृतानि चित्तानि यासां ताः कृष्णस्य हरिणस्य हरिण्यो गृहिण्यो भार्याः गुणगणार्णं गुणगणसमुद्रं कृष्णम
नुगत्य प्राप्य कृष्णमेवान्वसत अनु आसत न्यवर्तन्तेत्यर्थः कुतः यतो विमुक्ता गृहाशा याभिस्ताः गोपिका इव
ता अपि एवमेवान्वासतेति नन्दकुंददामकृतेत्यत्र शेषक्रीडितं मध्यामौलो गोधनानि परावृत्य यमुनायां
क्रीडितं तस्य सौभाग्यं तत्र वर्णयन्ति कुंदेति १९ ॥ ॥ ॥

रामः
१५०

गोपीनां मुखवाद्यं तद्दर्शनाभिः कृतः कोन वंशीको त्ववचेनवंशोलंकारायेनसः हे अवनयेयशोदे नववत्साः वृषभं

दरूतः कृत्सः यदासहसेववद्यः कथयेत्पः कश्चित्नववत्सइति कश्चिद्वनेदरूतरिनिबाद्धः नमंदः हर्ष

यत्याहि विजहार क्रीडितिस्म नदामलयजस्यचंदनस्येवस्पर्शिभिः शीतलैर्वायुः स्पर्शेनेन कृत्समानयन

यथानुकूलं यथाभवतितथाउपवाति वीजयति यद्वामलयमोदहिणवायुः यद्वामलनस्पृक्तत्वेमस्त्वागेनलि

नः मस्पर्शेनमानयतिति किंचवंदिनः स्तावकाः संतः देवगणागंधर्वादिगणाः वाद्यगीतपुष्पवर्षादिभिःपरि

वव्रुः पर्युपासत यांपतंनीलोकाहर्षात्पः परस्परस्तुवुः २० व्रजस्य गवां च यद्वा व्रजे गवांमव्

वंद्यमानामस्माकमित्यर्थः वत्सलाहिंत कृतक्रतः यस्मादगधः शंगोवर्धनमयनीनिगोवर्धनोद्धरण व

मंदवायुरुपवात्यनुकूलं मानयन्मलयजस्पर्शेन वंदिनस्तमुपदेवगणा ये वाद्यगीतबलिभिः प

रिवव्रुः २० वत्सलो व्रजगवां यदगध्रो वंद्यमानचरणः पथि वृद्धैः कृत्स्नगोधनमुपोह्य दिनान्ते गी

तवेणुरनुगेडितकीर्तिः २१ उत्सवं श्रमरुचापि दृशीनामुन्नयन्खुररजश्छुरितस्रक् दित्सयैति

सुहृदाशिष एष देवकीजठरभूरुडुराजः २२ मदविघूर्णितलोचन ईषन्मानदः स्वसुहृदां

वनमाली बदरपाण्डुवदनो मृदुगण्डं मण्डयन्कनककुण्डललक्ष्म्या २३ यदुपतिर्द्विरदराजविहा

रो यामिनीपतिरिवैष दिनान्ते मुदितवक्त्र उपयाति दुरन्तं मोचयन्व्रजगवां दिनतापं २४ ॥

दुःशोरद्दणस्योपलक्षणमेतत् वृद्धैर्ब्रह्मादिभिः सर्वैः पथिवंद्यमानचरणाइत्यर्थः सायंशीघ्रमायांतगोधू

यथुपोह्य एकीकृत्यगीतयश्चावेणुर्यस्यसः २१ श्रमयुक्तयापिकांत्यानेत्राणांहर्षमुन्नयन् उच्चैःप्रापयन्

खुररजोभिर्व्याप्ताः स्रजोयस्यसः सुहृदमस्माकमाशिषो मनोरथस्यादित्सयादातुमिच्छयादेवकाजठरे

भवतीतितथासउडुराजश्चंद्रः निर्हृतितत्वेनसएषएवेति २२ अतिसंभ्रमेणकाश्चित्समीपमायांतंकृष्णं

ति वदरस्येवपांडुवदनः ईषत्पक्वबदरवत्पांडुरंवदनंयस्यसः अतएवमृदुःकनककुंडलयोर्लक्ष्म्याकांत्यामृदुगंडोय

शेतिकोमलगंडस्थलंवाशोभयन्निति २३ यदुपतिरितिदेवकीजठरभूरितिवृष्णिवंशसद्देवस्य कौचित्या

नत्वंवात्स्यन नवामजहहतिगीवाकथप्रसिद्धोनं यद्वासाक्षादेवयिवान्सान्वतोनुकूलइतिवेन सान्वाका

श्री॰
भा॰ द॰
टी॰ टी॰
११८

विहरंतीतिपर्जेरुगातिः वेरुवत्सस्मवक्त्रः व्रजंगत्वामस्माकमनेनदिनतापेवशमयनुपयानीति २४ प
वंविरहदुःखेनापिश्रुत्रकृष्णलीलापवमार्यत्वनस्मिंश्चिंतचेननागीविनंयासेनाः नास्मिन्नेवमनः संकल्प
रूपंयासानः अहोमहात्तदयः उत्सवोयासांताः अहरसुपरमिति २५ इतिश्रीभावार्थेदशमेपंचत्रिंशः
षट्त्रिंशेनहनेरिष्टेनारदोक्तावलाच्युतो वसुदेवसुतोत्तात्वाकंसोक्रूरसमादिशत् गोपीनांसंतरणायानाश
खेहरैनिहत्यसः अहन् गोपीमहारंदासहेतुरुमरिष्टके पवेरवांगवर्वादिगीतहस्तवायेतुमवर्षादिभिः
शुकउवाच एवंव्रजस्त्रियोराजनकृष्णलीलानुगायतीः रेमिरेहस्सुतच्चित्तास्तन्मनस्कामहो
दयाः २५ इतिश्रीभागवतेदशमेपंचत्रिंशोध्यायः शुकउवाच अथतर्ह्यागतोगोष्ठमरिष्टो
वृषभासुरः महीमहाककुत्कायः कंपयन्खुरविक्षितां १ रंभमाणःखरतरंपदाचविलिखन्म
हीं उद्यम्यपुच्छंवप्राणिविषाणाग्रेणचोद्धरन् २ किंचित्किंचिच्छकृन्मुंचन्मूत्रयन्स्तब्ध
लोचनः यस्यनिर्ह्रादितेनांगनिष्ठुरेणगवांनृणाम् ३ पतंत्यकालतोगर्भाःस्रवंतिस्मभ
येनवैः निर्विशंतिघनायस्यककुद्यचलशंकया ४ तंतीक्ष्णशृंगमुद्वीक्ष्यगोप्योगोपाश्च
त्रत्रसुः पशवोदुद्रुवुर्भीताराजन्संत्यज्यगोकुलं ५ कृष्णकृष्णेतितेसर्वेगोविंदंशरणंय
युः भगवानपितद्वीक्ष्यगोकुलंभयविह्वलम् ६ माभैष्टेतिगिराश्वास्यवृषासुरमुपाह्वयत्
गोपालैःपशुभिर्मंदत्रासितैःकिमसत्तम ७ मयिशास्तरिदुष्टानांत्वद्विधानांदुरात्मनां इत्यास्फो
कृत्याच्युतोरिष्टं व्रजस्यपरमोत्सवेवर्तमानेनदिरत्नाथानंतराथिकारार्थमथशब्दः नहिनदावृषभाकृतिरा
सुरः तनुत्रायति सायंत्रयेणमहानोककुत्कायोयस्यसः ककुदैर्विदारितामहींकंपयन् १ रंभमाणःवृषभ
जातिशब्दंकुर्वन् विलिखन्विदारयन् उद्यम्यऊर्ध्वंकृत्वावप्राणितटान् उत्क्षिपन् २ किंचित्किंचिदेव
क्रमेणमर्योदीयत्पुरीषंमुंचन् तथामूत्रमुत्सृजन् स्तब्धलोचनः अनिमिषलोचनः यस्यध्वनिनानांगनया
णांगवांच ३ आचतर्थाभवेत्स्राव:पातःपंचमषष्ठयोः अतःऊर्ध्वंप्रसूतिःस्यादितिगर्भस्यविभागःकी
र्तितइतिभागः ककुदिगलदुष्टशृंगे ४ कृष्णकृष्णरक्षेति ६ ७ ८ ९ ॥ ॥ ॥

राम
११८

इत्येवं वदन् कृष्णलेनाम्फोट्य वक्त्रममाह इत्यनेनैव लशाल्विनकीर्तितइति भावः कद्रूपयन् भुजाभोगेसंप
च भोगः सर्पदेहः सर्पदेहाकारं भुजगमित्यर्थः साध्वसं त्वयेति भयाभावोदर्शितः स्वयमव्याप्तः ह
रणीनिहरिः ६ उपतत्कृष्णं गत्वा पुच्छेनप्रेमनामेवायस्मिन् ७ अग्रेन्यस्तविषाणाग्रेयेन सः ग्रस्तकृकलो
लोचनेयस्य सः कराग्निपकटो वक्त्रेणनिरीक्षन् निरीक्ष ८ अन्ययोवाप्यशनिलोमव्यस्यजन ९ अपविद्धःप्र
पतितः अपनन् अर्दयन् विषाणानि ग्वेदपुच्छानिसर्वांगानि यस्य सः क्रोधमूर्छितः क्रोधेनव्याप्तः हत्वाविषा

णोपेवं कृष्णोनारिष्टः पुरैणावनि शृङ्गोप्रेषु उपसृक्कभमन्यवः क्रुद्धः कृष्णसुपाद्रवत् १० अग्रे
न्यस्तविषाणाग्रः स्तब्धासृग्लोचनोऽच्युतं कटाक्षिप्याद्रवत्तूर्णमिंद्रमुक्तोऽशनिर्यथा ११ गृहीत्वा
शृङ्गयोस्तं वा अष्टादशपदानि सः प्रत्यपोवाह भगवान् गजः प्रतिगजंयथा १२ सोपविद्धो भगवता पु
नरुत्थाय सत्वरः आपतन् स्विन्नसर्वांगो निःश्वसन्क्रोधमूर्छितः १३ तमापतंतं स निगृह्य शृङ्गयोः
पदासमाक्रम्य निपात्य भूतले निपीडयामास यथार्द्रमंबरं कृत्वा विषाणेन जघान सोपतत् १४ अ
सृग्वमन्मूत्रशकृत्समुत्सृजन्क्षिपंश्च पादाननवस्थितेक्षणः जगाम कृच्छ्रं निर्ऋतेरथ क्षयं
पुष्पैः किरंतो हरिमीडिरे सुराः १५ एवं कुकुद्मिनं हत्वा स्तूयमानः स्वजातिभिः विवेश गोष्ठं सबलो
गोपीनां नयनोत्सवः १६ अरिष्टे निहते गोष्ठे कृष्णेनाद्भुतकर्मणा कंसायाहाथ भगवान्नारदो देव
दर्शनः १७ यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च रामं च रोहिणीपुत्रं वसुदेवेन बिभ्यता १८

णभुक्त्वात्र नैनैव जघान सोपतत् १४ असृगित्यादि शकृत् पुरीषं पादान् क्षिपन् नत्वभयं सग्लानिमित्यर्थः परि
क्षिपन् इतस्ततश्चालयन् अनवस्थितेक्षणः चालितनेत्रः कृच्छ्रं कष्टं जगाम निर्ऋतेरथ निर्ऋतेः ल्यपति वास
जगाम कृच्छ्रभवनितयामृत इति वा १५ नयनोत्सवः कामेभज्जेवसनं कृष्णेनेनानेनाप्युनत्सहति नारदः
स्मारयामास कंसे दवनागिरेव च नदाहप्रसिद्धमिति १६ देवदर्शनो देवर्षिः यत्ता कथितं पूर्वं भविष्यतीति साक्षा
देवदर्शनं यस्य सः श्राममेव तु नारदेनोक्तमाह १७ यशोदाया इति देवक्यां प्रसूतत्वेन प्रसिद्धां कन्यां यशोदायाः सु
तामाह यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह यदानेदसूनं तेनप्रसिद्धं रामं वसुदेव

श्री॰ भा॰ द॰ टी॰ ११४

निवारित इति २० हत्वैव सुदेवं पलायेतां अतो वध्यतामिति निर्मत्रं वदता नारदेन निवारित इति २१ मह्यं मे मन्नि
र्शितः विधात्रा नारदेन वचनेन तं गतश्च यतो नावाह भवद्भ्यामिति २२ मंचा उच्चा गस्तंभादिरचितस्थानानि २६ शु
हिनौ श्रातृ २७ मीढुषे वरदाय २८ अर्थतंत्रज्ञः अर्थसिद्धान्तमेव स्ता नानातीति २९ दानपते श्रेष्ठ अक्रूर मे मैत्रं

निशम्य तद्भोजपतिः कोपात्प्रचलितेंद्रियः निशातमसिमादत्त वसुदेवजिघांसया २० निवारितो
नारदेन तत्सुतौ मृत्युमात्मनः ज्ञात्वा लोहमयैः पाशैर्बबंध सह भार्यया २१ प्रतियाते तु देवर्षौ कंस आ
भाष्य केशिनम् प्रेषयामास हन्येतां भवता राममाधवौ २२ ततो मुष्टिकचाणूरशलतोशलका
दिकान् अमात्यान् हस्तिपांश्चैव समाहूयाह भोजराट् २३ भो भो निशम्यतामेतद्वीरचाणूरमुष्टि
कौ नंदव्रजे किलासाते सुतावानकदुंदुभेः २४ रामकृष्णौ ततो मह्यं मृत्युः किल निदर्शितः
भवद्भ्यामिह संप्राप्तौ हन्येतां मल्ललीलया २५ मंचाः क्रियंतां विविधा मल्लरंगपरिश्रिताः पौरा जा
नपदाः सर्वे पश्यंतु स्वैरसंयुगे २६ महामात्र त्वया भद्र रंगद्वार्युपनीयतां द्विपः कुवलयापीडो ज
हि तेन ममाहितौ २७ आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधि विशसंतु पशून्मेध्यान्भूतरा
जाय मीढुषे २८ इत्याज्ञाप्यार्थतंत्रज्ञ आहूय यदुपुंगवं गृहीत्वा पाणिना पाणिं ततोऽक्रूरमु
वाच ह २९ भो भो दानपते मह्यं क्रियतां मैत्रमादृतः नान्यस्त्वत्तो हिततमो विद्यते भोजवृष्णिषु
३० अतस्त्वामाश्रितः सौम्य कार्यगौरवसाधनं यथेंद्रो विष्णुमाश्रित्य स्वार्थमध्यगमद्विभुः ३१ ग
च्छ नंदव्रजं तत्र सुतावानकदुंदुभेः आसाते ताविहानेन रथेनानय मा चिरं ३२ निसृष्टः किल मे
मृत्युर्देवैर्वैकुंठसंश्रयैः तावानय समं गोपैर्नंदाद्यैः सा
भ्युपायनैः ३३

हतांस्त्वया क्रियतां तत्वतोऽन्यथा हतः सारदः हितनम स्वनविघ इति ३० स्वार्थं हरवधादिज्ञादिरात्यं
३१ अनेनाति मनोहर रथेन शीघ्रगामिना ३२ मे मे मृत्युर्जनितः सष्ट वैकुंठसंश्रयैर्विष्णुसंश्रयैर्देवैः ततः किं त
दाहृत्या नयिष्य इति ३३ कालकल्पेन मृत्युतुल्येन वैद्युतोपमैः शानितल्पैः ३४ ॥ ॥

राम॰ ११४

कालकल्पेन मृत्युतुल्येन वैद्यनोपमैर शान्तिमत्यै: ३४ इहैव निनननस्त्वस्वस्ति ३५ मनीषितं विचारितं सद्रूपा
कु. स्वावद्यमार्जनं नेमार्जनं नयाप्येनावानभिनिवेशेन कार्य इति भविष्यतः स्वयम् आह सिद्ध्यसिद्ध्योरिति पुरुषका
रस्य सव्यभिचारितामाह मनोरथानिति ४० इति श्रीभावार्थदीपिकायां दशमे षट्त्रिंशः ३६ सप्तत्रिंशे हते केशिनाव्युनो
भाविकर्मभिः नारदेन स्तुतः क्रीडन् व्योमासुरमथावधीत् वृषवेशामरं यद्वत् केशिनं हयवेषिणं कंसप्राणसमं
वानयिष्ये इदानीं नौ कालकल्पेन हस्तिना यदि मुक्तो ततो मल्लैर्घातये वैद्युतोपमैः ३४ तयोर्निहतयो
स्तप्तान् वसुदेवपुरोगमान् तद्बन्धून्निहनिष्यामि वृष्णिभोजदशार्हकान् ३५ उग्रसेनं च पितरं स्थविरं राज्य
कामुकं तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ३६ ततश्चैषा मही मित्र भवित्री नष्टकण्टका जरासन्धो
मम गुरुर्द्विविदो दयितः सखा ३७ शम्बरो नरको बाणो मय्येव कृतसौहृदाः तैरहं सुरपक्षीयान् हत्वा भो
क्ष्ये महीं नृपान् ३८ एतज्ज्ञात्वानय क्षिप्रं रामकृष्णाविहार्भकौ धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियं ३९
अक्रूर उवाच राजन् मनीषितं सध्र्यक् तव स्वावद्यमार्जनं सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलसाधनं ४०
मनोरथान् करोत्युच्चैर्जनो दैवहतानपि युज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ४१ एवमादिश्य चा
क्रूरं मन्त्रिणश्च विसृज्य सः प्रविवेश गृहं कंसस्तथाक्रूरः स्वमालयं ४२ इति श्रीभागवते दशमे षट्त्रिं
शोऽध्यायः ३६ शुक उवाच केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन् मनोजवः सटावधूता
भ्रविमानसंकुलं कुर्वन्नभो हेषितभीषिताखिलः १ विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहा
म्बुदोपमः दुराशयः कंसहितं चिकीर्षुर्व्रजं स नन्दस्य जगाम कम्पयन् २ तं त्रासयन्तं भगवान् स्वगोकुलं

हत्वा कंसस्य प्रसभिचाकरोत् प्रथमश्लोकेन यथा एवं भूतः केशी आगत इति भगवान् उपाह्वयदिति द्वितीयान्वयः महाहय
सन् महीं निर्जरयन् विदारयन् सटाभिः केशैः अवधूतानि इतस्ततः क्षिप्तानि अभ्राणि विमानानि च तैः सङ्कीर्णम्
नभः कुर्वन् हेषितेन ह्रेषाशब्देन भीषिता अखिला येन सः १ नहेषितैरतिनिष्ठुरैः क्रोधितैः बालैः उक्तानामभिः
विहूर्णिताः यार्थाविशताः प्रभुदायेनतेप्रजोसग्रामार्थमात्मानं श्रीकृष्णस्य प्रतीपं रजोनिर्गताः सन् उपाह्वयत्

श्री. भा. द. पू. सी. २५६

ततः स केशी तं कृ॰ स्वहेषया स्वेन खं पिबन्निव स्तब्धं विशृंखलान्यानि सुवः सन् अभिमुखं जगाम किंचात्यमर्षणो
निश्चितः अमर्षं असहमानो वा अत्यन्तक्रुद्धः पद्भ्यामताडयत् दुरासदः अन्यैरभिभवितुमशक्यः दुरत्ययः सन् दुरति
क्रमः अत एव तः चंडजवः ४ तद्वंचनं वंचयित्वा हत्वा नाम यशसा रिप्रयो पादयो हस्ताभ्यां गृहीत्वा परिविध्य भ्रामयि
त्वा व्यवस्थितः तथैव स्थितो बभूव ५ व्यादाय मुखं विमार्याय वेगेन हरिं प्रत्यापतत् सोपि हरिर्हसन् उत्तरं भुजंस्य
वनिर्भयत्वेन दंष्ट्रानः यथोरगो बिले इति ६ ततः किं तदा दाहाः ईत्याः इति चतुर्भिः भगवद्भुजस्पर्शिनीनित्यादाने

स तं निशाम्याभिमुखो मुखेन खं पिबन्निवाभ्यद्रवदत्यमर्षणः जघान पद्भ्यामरविंदलोचनं दुरासदश्चं
डजवो दुरत्ययः ४ तद्वंचयित्वा तमधोक्षजो रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः सावज्ञमुत्सृज्य धनुःश
तान्तरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः ५ सलब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशी तरसापतद्धरिं
सोप्यस्य वक्त्रे भुजमुत्तरं स्मयन् प्रवेशयामास यथोरगं बिले ६ दंता निपेतुर्भगवद्भुजस्पृशस्ते केशि
नस्तप्तमयः स्पृशो यथा बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे उपेक्षितः ७ समेधमाने
न स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन् प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लंडं विसृ
जन् क्षितौ व्यसुः ८ तद्देहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः अविस्मितोऽयत्न
हतारिकः सुरैः प्रसूनवर्षैर्दिविजैरभिष्टुतः ९ देवर्षिरुपसंगम्य भागवतप्रवरो नृप कृष्णमक्लि
ष्टकर्माणं रहस्येतदभाषत १० श्रीनारद उवाच कृष्ण कृष्णाप्रमेयात्मन् योगेश जगदीश्वर वासुदे
वाखिलावास सात्वतां प्रवर प्रभो ११ ॥ ॥

तेषां विह्वलता तत्र लोहस्पर्शिनीति स्पर्शः यदा तप्तमयः अतितप्तं लोहादिस्पर्शनीयं यथा तानि आमयो जलोदरादि
र्वोपेक्षितस्तथैव वर्धते ८ कर्कटिकाफलं दीर्घपक्वं यद्वसेन विदीर्णं भवति तद्वद्विदीर्णदेहत्वात्तस्य देहाद्विनिर्गतत्वात् अवि
स्मितो गर्वरहितः अयत्नेन हता अरयो येन सः केशाद्यहस्तमादिषु अनेहस्याद्विपेशुनैः कंसवाक्यहस्तस्य का
र्यमावेदयन्मुनिः तदाह देवर्षिरिति ९ तत्रार्यस्तवकः किं तु सर्वं सुहृद्दिव्याह भगवन् अचर इति तस्या
इहसंवेदनं केसैरस्मिन्वानीति माशोकीर्तिमाह १०।११ ॥

राम: १६६

ग्रंथभावः त्वमीश्वरः भूभारसंहारायावतीर्णोसीति अतस्त्वद्रूपावर्णनविषयपालयोनि अनन्त्याद्येनावद्व यद्भूतेव
नास्तीत्याह अप्रमेयानन्यपरिच्छिन्नस्वरूपयोगेश्वरः अचिंत्यप्रभाव जगदीश्वरविश्वनियंतः वासुदेव सर्वभूतेष्ववर्त
मानमखिलवासस्सर्वस्याश्रयं संश्रुतिमात्रतो प्रवरश्रेष्ठप्रभासर्वशक्तिक यथैवं रूपोहमिति चेदतआह त्वमात्मेति
११ नहित्वं जीववत्परिच्छिन्नः किंतु सर्वभूतानामेकोहरेरेकोऽसि अन्त आत्माग्नेनस्यूतत्वेनदर्शितः एधसां काष्ठानां
अनन्तर्ज्योतिरिवेतिभूतेषुस्थितोपितेनदृश्यसेइत्याह गूढ इति अत्र हेतुवहेतवः गुहाशयः बुद्धेरपिगोचरः किं
च साक्षी नहि साक्षीदृश्यत इत्यर्थः अपि च महापुरुषः अतः परिच्छिन्नमतिभिर्नदृश्यसेइत्यर्थः नहि सर्वान् रत्वे
किं प्रमाणमतआह ईश्वरः नहीश्वरं विना पारमेश्वर्यात्मजीवानां प्रवृत्तिनिवृत्तिरिति भावः अहमीश्वरः अन्यस्सर्वेषी
वामिमेतदेव कुतआह आत्मात्मनेति साधनांतरनिरपेक्षत्वात्माश्रयः स्वेनैव मायया शक्त्याभावान् सस्जेस

त्वमात्मा सर्वभूतानामेको ज्योतिरिवैधसां गूढो गुहाशयः साक्षी महापुरुष ईश्वरः ११ आत्मनात्मा-
श्रयः पूर्वं मायया सस्जे गुणान् तैरिदं सत्यसंकल्पः सृजस्यत्स्यवसीश्वरः १२ स त्वं भूधरभूतानां दैत्य-
प्रमथरक्षसां अवतीर्णो विनाशाय सेतूनां रक्षणाय च १३ दिष्ट्या ते निहतो दैत्यो लीलयायं हयाकृतिः
यस्य हेषितसंत्रस्तास्त्यजंत्यनिमिषा दिवं १४ चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिनम् कंसं च
निहतान्द्रक्ष्ये परश्वोहनि ते विभो १५ तस्यानु शंखयवनमुराणां नरकस्य च पारिजातापहरणमिंद्र-
स्य च पराजयं १६ उद्वाहं वीरकन्यानां वीर्यशुल्कादिलक्षणं नृगस्य मोक्षणं शापात् द्वारकायां जगत्पते
१७ स्यमंतकस्य च मणेरादानं सह भार्यया मृतपुत्रप्रदानं च ब्राह्मणस्य स्वधामतः १८ पौण्ड्रकस्य वधो

हृष्टवान् नैः स्वहेतुर्गुणानैरिदं विश्वं सृजसि अवसि पालयसि अत्सि संहरसि नतु स्वष्टादिक्रियाः षट्कारकसाध्ये
वदुक्तेन तदाह सत्यसंकल्प इति नहि संकल्पसाध्यो बहिःसाधनापेक्षेति भावः अतस्त्वमीश्वरे स्वपसंहारस्य
नमाह १३ स त्वं भूधरभूतानां भुवे धारयंतीति भूधरा राजानः तद्रूपाणाम् १४ परश्वोहनि श्वश्वेव अश्वकारपक्षानि द्वितीयमह्नि
नोसि परश्वः चाणूरादीन्तवयानिहतान्द्रक्ष्यामीति सिद्धवन्निर्देशो विलापनप्रकारविशेषः १६ तस्यानु तद्वनेनैरंश
ख्यादीनां शंखः पंचजन्यः वधं द्रक्ष्यामीति शेषः भाविनिर्देशमात्रेण तत्रोत्तरविवक्षितं १७ भार्यायामोक्षतामहस्य

श्री॰ भा॰ द॰ टी॰ १२१

अमुष्याविश्वस्य भारस्य क्षपयिष्णोर्विनाशयतः नानाभिनंदनश्रीभगवंतं नमस्यति द्वयेन हि येन विशुद्धविज्ञानघनं केवल
ज्ञानैकमूर्तिं अत एव स्वसंस्थया स्वरूपस्य सम्यक् स्थित्यैव परमानंदरूपया समाप्ताः सर्वे अर्था येन तं अत एव अमोघा मनो
रथाः संकल्पना यस्य अमोघवांछितमिति ननु वांछावेदस्ति तर्हि तद्दुर्निवारसंसृतिः अत आह स्वतेजसेति
चिच्छक्त्या नित्यनिवृत्तो मायागुणप्रवाहो यस्मात्तं अतो भगवंतं निरतिशयैश्वर्यं ईमहि शरणं व्रजाम इति
ननु विकालरूपत्वं कथं नन्दनप्रपंचं जानामि वेत्यथ गुणप्रवाहेनैवाविर्भवति तत्राह २३ ईश्वरमन्यस्य वशायिनां स्वाश्र

यानि चान्यानि वीर्याणि तव कार्याणि वै भवान् कर्ता द्रक्ष्याम्यहं तानि गेयानि कविभिर्भुवि २१ अथ ते का
लरूपस्य क्षपयिष्णोरमुष्य वै अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसारथेः २२ त्वामीश्वरं स्वाश्रयमात्म
मायया विनिर्मिताशेषविशेषकल्पनं क्रीडार्थमद्यात्तमनुष्यविग्रहं नतोऽस्मि धुर्यं यदुवृष्णिसात्वतां
२४ श्रीशुक उवाच एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः प्रणिपत्याभ्यनुज्ञातो ययौ तद्दर्शनोत्सवः २५
भगवानपि गोविंदो हत्वा केशिनमाहवे पशूनपालयत्पालैः प्रीतैर्व्रजसुखावहः २६ एकदा ते पशून्पा
लांश्चारयंतोऽद्रिसानुषु चक्रुर्निलायनक्रीडाश्चोरपालापदेशतः २७ तत्रासन्कतिचिच्चोराः पालाश्च क
तिचिन्नृप मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः २८ मयपुत्रो महामायो व्योमो गोपालवेषधृक्
मेषायितानपोवाह प्रायश्चोरायितो बहून् २९ गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः
शिलया पिदधे द्वारं चतुःपंचावशेषिताः ३० तस्य तत्कर्म विज्ञाय कृष्णः शरणदः सतां गोपान्नयंतं
जग्राह वृकं हरिरिवौजसा ३१ ॥

यं स्वस्यैवाश्रयं अनन्याश्रयं आत्ममायया आत्माधीनमायया विनिर्मिता अशेषाविशेषा महदादयो याया देवादिरूपा कल्पना
येन धुर्यं नतोऽस्मि २४ अतो रथं केशववधानेनारदो नमस्कृत्य पुनः स्वगेहं पृष्ठान्वारयन्नाव्योमाहतः यद्वा व्यो
मवधः सर्वमेव ह्यमोपि वेषधारिवत्संगाद्दत्तो वा ध्यान इति इहैव केचित्तन्नः शालग्रहवथान्पूर्वमेव पठंति तन्नमाह
एकादेति २६ मेषवत्कदाचरितवान् स्वयं चोरवदाचरितः सन् अपोवाह आपहृतवानिनाये २९ पिदधे आच्छा
दितवान् ३० शरणदस्त्राणप्रदः हरिः सिंह इव ३१ ॥

राम॰ १२१

पशुमारायया भवन्ति नयानिः स्वासमित्यर्थः ३२ गोपैः स्तूयमानः उपरि विमानितैर्देवैः ३४ इति श्रीभावार्थदीपिकायां दशमे
सप्तत्रिंशोऽध्यायः ३७ अष्टात्रिंशे यथाध्यायमक्रूरो गोकुलं गतः तथैव रामकृष्णाभ्यां गृहं नीत्वा सत्कृतः शनैः
वेशिवधे सन्देहादश्यां निर्गतेषु मी ततो व्योम हतेऽक्रूरः सायं गोकुलमागतः तद्देवं श्रीभगवता नारदेन कंसवधा
दिकार्यं विज्ञापिते श्रीकृष्णो मथुरां गन्तव्यं नौ ततोऽनन्तरं ततोऽक्रूरोऽपि गोकुलगमनाद्विगाह अक्रूरोऽपीति संभावना
यो १ ग्रहे नैयाय्यायस्य स्वस्य कृष्णस्य पार्श्वं नेष्यति संभवसाशेकाण्डनः संभावयति ममैतदिति येन ३ विषयात्मनोदि

स निजं रूपमास्थाय गिरीन्द्रसदृशं बली इच्छन्विमोक्तुमात्मानं नाशक्नोद्ग्रहणातुरः ३२ तं निगृह्या
च्युतो दोर्भ्यां पातयित्वा महीतले पश्यतां दिवि देवानां पशुमारममारयत् ३३ गुहापिधानं निर्भिद्य गो
पान्निःसार्य कृच्छ्रतः स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलम् ३४ इति श्रीभागवते दशमे सप्तत्रिं
शोऽध्यायः ३७ श्रीशुक उवाच अक्रूरोऽपि च तां रात्रिं मधुपुर्यां महामतिः उषित्वा रथमास्थाय प्रययौ नन्द
गोकुलम् १ गच्छन्पथि महाभागो भगवत्यम्बुजेक्षणे भक्तिं परामुपगत एवमेतदचिन्तयत् २ किं
मयाचरितं भद्रं किं तप्तं परमं तपः किं वाथाप्यर्हते दत्तं यद्द्रक्ष्याम्यद्य केशवम् ३ ममैतद्दुर्लभं मन्य
उत्तमश्लोकदर्शनं विषयात्मनो यथा ब्रह्मकीर्तनं शूद्रजन्मनः ४ मैवं ममाधमस्यापि स्यादेवाच्यु
तदर्शनं ह्रियमाणः कालनद्या क्वचित्तरति कश्चन ५ ममाद्यामङ्गलं नष्टं फलवांश्चैव मे भवः
यन्नमस्ये भगवतो योगिध्येयाङ्घ्रिपङ्कजम् ६ कंसो बताद्याकृत मेऽत्यनुग्रहं द्रक्ष्येऽङ्घ्रिपद्मं प्रहितो

विषयाविष्टचित्तस्य शूद्रजन्मनस्तस्य ब्रह्मकीर्तनं वेदोच्चारणं यथेति ४ अथवा मैवं किं त्वधमस्यापि वस्य
पि ममस्यादेव कुतः इत्यत आह ह्रियमाणः कालनद्येति अयं भावः यथा नद्या ह्रियमाणानां तृणादीनां कृचित्
विचरति तथा कश्चिद्वत्सेन ह्रियमाणानां जीवानां मध्ये कश्चित्तरेदिति संभावयति ५ अतो मया अस्तु एवं ममामङ्गलं ध
वनष्टमेव नितान्तं यतो भवो जन्म च सफलं जातमिवेति निगमयति यद्यतः नमस्करिष्यामि ६ अमङ्गलनाशं च कंसोऽकरोत् नमस्तैः कृते
निवेदनात्पूर्वं अतिबलः कंसोऽपि ममानुग्रहं कृतवानित्याह यतो हरेः अङ्घ्रिपद्मं द्रक्ष्यामीति हर्षं प्रबृवीषादयः

श्रीः
रा॰पू॰
द॰टी॰
१२२

बलादिभिरर्चितमितिपरमैश्वर्यमाह श्रियार्चितेति सौभाग्यातिशयं मुनिभिर्भक्तिसहितैः परमपुरुषार्थगोचरायेति
कृपालुत्वं यद्गोपिकानां रतिप्रेममात्रसुलभत्वं ८ मनोरथान्तरं करोति हसन्मीति शोभमानौ कपोलौ नासिकाद्वयं
च्युतं तस्मिन् सहितगोपिकान्तः अवलोको यस्मिन् अरुणश्यामोऽकंजः पद्मः तद्वल्लोचने यस्मिन् वक्त्रं तच्च सुवेशुरा
लकावृतं वक्त्रं केशावृतं तदानीमेव शुभसर्वकं दृष्ट्वा प्रतिहृष्यन्नाह अदृष्टमिति ९ पुनरपि किं तद्गृतिश्रय्यति ते
पुंसः प्रावतः लावण्यधाम्नो श्रयः तस्या विलासार्थहास विलोलाव पूर्णपुरुष्यं यद्वा सवपुः तस्यापलेखनं दर्शनं भवति तन्न्युग्यतिश्र
पिबद्भिवेस्मान्नहिमहिमसहृष्णो लोचनस्य फलं तस्मादिति न अपि तस्मा देवमर्थः १० पश्यन्ति ते नितिवनभिः कलकतयवशा
कानन स्मरता हि देवकर्तव भोक्तृवादि यमैः तेतत्तयप्रतीयमाना कथं विलसन्ति मिति मोशंकां श्लोकत्रयेणाय कर्वंश्लनयेन तम

यदर्चितं बलभवादिभिः सुरैः श्रियावरेण्यामुनिभिः समाहितैः गोचारणायानुचरैश्चरद्वनेयद्गोपिकानां कुच
कुंकुमांकितम् ८ हसन्मिनन्नेत्र कपोलनासिकं स्मितावलोकारुणकंजलोचनं मुखं मुकुन्दस्य गुडालकावृतं मरदि
णामेयवर्ततिवेष्टगाः ९ अध्यपरिसोमतज्जनस्मीपुषोभावनारायभुवो निजेच्छया लावण्यधाम्नो भवितोपल
म्भनं मह्यं नरयस्याः फलमंजसादृशः १० यदेविनाहेरहितोपिसत्सतोः स्वतेजसापास्ततमोभिदाभ्रमः स्वमायया
त्मन्नचितैस्तदीक्षया प्राणाक्षधीभिः सदनेष्वभीयते ॥ यस्याखिलामीवहभिः सुमंगलैर्वाचो विमिश्रागुण
कर्मजन्मभिः प्राणन्ति शुम्भन्ति पुनन्ति वै जगद्यास्तद्विरक्ताः शवशोभनामताः १२ सचावतीर्णस्त्रिविलसात्वतान्वय
समेतयात्माय वरकर्मकृत् यशोवितन्वन्व्रज आस्त ईश्वरो गायन्ति देवा यदशेषमंगलम् १३ ॥

हसन्नामीतिमनोरथं करोति तथाहि ईक्षणमात्रेण कर्तृत्वं सत्सतोः कार्यकारणयोर्विलक्षणमात्रतो यदिदं दिनादि तिसदेः
कारहीनः तथोपि अस्त तमोभिदाभ्रमः तमः सहानेन तमसो भिदाभेदः ततो भ्रमः अभिनिवेशादि अपास्ता अपाकृताः तमश्चा
दृशीयस्मिन्नाकृतपतन्नाह स्वतेजसा दिविक्षन्नामिनिस्वरूप सालाकारेण तथा स्वमायया स्वाधीनयामायया तदीक्षया तदीक्षणेन
प्राणाक्षधीभिः सहितैः आत्मन आत्मनिस्वस्मिन्नेव रचितैः जीवैः सदनेषु शरीरेषु देवन रुपु गोपीषु देवसतीलयाक मणिकल्पं तं
समनुजत्वरभिधीयते अभिसुख्येन प्रतीयते ११ नतु सर्वयादृशं कारणादिरहितस्य प्राप्तस्याप्यसौलीलाप्तमपिकृतरस्माशंक्याह यदाश्वयहा
र्थसाधयेन्नाह अखिलानिअखिलसावा अमीवानिपापानि अवहरति अखिला मे वहानितैः तथा सुमंगलैः शोभनानि मंगला
नियेषां तैः गुणकर्मणारूपः कर्माणि जन्मानि वेतैर्विमिश्रा गुम्फिता वाचः जगत्प्राणयन्ति जीवयन्ति यद्विच्छयन्ति व्यतिरेकमाहया इति
तैर्विरक्ताः रहिताः तास्तलकृताः अपि वसमाम लेकृतावशवत्सु तकवत शोभमानाः सतां समता १२ स चर्यवितास्त्वत् च
र्मावमात्वलयतामसरबोधाणां समस्तुकर्ता सतनुप्रवतीर्णः यशश्च १३

त्रैलोक्ये प्रकाशमानं हरिं हृष्टिसद्धृतो मनोहरं श्रुत्वा प्रविश्य मीमितं श्रमसदं पद्मं भूतेन रूपं श्रीमूर्तिं तथानेन मीश्वरं द्रक्ष्यामीति अ
वलिंगमुखसः अभानसमयाः सुदर्शनाः सुखं प्रभातारं जनः सुभमत्वकावभूतुरित्यर्थः १७ किंवत्पयनिरंतरं सप
रितत्वणामेव तोरणाद्वतीर्णः सनूप्रधानयोऽरूषयोरामकृमयोश्चरणं योगिभिरप्यात्मलाभाय केवल्यधियैव धृतं
साक्षादहं नमस्यामीति आभ्यां महानयोः सर्वानुगोपांश्च तिन मस्यामीति किंचापीति १९ अथास्य तथास्यति तद्द्विभा
वयतिरत्नाभयमितिसार्थेन १६ बलिनानावत्पद्वयमितिदानसमये तु मत्हस्तोदके दत्ते निहते कौशिकइंद्रः
तेनापि गोवर्धनो द्वरणादनेन वृत्तस्याभिषेकसमये श्रेजोकृवेत्ताः वसोदकेकरेदत्तमिति समुद्रणासमारभयनिवर्त

तेवय कृतेनमहत्ता गतिं गुरुं त्रैलोक्य कांतं हर्षितन्मनोहरं रूपं दधानं श्रियई प्सितास्पदं द्रक्ष्ये समाससूयस:
सुदर्शनाः १४ अथावतीर्णाः सपदीशयोर्वयात्प्रधानयोर्मोश्चरणं स्वलब्धये धियाधृतं योगिभिरप्यहं ध्रु
वं नमस्य आभ्यां च मतावोवनौकसः १५ अपंत्रिमूलेयतितस्य मे विभुः शिरस्यथास्वजितत्वपंकजं दत्ताभ
यंकालभुजंगरंहसाप्रोहे जितानांशरणैषिणांनृणां १६ समर्पणाय त्रिविधाय कौशिकः तथायाविश्राय
नगवधै द्वतो वद्धा विकारंब्रजयोपितायमस्पर्शेन सोगेधिकगोप्यपानमत् २० नमस्युपेषस्विश्वद्विम
श्रुतः कंसस्तद्गतः अहंतोपि विश्वदृक् योनर्वेद्धिश्चेत सपत्नी हितं देवसत्त्वईहतयमेलेनवत्स्या १८ अंघ
त्रिमूले वहितेकृतां नलिमामी हितामस्मितमाईयादृश सयथयधमूलसमसूलकिल्विशोवासामुदेवीत
विशोकतुर्जितां १८ सहत्तमंजातिमतन्म दैवतं दोर्भ्यां हृहद्योपरिरभ्यतेयमां आत्माहितार्थी क्रियनेतदे
वमेवंध्रुवकर्मात्मकउत्तमिस्यतः २०

के सकामानन्तानामभ्युदयप्रदं चेसुकं अनुरक्तानामपि परमसौवदं च स्वाहृयहृद्वावाशंको वितर्के विहारेरासक्रीडायां सोगं
धिकस्यागोप्यपवर्गोधायस्तेन तन्मौवाधिकगोधि २० एवं प्रमानुग्रहं समभाव्य पुनरप्यसंभवमाशंक्यापरिहरतिनमा
वीति यद्यप्यहं कंसेनप्रहितः अतस्तस्य दूतः तथापि मयि ग्रे रयमिति बुद्धिं नउपेक्ष्यति न करिष्यतीत्यर्थः यतो विर
श्वदृक् सर्वज्ञः अतो ममचेतसोंतर्बहिश्च यदीहितं चेष्टितं यत्त्वयः क्षेत्रज्ञः अंतर्यामी निखिलज्ञानेनेक्षते अयं भावः चेत
सोवहिर्वकं समवर्ततेन अंतस्तु कंसमेवतद्वतदसौ हृदि स्थितो जानातीति यदा एतज्जगतईहितमिति १८ अ
पियदि अंघ्रिमूले चरणायो तेश्च वहितेसंयत्ते कृपामृतेनार्दयादृशमामीहितादयाति तर्हिसय सद्य एव विनष्टाखिलस
कल्मषः परांमुदंवोदाप्राप्स्यामीति १९ अथमांपरिरभ्य पतेश्चालिंगिष्यतियदानदैवमेआत्मादेहः तीर्थीक्रियतेतिपवि

श्री: भा॰टी॰ स्क॰टी॰ १०

ततम्भोऽस्मातीतितदाजन्मभृतः सफलजन्मानः अन्यथा सर्वं जन्मैव न भवतीत्याह महीयसेति महीयसां श्रीकृष्णेन योऽनुग्र
हितः तस्य जन्माधिकं अमुष्य जेतोः २१ ननु सुहृदादिषु परिग्रहमभ्याद्योज्जीवधर्मः कथमीश्वरे संगच्छतेत्यत आह
नयस्यैति दयितः प्रियः सुहृन्नमोऽहितः तद्विपरीतो द्वेष्यः एतत्सर्वं व्यतिरिक्तं उपेक्ष्य इति तथापि भक्तान्भजते न स्वयं यथा
ये भक्ताः तांस्तथा भजते ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति श्रीभगवद्वचनात् अविषमत्वेऽपि भक्तेष्वपक्षपा
ते दृष्टान्तमाह दृष्टान्तः यद्वत्सुरद्रुमः इति २२ अग्रजः श्रीरामः योऽयं नमलिः करिष्यति तस्मिन्नेव गृहीतं सान्नात्मनि
ममस्वानि समकृतानि प्रज्ञादीनि येन च तं मां सत मार्गमपि न वेद तथापि रथेन प्राप इति २४ अविलैर्लोकपालैः

त्वं गसेवं श्रयणं तेकृतां जलिं श्रावत्तते कुरन्तो अक्रूरश्रवाः तदावयं जन्मभृतो महीयसा नैवादृतो योऽधि
गमुष्य जन्मतत् २१ न तस्य कश्चिद्दयितः सुहृत्तमो न वाप्रियो द्वेष्य उपेक्ष्य एव वा तथापि भक्तान्भजते यथा
तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः २२ किं चाग्रजो मावनतं यदूत्तमः स्मयन्परिष्वज्य गृहीतमञ्जलौ गृहं
प्रवेश्याप्तसमस्तसत्कृतं सम्प्रक्ष्यते कंसकृतं स्वबन्धुषु २३ श्रीशुक उवाच इति सञ्चिन्तयन्कृष्णं श्वफल्कतनयो
ऽध्वनि रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप २४ पदानि तस्याखिललोकपालकिरीटजुष्टामलपा
दरेणोः ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवाङ्कुशाद्यैः २५ तद्दर्शनाह्लादविवृद्धसम्भ्र
मः प्रेम्णोर्ध्वरोमाश्रुकलाकुलेक्षणः रथादवस्कन्द्य स तेष्वचेष्टत प्रभोरमून्यङ्घ्रिरजांस्यहो इति २६
देहंभृतामियानर्थो हित्वा दम्भं भियं शुचं संदेशाद्यो हरेर्लिङ्गदर्शनश्रवणादिभिः २७ ददर्श कृष्णं
रामं च व्रजे गोदोहनं गतौ पीतनीलाम्बरधरौ शरदम्बुरुहेक्षणौ २८ ॥

किरीटेषु जुष्टाः अमलाः पादरेणवः यस्य तस्य क्षितिकौतुकानि क्षितेरलंकारभूतानि २५ दर्शनेन य आह्लादः तेन विवृद्धः
सम्भ्रमो यस्य सः प्रेम्णा ऊर्ध्वानि रोमाणि यस्य सः अस्रूणां कलाभिर्लेशैराकुले ईक्षणे यस्य सः अवस्कन्द्यावप्लुत्य तेषु पदेषु अ
चेष्टत अलुठत् अहो इति प्रभोः नारायणस्य अमूनि अंघ्रिरजांसि इति दुर्लभतां भावयन् ननु किमर्थमेवं अलुठत् तत्राह
प्रमसंभ्रमफलोऽहेशार इत्याह देहंभृतामिति २६ देहंभृतामेतावानेव पुरुषार्थः कं सस्य संदेशात् आरभ्य हरेर्लिङ्गश्रव
णदर्शनादिभिर्यो यमक्रूरस्य वर्णितः निसंदेशः आद्यो यस्य अर्थस्य सः यः अक्रूरस्य जातः इति वा २७ ततश्च कृष्णरा
मं च ददर्श गां दोग्धुं दुहन्ति यस्मिन्स्थिते गोदोहनं तस्थानं गतौ प्राप्तौ २८

श्रनुक्रोशेनकेपाद्विभामितत् स्मितयुक्तमीक्षणंययोः ३० उदारारूविराचक्रीडावययोस्तौस्रग्विणौरत्नस्रग्भिरलंकृतौ ३१ प्रधानभूतोपुरुषोप्रकृतिपुरुषात्मकोकृतग्राद्योतदपिकृतः जगद्धेतुग्रतएवजगत्पतीविपरीतोव्यक्ता
लोपाठांनांहेतुहेतुमद्भावःजगन्मर्थेभ्रमेर्भारायननयनायस्वांशेनमूर्तिभेदेनवलकेशावौसंतौ ३२ स्वप्रभयावि
गततिमिरादिशिकुर्वाणौकनकाचितौस्वर्णाख्यामाचितिमालेकारस्तैःशैलमाहरूपार्थमुक्ते ३३ ३४ भगवद्
ध्यानाह्लादेनयद्वाष्पेणतेनपर्याकुलेईक्षणेयस्यसः पुलकैराचितंव्याप्तमंगंयस्यसाव्याप्तेश्रक्रूरोहंतमस्कृतोमी
तिकथनेनाग्राक्रोत् ३५ श्रभिप्रेत्यग्रक्रूरोवसेतदर्थमागतइतिज्ञात्वाकेसहस्ननसामर्थ्योद्योतयन्निवरथांगेन

किशोरौश्यामलश्वेतौश्रीनिकेतौबृहद्भुजौ सुमुखौसुंदरवरौवालद्विरदविक्रमौ २९ ध्वजवज्रां
कुशांभोजैरंश्रिद्धिह्नितैर्महिंमंडनं शोभयंतौमहात्मानौसानक्रोशस्मितेक्षणौ ३० उदाररूविर
क्रीडौस्रग्विणौवनमालिनौ पुण्यगंधानुलिप्तांगौस्नातौविरजवाससौ ३१ प्रधानपुरुषावाद्यौज
गद्धेतुजगत्पती श्रवतीर्णौजगमर्थेस्वांशेनवलकेशवौ ३२ दिशोवितिमिराराजन्कुर्वाणौप्र
भयास्वया यथामारकतःशैलोरौप्यश्चकनकाचितौ ३३ रथात्तूर्णमवप्लुत्यसोक्रूरःस्नेहवि
ह्वलः पपातचरणोपांतेदेवसंमकृष्णयोः ३४ भगवद्दर्शनाह्लादवाष्पपर्याकुलेक्षणः
पुलकाचितांगश्चैवात्मानंनामाकथयत्तय ३५ भगवांस्तदभिप्रेत्यरथांगांकितपाणिना
परिरभ्याभ्युपाकृष्यप्रीतःसुगाढवत्सलः ३६ संकर्षणश्चप्रणतमुपगृह्यमहामनाः गृहीत्वापा
णिनापाणीश्रनयत्सानुजोगृहं ३७ पृष्टश्चायस्वागतेनतस्मैनिवेद्यचवरासनं प्रहात्यविधिवत्पा
द्योमधुपर्काद्र्हमाहरत् ३८ निवेद्यमाचातिथ्येसंवार्य्युश्चांतमाहृतः श्रन्नेनहद्गुणांमेध्यंश्रद्धया
पाहरद्विभुः ३९ तस्मैभुक्तवतेप्रीत्याराम परममधर्मवित् मुखवासैर्गन्धमाल्यैः परांप्रीतिंव्यधात्
नः ४०
पाणीश्रंजलिरूपेणसंहतावेवगृहीता ३७ मधुपर्के
वेकृत्वाद्वितीयःपाणिःतेनाभ्युपाकृष्यतमालिंगितवान् ३६ पाणीश्रंजलिरूपेणासंहतावेवगृहीता ३७ मधुपर्क
वक्राः श्रर्हणानुस्मिन्वायद्वितमर्हणमाहरत् पानीयेसमर्पितवानित्यर्थः ३८ सत्कृतेसमानिरनुग्रहेकृतेकेऽ
पवार्हेः श्रर्हणान्तस्मिन्वायद्वितमर्हणमाहरत् पानीयेसमर्पितवानित्यर्थः निरनुग्रहेस्म
धकेनप्रकारेणजीवेयमर्थः सोनःपशुवातीमएवपालकोयेषामविनीतोमेषाणांनएवतन्नेत्याहमर्थः निरनुग्रहस्म
मेवाहरूपावधीदितिताकान्तौकानिस्मृतनपूरतिपाठः श्रमसूनेववनपर्यातियः श्रुतःस्वलःतस्यकेसस्यश्रनानांहेमु
कृतस्यांजीवनमात्रमपिदुर्लभंतेषांवःकिंकृपालेविचारयामीतिमधुरयावाचाएवंसत्कृतःतएववाचायविशेषेनमग्र

[illegible]

श्रीः
भा॰ द॰
स्क॰ टी॰
३८

इतिश्रीभावार्थदीपिकायांदशमस्कंधेअष्टात्रिंशोऽध्यायः ३८ नवत्रिंशेपुरींगच्छन्स्वतेनोविलोकयत् अक्रूरेणाथकालिंद्यांविष्णु
लोकस्यदर्शनं भक्तमनोरथाः सत्याभवंतीतिद्योतयन्नाह सुखोपविष्टइति रामकृष्णाभ्यामुरुअधिकंमानितः १
हेतातसौम्यस्वागतंतेद्यभवतितथागतः स्वानांज्ञातिबंधूनामस्मत्सुहृदः ज्ञातयः सपिंडाबंधवकाः सपिंडाः संबंधिनः
तेषामपिकिमनमीवमनामयंचइतियावत् अनामयमारोग्यं ४ एवंप्रश्नोऽपिममनास्तिसंगतइत्याहकिं
नुनिःकुशलंप्रश्नेहेअंगहेअक्रूरवस्तुतस्त्वाभिनः अस्माकंनकुलस्यामयरोगेनोमातुलइतिनामयस्यतस्मिन्नृतःस्वानांज्ञातीनांत

शुकउवाच सुखोपविष्टःपर्यंकेसु॰ पप्रच्छसत्कृतंनंदःकथंस्थनिरनुग्रहे कंसेजीवतिदाशार्हेसौ
नपालाइवावयः ४१ योवधीत्स्वस्वसृतोकान्क्रोशंत्यासीनदीनवत् किंनुस्वित्तत्प्रजानांवःकुशलं
विमृशामहे ४२ इत्थंसूनृतयावाचानंदेनसुसभाजितः अक्रूरःपरिपृष्टेनजहावध्वपरिश्रमं ४३
इतिश्रीभागवतेदशमस्कंधेअक्रूरव्रजगमनंनामाष्टत्रिंशोऽध्यायः ३८ शुकउवाच सुखोपविष्टः
पर्यंकेरामकृष्णोरुमानितः लेभेमनोरथान्सर्वान्पथियान्सचकारह १ किमलभ्यंभगवतिप्र
सन्नेश्रीनिकेतने तथापितत्पराराजन्नहिवांछंतिकिंचन २ सायंतनाशनंकृत्वाभगवान्देवकीसु
तः सुहृत्सुवृत्तंकंसस्यपप्रच्छान्यच्चिकीर्षितं ३ श्रीभगवानुवाच तातसौम्यागतःकच्चित्स्वागतं
भद्रमस्तुवः अपिस्वज्ञातिबंधूनामनमीवमनामयं ४ किंनुनःकुशलंपृच्छेएधमानेकुलामये कं
सेमातुलनाम्न्यंगस्वानांनःतत्प्रजासुच ५ अहोअस्मदभूद्भूरिपित्रोर्वृजिनमार्ययोः यद्धेतोःपुत्रम
रणंयद्धेतोर्बंधनंतयोः ६ दिष्ट्याद्यदर्शनंस्वानांमह्यंवःसौम्यकांक्षितं संजातंवर्ण्यतांतातवतव
गमनकारणं ७ शुकउवाच पृष्टोभगवतासर्वंवर्णयामासमाधव वैरानुबंधंयदुषुवसुदेवव
धोद्यतः ८ यत्संदेशोयदर्थंवादूतःसंप्रेषितःस्वयं यदुक्तंनारदेनास्यस्वजन्मानकदुंदुभेः ९ श्रुत्वा
क्रूरवचःकृष्णोबलश्चपरवीरहा प्रहस्यनंदंपितरंराज्ञादिष्टंविजज्ञतुः १० गोपान्समादिशत्सोपि
गृह्यतांसर्वगोरस उपायनानिगृह्णीध्वंयुज्यंतांशकटानिच ११ ॥

त्प्रजासुच ५ अहोअस्मिन्निमित्तेवृजिनंदुःखंपित्रोरार्ययोर्निरपराधयोः यद्धेतोःअहमेवहेतुस्तस्मात् हेसौम्य
स्वानांवोदर्शनंअद्यममसंजातंतद्दिष्ट्याभद्रंभद्रं ७ माधवःसभोजेषुजातोक्रूरः ८ योधनुर्मखव्याजेनसंदेशोयस्य
यदर्थंचस्वजीवस्यमरणकत्वात्स्वजन्मानकदुंदुभेःसकाशात् ९ विजज्ञतुर्विशेषेणज्ञापयामासतुः १०
सोपिनंदःगोपान्समादिशत्तत्रदेवदर्शायतिसृभिर्नामित्यादिनागोरसः क्षीरादिउपायनानिसद्गमवस्तूनि ११

रसानुयोगतादीनुपाकृष्टलैर्नैवं समवयति अविदितस्परोगस्य विकेलार्थे रसानन्दास्यामहरनिदतावृजनस्ताधिकृतेना
ह्वाययस्सर्वतोयोषितवान् ताः कृष्णैकजीवनाः मोघ्यः तन्नदा अक्रूरमागतमुपस्थितेति १४ यथालिंगयोहृषंव
भिः काश्चिदितितेन अग्रवृणेन कृतो योहतापः तेनश्वासः तेनम्लानं मुखश्रीयासां ताः बभूवुरितितु कूलानि वकेशा
ग्रंथयस्त्र स्तमेतोउत्कूलादयो यासांतथाभूताः काश्चनबभूविरिति १५ तस्य श्रीकृष्णस्यानुध्यानेन निवृत्ता अशेषा अश्वुदि
यासांहिन्नयोयासांताः इमंलोकं देहमपि न ज्ञानेनतिस्म स्वकृष्णाइवेति १६ अपराः स्त्रियः शौरेर्गिरः स्मारंतः संभ्रम

यास्यामः श्वो मधुपुरीं दास्यामो नृपतेरसान् इरयामः स्व महत्सर्वं यांति जानपदाः किल १२ एवमाभ
ह्वाययत्तत्रानंदगोपाप्सु गोकुले १३ गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशं रामकृष्णौ पुरीं नेतुमक्रू
रं व्रजमागतं १४ काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः स्रंसदुकूलवलयकेशग्रंथ्यश्च का
श्चन १५ अन्याश्च तदनुध्याननिवृत्ताशेषवृत्तयः नाभ्यजानन्निमं लोकमात्मलोकं गता इव १६ स्मर
न्त्यश्चापरा शौरेरनुरागस्मितेरिताः हृदिस्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः १७ गतिं सुललि
तां चेष्टां स्निग्धहासावलोकनं शोकापहानि नर्माणि प्रोद्दामचरितानि च १८ चिंतयंत्यो मुकुंदस्य भीता
विरहकातराः समेताः संघशः प्रोचुरश्रुमुख्योऽच्युताशयाः १९ गोप्य ऊचुः अहो विधातस्तव न क्व
चिद्दया संयोज्य मैत्र्या प्रणयेन देहिनः तांश्चाकृतार्थान् वियुनंक्ष्यपार्थकं विक्रीडितं तेऽर्भकचेष्टितं यथा
२० यस्त्वं प्रदर्श्यासितकुंतलावृतं मुकुंदवक्त्रं सुकपोलमुन्नसम् शोकापनोदस्मितलेशसुंदरं करोषि
पारोक्ष्यमसाधु ते कृतं २१ क्रूरस्त्वमक्रूरसमाख्यया स्म नश्चक्षुर्हि दत्तं हरसे बताज्ञवत् येनैकदेशेऽखिल
सर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं मधुद्विषः २२ ॥

हुः कथंभूताः अनुरागेण यस्मितं तेन ईरिताः हृदिस्पृशतीति तथा हृदिस्पृशः मनोज्ञाः विचित्राणि पदानि यासां ताः १७
विरहेण कातराः विह्वलाः अश्रुमुख्यः वितयांसांताः १९ कृष्णसंगतिं विधाय विघटयतीति विधातारं प्रत्येकमा
क्रोशंत्य आहुः अहो इति मैत्र्या हितावरणेन प्रणयेन स्नेहेन च कृतार्थान् प्रापीनगमानपि तान् वियुनंक्षि वियोजयसि त
स्यात्तव न दया बालिशस्येव अस्मान् हुः अपार्थकमिति २० चित्रमिति तं बालचेष्टितमेवेत्याहुः यस्त्वमिति कमपश्यदतीति प्रेमा
कापवेदः स्वकाशासिस्मितलेशस्य शृंगहासमनेन संदर्भं मुकुंदस्य वक्त्रं सुकपोलमुन्नसं प्रदर्श्य पुनस्तस्य पारोक्ष्यमदर्शनं करोषि अतस्तव

श्रीः
भा॰ द॰
प्र॰ टी॰
१०२

किंचिद्दृष्ट्वापुत्रादिविनातिकूरः ग्रस्तमितिकमपनुदतीति शोकापनोदः मदासोस्मितलेशस्य गृहाद्दामनेन मदर्शनेन
केदस्यवक्रैः सकृत्यदर्शं पुनस्तस्य यावरोदयमदृष्यताकरोषि। तामित्याहुः नन्वक्रूरो हरतितीनाहमितिचेत्तत्राहुः
अक्रूरसमाख्यायेतिनसुवं कृतं मन्यः अभवति हाविनातिकूरः तामित्याहुः नन्वक्रूरोहरतितीनाहमितिचेत्तत्रा
हुः अक्रूरसमाख्यायेति अतोमातरेनस्मधुवंतमेवागतोसिकृसंहरामिनयुष्मच्चहरतितिचेत् येनवर्तते नव
त्वयामधुद्विषकृदर्शनेन चक्रादोवदीर्घसमयस्यदृष्टिसोढवैतेयुगंयमत्रात्वाद्विधातारं विहायपरस्यमनुः नेत्रे
हस्तनुरितिवत् विदेत्तत्वा भगवद्भित्स्थिरं सोहृदयस्य सः गृहादीन्विहायग्रहासाद्गतान्नेसैवदासस्यमुपगतासकृ
त्वातुराः नन्कृतेनैवस्मितादिनादिनापरवशाः अपिनः अस्मान्नमसैदिष्यतेनवाग्निर्येयसमम अतः पर्यं निवारयामः इति

न नंदसूनुः क्षणभंगसौहृदः समीक्षते नः स्वकृतातुरा वत विहायगेहान्स्वजनान्सुतान्पतीन् तद्दास्यमद्धोपगता
नवप्रियः २३ सुखंप्रभातारजनीयमाशिषः सत्या बभूवुः पुरयोषितांध्रुवं याः संप्रविष्टस्य मुखंव्रज
स्पतेः पास्यंत्यपांगोत्कलितस्मितासवं २४ तासांमुकुंदो मधुमंजुभाषितैर्गृहीतचित्तः परवान्मनस्व्यपि
कथंपुनर्नः प्रतियास्यतेऽबला ग्राम्याः सलज्जस्मितविभ्रमैर्भ्रमन् २५ अद्यध्रुवंतत्रदृशोभविष्यते दाशार्ह
भोजांधकवृष्णिसात्वतां महोत्सवः श्रीरमणंगुणास्पदं द्रक्ष्यंतियेचाध्वनिदेवकीसुतं २६ मैतद्वि
धस्याकरुणस्य नाम भूदक्रूर इत्येतदतीवदारुणः योऽसावनाश्वास्यसुदुःखितंजनं प्रियात्प्रियंनेष्यति
पारमध्वनः २७

भावः २३ सत्यं बभूवुः सुखंप्रभातेति व्रजस्पतेः कृष्णस्य मुखं पास्यंति अपांगेण द्रक्ष्यंति कथंभूतं अपांगेन नेत्रयोर्नेत्रेणोत्क
लितं उच्छ्रितं तासां तमेवासवो मद्यरसो यस्मिंस्तत् यद्वा अपांगोत्कलितस्मितेन आसर्वत्रपयत्सु रवितं तत्त्वपानसुखमेव
संभावयेत् २४ नहि ग्राम्याणां त्वदविनातिनघामवततामतयाप्यस्मत्स्नेहोतनाहेष्टः पित्रादिभिस्तावत्ततेत्रामसमिष्यतीत्याशं
क्याहते अवलानानांमधुवन्मंजुभासितवशीकृतचित्तः तथात्मनां सलज्जस्मितैर्विभ्रमत्परवानपित्रादिपरतंत्रोऽपि यद्वा
तुमेयते ग्राम्येपुरेऽथवः मेतियस्यसतथामनस्वी धीरोऽपिग्राम्याः अविदग्धाः नकथंप्रतियाते प्रतिष्यतिनकथंचिदि
त्यर्थः २५ किंवा सुखममभाजोऽन्यापश्यन्भविष्यंतीत्याहुः अद्येति तत्रपुरेदाशार्हादीनांदृशोदृष्टेः महानुत्सवोभविष्यति
येदेवकीसुतंद्रक्ष्यंति तानि यान्येवाध्वनि पथआगच्छंतंद्रक्ष्यंति तेषामपिदृशोभविष्यतीतियद्वादृश इतियातेषांदृशोमहोत्सवः

अक्रूरं शपथैरप्याहुः मेतद्विधास्यतीत्येवं निधायांकं कर्मयस्य सतथैवेति क्रूरयस्य क्रूरतर इति शोभनं नाम मा भूत् अथ देहतः
अतीवदारुणात्तस्माद्विप्रियात्प्राणदापि प्रियतरं स्वीकुर्वन्ति अथ तेनः पार्श्वं अस्मात् दृग्गोचरत्वात् अनिहृत्य देशं तेषां
ति २७ अहो धिगिदमत्र जीवितमित्याहुः अनार्द्रधीरिति अनार्द्रा करुणा धीर्यस्य सः तावदेव कुरुस्यापरमधिहृदः
अस्याविनयमाद्यस्य विरुद्धापेक्षितं तेन निरीहितचेतः इत्यर्थः किंच देवाभिमतमथवे भावः यदि दैवमस्मानतुकूलं भवेत्
विघ्नैः कश्चिद्देषां मध्ये मतिमन्येन अक्रूरस्याविद्वेषणानो भवेत् अमहाक्लिवि हन्ति हृस्यानन्तस्तीति २८ परस्परं समग्र
हृस्मर्माधिकमाहुः निवारयाम इति अक्रूरं विघ्नाति निषाद्यं दुस्त्वनाम् मुकुन्दसङ्गाविघ्नसिना निवियोजिता निअन्तर्व

अनार्द्रधीरेष समास्थितो रथं तमन्वमी च त्वरयन्ति दुर्मदाः गोपा अनोभिः स्थविरैरुपेक्षितं दैवं च नोद्य
प्रतिकूलमीहते २८ निवारयामः समुपेत्य माधवं किंनोऽकरिष्यन् कुलवृद्धबान्धवाः मुकुन्दसङ्गान्नि
मिषार्धदुस्त्यजाद्दैवेन विध्वंसितदीनचेतसाम् २९ यस्यानुरागललितस्मितवल्गुमन्त्रलीलावलोक
परिरम्भणरासगोष्ठ्यां नीताः स्म नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरन्तम् ३०
यो ऽह्नः क्षये व्रजमनन्तसखः परीतो गोपैर्विशन् खुररजश्छुरितालकस्रक् वेणुं क्वणन् स्मितकटाक्षनिरी
क्षणेन चित्तं क्षिणोत्यमुमृते नु कथं भवेम ३१ श्रीशुक उवाच एवं ब्रुवाणा विरहातुरा भृशं व्रजस्त्रियः कृ
ष्णविषक्तमानसाः विसृज्य लज्जां रुरुदुः स्म सुस्वरं गोविन्द दामोदर माधवेति ३२ ॥

दीनानि वेनोसियासो पवं अन्ता मामस्माकं न मृत्योरपि भयत्यर्थः २९ अतो पि कारणादवश्यमाहम मैवाल्पषनी
यमित्याहुः हे गोप्यः यस्य ललितं स्मितं वल्गु मन्त्रं च लीलावलोकश्च परिरम्भणं च रासगोष्ठ्यां यत्रानियस्माद्
मगो ह्यारामकी तस्म भायानः अस्याभिक्षणादाराः क्षणमीव नीता ः तमसु कुसवितदुरन्ततमः विरहदुःख
कथं नु अतितरेमनेक थविदित्यर्थः ३० किं वा स्तन ममातितरणो जीवनमेव तमेव नमेव कथमस्यादित्याहुः अह्नः
क्षये लितदिनावसाने खुररजोभिः छुरिता धूसरा अलकाः स्रजश्च यस्य सः वर्तविशन् स्मितेन युक्तः कटाक्षनिरी
क्षणेन निश्चितं क्षिणोति अमुकृते विनाकथं भवेम ३१ कुलतीर्थाभिमानमातियामागाः समरमुद्दे ः कृ
ष्णेन विस्मृतस्य ः गोपीमनोगवागामाः समानः स्वपरययो ३२ ॥
रमकृतः अक्रूराकसमं कंसनिसक्त ः

स्त्रीणामिति प्रेमनाट्यकृतमैत्र्यादिकमिति संप्रेष्यामन्त्रणादिकं येन सः ३४ अतसञ्जन्त अनुगमन्वसज्जन्त अनुरञ्जिताः
पराङ्मुखीर्वीक्षणादिभिः किं वदन्नवीक्षिताः प्रत्यादेशं प्रत्याख्यानं ३५ तप्यतेः सतप्यमानाः प्रस्थाने श्रीब्रह्मामामीति
दूतवाक्यैः ३७ कृष्णमनुप्रस्थापितात्मानश्चित्रलिखिता इव स्थिताः लेख्यमयपुत्तलिकास्वतिनिश्चलाः ३८ वृक्षाणां षं
डं समूहमुपव्रज्य ३९ ग्राव्यः प्रार्थितः सन् रथमाविवेश ४० ब्रह्म स्तवेदं जपन्नक्रूरो बालकौ तौ कमलावा
निरीक्ष्य किं तदेवं तेन संस्रष्टौ यज्जले तौ तत्र दृष्टौ ४२ सिद्धादिभिः स्तूयमाने ४४ सहस्रशिरांसि यस्य तं
